The commentary frequently refers to two older commentaries on the *Gītagovinda*; one is, as has been already referred to, the *Sāradīpikā* by Jagaddhara, the well-known commentator of *Mālati-Mādhava*, *Veṇīaṁhāra* and *Sapnavāsavadattā*. The other is by Bhgīratha, probably the famous commentator of *Kāvyādars'a*, *Naiṣadha*, *S'is'upālvadha* and *Megdhūta*. Bhagīratha as a commentator of *Gītagovinda* is little known and amongst the thirty an odd odd commentators so far known his name is not mentioned by Kṛṣṇamāchārī in his history of Sanskrit literature. From his Commentary on *Kirātārjunīyam* we learn that he belonged to the pītamuṇḍīya family and hence references in *Sāravatī* to pītamuṇḍīya in several places actually mean the commentary of Bhagīratha on *Gītagovinda*. It is not that he has always supported the views of the commentators, sometimes, he differs from them and gives his own interpretations. On the whole, *Sāravatī* reveals S'akladhvaja's scholarship, sense of litarary appreciation and aesthetic mind behind the manble of a peroic facade. The work will eertainly throw new light on an aspect of his personality which has been lying hidden so long to the students of history. The serial number or order of verses in the lyrics commented by Sukladvja though generally tally with versions prevalent in other region of India, however, differ in certain instances. A few verses found in others are not found in the version prevalent in Assam and S'ukladvaja has also aveided them. For instance, the follewing verse found in the Bengal version is not found in any of the three manuscripts containing the commetary of S'ukladvaja.

> sāddvī mādhvikā cintā na bhavati bhavataḥ s'arkare karkarasi
> drākṣe drakṣyanti ke tāmamṛta mṛtamasi kṣīra nīraṁ rasante
> mākanda kranda kāntādharā dharaṇitalaṁ gaccha gacchanti yāvad
> bhāvaṁ s'ṛṅgārasārvatmiha jayadevasya vis'vagvacāṅgsi //12/29
>
> (Bengal vs)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीजयदेवकविविरचितं

गीतगोविन्दम्

श्रीमच्छुक्लध्वजनृपतिकृत-
सारवतीटीकया सम्बलितम्।

॥ प्रथमः सर्गः ॥

। सामोददामोदरः ।

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमैर्
नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ॥१॥

सारवती

ॐ नमो गणेशाय।

कस्तुरीमकरीरुचं कुचतटे नेत्रेऽञ्जनानां प्रियं
कण्ठे श्यामसरोजदामसुषमामास्ये द्विरेफद्युतिम्।
शृङ्गाराङ्कुरविभ्रमञ्च हृदये वामभ्रुवां तन्वती
रासोल्लासभरोद्धता मधुरिपोः कान्तिच्छटा पातु वः ॥१॥
व्याख्यानं विविधं निधाय हृदये प्रख्यातसंख्यावतां
सारं तस्य विविच्य सज्जनसभासम्भाषणैर्भूयशः।
विस्पष्टां जयदेवसत्कविगिरां गूढाशयोद्भाविनीं
टीकां सारवतीमिमाम्वितनुते शुक्लध्वजो भूपतिः ॥२॥

१। सम्प्रति परमरागिणां जनानां श्रवणमननादिप्रकारेण भगवद्भजनमतिदुर्घटमित्यावेद्य परमकारुणिकः कविः शृङ्गाररसप्रधानभगवच्चरितवर्णनमारभमाणः समीहितसिद्धिकामो महाकाव्याङ्गभूतवस्तुनिर्देशं कुर्व्वन्नेव राधामाधवकेलिकीर्त्तनरूपं मङ्गलमाचरति।
यमुनाकूले प्रत्यध्वकुञ्जद्रुमम् अध्वनि अध्वनि कुञ्जे कुञ्जे द्रुमे द्रुमे राधामाधवयोः रहःकेलयः निभृतरतिहासविलासादिक्रीडाः जयन्ति जययुक्ता भवन्तु। अत्र वीप्सायामव्ययीभावसमासः। यद्यपि जयो हि नाम संग्रामे प्रभुत्वेनामित्राणां वशीकरणम्, स च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाग्देवताचरितचित्रितचित्तसद्मा
पद्मावतीचरणचारणचक्रवर्त्ती ।
श्रीवासुदेवरतिकेलिकथासमेत-
मेतं करोति जयदेवकविः प्रबन्धम् ॥२॥

सारवती

केलीनां न सम्भवति, तथापि उत्कर्षेण वर्द्धन्तामित्येवार्थः। उत्कर्षेण वृद्धिश्च निरन्तरचिन्तनविषयत्वम्। चिन्तनेन विघ्ननिवारणं भवत्येवेति तत्प्रार्थनमुचितमेवेति गायतां शृण्वतां विघ्ननिवारणं कुर्व्वन्तु इति जयतेरर्थ इति भगीरथः। तन्न, केलीनामतीतत्वेन विघ्ननिवारणे सामर्थ्याभावात्। कीदृशयोः ? इत्थम् अनेन प्रकारेण नन्दनिदेशतः चलितयोः नन्दाज्ञां प्राप्य चलितयोः कोऽसौ नन्दनिदेश इत्यत आह—मेघैरिति। अम्बरमाकाशं मेघैर्मेदुरं सान्द्रम्। वनभुवः वनोपलक्षितभूमयः तमालद्रुमैः श्यामाः तमालवृक्षैः कृष्णवर्णाः। अयञ्च कृष्णो नक्तं भीरु रात्रौ भयशीलः, अतस्त्वमेव राधे इमं गृहं प्रापय नय। मेघैरित्यादितमालद्रुमैरित्यन्तैरतिशयभयानकत्वं दर्शितम्। नक्तं भीरुरित्यनेन सन्ध्यायां निदेशं कुर्व्वता रात्रिरागतप्रायेति नयने त्वरा दर्शिता। यद्यपि त्वमपि स्त्रीजनः प्रेरयितुमयोग्यः तथापि कृष्णं नेतुं कोऽप्यत्र नास्तीत्याशयेत नयेममित्युक्तम्। एतत्पक्षे एवकारोऽप्यर्थः. अन्यत्र विश्वासाभावात्। त्वमेव नयेत्येवकारोऽवधारणार्थ इति जगद्धरः। अथ छलेन गृहं गृहिणीमात्मानं त्वमेव नय प्रापयेति इवादिष्टम्। उक्तञ्च 'न गृहंगृहमित्याहुर्गृहिणी गृहमुच्यत' इति। काव्यस्य नायिकाधीनशृङ्गाररसप्राधान्यादर्च्चितत्वेन राधायाः पुर्वनिपातः। क्वचिदनर्च्चितस्य पूर्व्वनिपात इति वा। यद्यपि राधे त्वमेव गृहं प्रापय इत्यनेन राधिकैवादिष्टा तत् कथं नन्दनिदेशतश्चलितयोरिति, तथाप्यर्थतो माधवस्यापि निर्देश इति बोद्धव्यम्। 'सान्द्रं स्निग्धस्तु मेदुरमि'ति धरणिः। 'नक्तञ्च रजनावि'त्यमरः। राधो वैशाखमासे स्याद्राधा गोप्याञ्च विन्दती'ति। 'आज्ञा निदेश आदेश' इति विश्वः। अत्र श्रीकृष्णस्य प्रीतिहेतुप्रतिपादनात् प्रेयो नामालङ्कारः। तथा च दण्डी 'प्रीतिप्रकाशनं यत्तत्प्रेय इत्यभिधीयत' इति। तदिह राधामाधवकेलिनिर्द्देशवस्तुरूपं महाकाव्यलक्षणं निष्पादितम। तथाच दण्डी, 'सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम्। आशीर्नमस्क्रिया वस्तुनिर्द्देशो वापि तन्मुखमित्यलं विस्तरेण॥

२। स्वकीर्त्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्व्वकं प्रतिज्ञां करोति। जयदेवकविः जयदेवनामा कविःपण्डितः एतं गीतगोविन्दाभिधानं प्रबन्धं करोति निष्पादयति। कीदृशं प्रबन्धम् ? श्रीवासुदेवरतिकेलिकथासमेतम्। श्रीश्च वासुदेवश्च। श्रीर्लक्ष्मीरूपा राधा,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलम् ।
मधुरकोमलकान्तपदावलीं शृणु तदा जयदेवसरस्वतीम् ॥ ३ ॥

सारवती

वासुदेवः कृष्णः । तौ श्रीवासुदेवौ । तयोः रतिः शृङ्गारः । तत्र केलिः हास्यपरिहासादिः । तस्य कथा कथनं प्रतिपादनमिति यावत् । तेन समेतं युक्तम् । कीदृशो जयदेवकविः ? वाचां देवता वाग्देवता सरस्वती । तस्याश्चरितेन विविधवाग्विलासेन चित्रितं चरितं चित्रितमिव चित्तसद्म मनोगृहं यस्य । अन्यदपि गृहं देवताचरितचित्रितं क्रियत इति समुचितम् । एतेन पाण्डित्यं सत्कवित्वञ्च प्रतिपादितम् । अपि किम्भूतः ? पद्मा लक्ष्मीः, सा विद्यते अस्येति पद्मावान् कृष्णः, तस्य भार्य्या पद्मावती । पुंयोगादाख्यायामी । तस्याश्चरणयोः चारणाः सेवकाः, तेषु चक्रवर्ती सेवकश्रेष्ठ इत्यर्थः । एतेन सेवकश्रेष्ठ-त्वकथनेन लक्ष्म्याः स्वविषयककृपाप्रतिपादनेन नानागुणवत्त्वं सूचितम् । तथाच 'स श्लाघ्यः स गुणी धन्यः स कुलीनः स बुद्धिमान् । स शूरः स च विक्रान्तो यस्त्वया देवि वीक्षितः ॥' यद्वा पद्मावती तस्यैव भार्य्या । तस्याश्चरणे नर्त्तने चारणचक्रवर्ती नटराज इव । भगवदग्रे निजवधूं नर्त्तयतीति वार्त्ता । एतेनात्मनः शृङ्गारित्वं सङ्गीतकला-कुशलत्वं भगवद्भक्तिपरत्वञ्च दर्शयता स्वकीयकाव्यस्य शृङ्गाररसशालित्वं तालादिशुद्धत्वम् ईश्वरवियत्वञ्च सूचितम् । सेवायां चारणं प्रोक्तं नटसेवकयोरपी'ति विश्वः ॥

३। कविरिदानीं निजग्रन्थगुणकीर्त्तनेन विरक्तानुरक्तसाधारणश्रोतृजनानभिमुखी-करोति । हे लोक । यदि हरिस्मरणे कृष्णस्मरणे मनः सरसं सानुरागम्, यदि विलासकलासु शृङ्गारादिचतुःषष्ठिकलासु कुतूहलं कौतुकं जिज्ञासेति यावत्, तदा जयदेव-सरस्वतीं जयदेववाणीं शृणु आकर्णय । किम्भूतं जयदेवसरस्वतीम् ? मधुरकोमलकान्त-पदावलीम् । मधुरा अर्थद्वारा सरसा, कोमला सुबोधा कान्ता श्रवणानन्दजनिका, एवम्भूता पदावली पदपंक्तिर्यत्र । मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः । येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः ॥ 'सुखप्रयोज्यैर्यच्छब्दैर्युक्तमस्पष्टसन्धिभिः । सुकुमारान्तसंयुक्तं कोमलं नाम तद्विदुः ॥'* 'यन्मनःश्रोत्रविषयं प्रह्लादजनकं भवेत् । शब्दबन्धानुयोगेन तत्कान्तमिति कीर्त्तितम् ॥' अत्र श्लोके सम्बोधनाभात् दैप शोधने दायन्त इति दा, पचाद्यच्, हे दाः शुद्धाः जयदेवसरस्वतीं शृणुत इत्यपि व्याचक्षते । तेषां मते 'न चिरं मम तापाय

---

* सुखप्रयोज्यैर्यच्छन्दैर्युक्तं सुश्लिष्टसन्धिभिः ।
सुकुमारार्थसंयुक्तं सुकुमारं तदिष्यते ॥
इति पाठान्तरं काव्यादर्शे दृश्यते ।

शृणु तदा
ऐसा विभाग

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाचः पल्लवयत्युमापतिधरः सन्दर्भशुद्धिं गिरां
जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुते।
शृङ्गारोत्तरसत्प्रमेयरचनैराचार्यगोवर्द्धन-
स्पर्द्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कविक्ष्मापतिः ॥ ४ ॥

सारवती

तव यात्रा भविष्यति। यदि यास्यसि यातव्यमलमाशङ्कया च ते ॥' इत्यादिदर्शनात् यत्तदोर्नित्याभिसम्बन्धाद् तदेत्यनिबन्धनेऽपि न दोष इत्यवधेयम्। 'शृङ्गारादौ विषे वीर्य्ये गुणे रागे द्रवे रस' इति विश्वः। 'कला चन्द्रकलायाञ्च कला स्यात्क्रीडणादिषु' ॥

४। लक्ष्मणसेनसभासदां स्वरूपकथनेन निजोत्कर्षप्रतिपादनेन स्वकाव्यमाहात्म्यं सूचयति। उमापतिधरनामा कश्चित् कविः वाचः पल्लवयति विस्तारयति न तु गुणादिकं वेत्तीत्यर्थः। गिरां वाणीनां सन्दर्भशुद्धिं मूलशुद्धिं जयदेव एव जानीते नान्यः कविरिति। मूलशुद्धिश्च शब्दार्थवैशिष्ट्यम्, तच्च निर्दोषगुणवत्तालङ्कारादियोगित्वे सति रसवत्त्वम्। तदुक्तं सरस्वतीकण्ठाभरणे—'निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्। रसान्वितं कविः कुर्व्वन् कीर्तिं प्रीतिञ्च विन्दति ॥'' शरणनामा कविः दुरूहद्रुते दुरूहस्य दुःखेनार्थप्रतिपादकस्य द्रुतिः तरा, तया श्लाघ्यः। तथा च दुःखेनार्थप्रतिपादकं काव्यं त्वरया करोति न तु सुबोधम्। शृङ्गारोत्तरसत्प्रमेयरचनैः शृङ्गारप्रधानः सन् प्रमेयोऽर्थो यत्र तस्य काव्यस्य रचनैः निर्माणैः आचार्य्यगोवर्द्धनस्पर्द्धी न कोऽपि न विश्रुतः न ख्यातः। स तु शृङ्गाररसं प्राधान्येन वर्णयति, न तु भगवच्चरितानुसङ्गितयेति भावः। धोयी नामा कविक्ष्मापतिः कविनृपः श्रुतिधरः श्रवणमात्रेणैव ग्रन्थं गृह्णाति न तु स्वतः कर्त्तुं समर्थ इति। अत्र स्वरूपकथनप्रसङ्गेन निजोत्कर्षकथनं न दोषाय। तथा च दण्डी, 'स्वगुणाविष्क्रियादोषो नात्र भूतार्थसंशिनामि'ति। भगीरथस्तु उमापतिधरः वाणीं पल्लवयति. तस्य गिरां सन्दर्भशुद्धिमेव जयदेवो जानीते। एवं शरणादावपि व्याख्येयम्। स्वस्य गुणमात्रग्राहित्वं दर्शितमित्याह। वस्तुतस्तु लक्ष्मणसेनसभासदां वर्णनं कुर्व्वन्नेव स्वकाव्योत्कर्षप्रतिपादनाय लक्ष्मणसेननृपेणैवाहं परीक्षित इत्याह इति। कविश्चासौ क्ष्मापतिश्चेति कविक्ष्मापतिः लक्ष्मणसेनः, जयदेव एव जयदेवविषय एव गिरां सन्दर्भशुद्धिं जानीते। किमन्ये कवयः तत्सभायां न सन्तीत्यत आह—उमापतिधरो वाचः पल्लर्यति सम्यक्प्रकारेण वाचः पल्लवयति विस्तारयोतीति शब्दचित्रनानाकाव्यकरणेन स तु महान्। एवं शरणादावपि उत्कर्षपरतयैव व्याख्येयमिति ब्रूमः। 'उत्तरं प्रतिवाक्ये च प्रधाने च नपुंसकम्। उत्तरादिशि कौवेर्य्यां पश्चात्कालेऽपि चोत्तर' इति ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीतम् – १

मालवरागेण रूपकतालेन गीयते ।

प्रलयपयोधिजले धृतवानसि वेदम् ।
विहितवहित्रचरित्रमखेदम् ॥
केशव धृतमीनशरीर जय जगदीश हरे ॥ ध्रुवम् ॥ १ ॥

क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे ।
धरणिधरणकिणचक्रगरिष्ठे ॥
केशव धृतकच्छपरूप जय जगदीश हरे ॥ २ ॥

माधवती

१। गौडमालवरागः । रूपकतालः । तल्लक्षणम्—"नितम्बनीचुम्बितवक्त्रपद्मः शुकद्युतिः कुण्डलवान्प्रमत्तः । सङ्गीतशालां प्रविशन्प्रदोषे मालाधरो मालवरागराजः ॥' गौड़देशोद्भवमालवराग इत्यर्थः । अधुना गीतेनापि दशावतारस्तुतिरूपमङ्गलमाचरति ध्रुवम् । तत्र प्रथमं मत्स्यावतारं स्तौति । हे केशव हे जगदीश जगतामीश हे हरे ! त्वं जयजय । गायतां शृण्वतां विघ्ननिवारणं कुरु, यथाश्रुते मादृशामीश्वरजयाशंसनस्यानौचित्यात् । कीदृश ? घृतमीनशरीर घृतमत्स्यदेह प्रलयकालीनसमुद्रसलिले वेदं धृतवानसि । अखेदम् अपरिश्रमं यथा स्यादेवं वेदम् । कीदृशम् ? विहितं वहित्रस्य चरित्रं येन । वेदस्य नित्यनैमित्तिककर्म्मप्रतिपादनतया संसारसागरतारकत्वेन पोतस्य साम्यम् । स्तुतित्वादत्यादरेण बहुधा सम्बोधनम् । तदुक्तम्, 'अत्यादरे सम्भ्रमे च पुनरुक्तिर्न दुष्यत' इति । पयोधिपदेन मूर्तिमतोऽपि कदाचिल्लाभ इति मन्दाशङ्कानिरासार्थं जलपदोपादानम् । प्रकृष्टो लयः प्रलयः ब्रह्मसायुज्यम्, परमविज्ञस्य कवेस्तदेवोद्देश्यमिति तत्स्मारकप्रलयपदस्य नामङ्गलत्वमिति ध्येयम् ॥

२। कूर्म्मावतारं स्तौति क्षितिरिति । हे केशव धृतकच्छपरूप गृहीतकूर्म्मदेह जयजय । तव पृष्ठे क्षितिस्तिष्ठति पृथ्वी वसति । कीदृशे पृष्ठे ? अतिविपुलतरे अतिमहत्तम इत्यर्थः । पुनः कथम्भूते ? धरणिधरणकिणचक्रगरिष्ठे धरणीधरणेन भूमिवहनेन यः किणः मृतशोणितं तस्य चक्रं समूहः तेन गरिष्ठे परमोत्कर्षयुक्ते । यद्यपि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वसति दशनशिखरे धरणी तव लग्ना ।
शशिनि कलङ्ककलेव निमग्ना
केशव धृतशूकररूप जय जयदीश हरे ।। ३ ।।

तव करकमलवरे नखमद्भुतश्रृङ्गम् ।
दलितहिरण्यकशिपुतनुभृङ्गम् ।।
केशव धृतनरहरिरूप जय जगदीश हरे ।। ४ ।।

सात्त्वती

धरणीधरणं पूर्वपदेनैव प्राप्तं तथापि किणचक्रगरिष्ठ इत्यनेन सततं धारणं दर्शितम् । अथवा धरणी ध्रियत इत्यनेन धरणीधरणो मन्दरः, तेन सागरमथनेन यः किणः स एव चक्रं चक्राकारत्वात्, तेन गरिष्ठे महोत्कर्षशालिनीत्यर्थः । 'किणः स्यान्मृतशोणित' इति धरणिः ॥

३। वराहावतारं स्तौति । हे केशव धृतशूकररूप गृहीतवराहावतार त्वं जयजय । तव दशनशिखरे दन्ताग्रे धरणी लग्ना सती वसति तिष्ठति । अत्र तदानीन्तनवर्त्त-मानत्वेनैव वसतीति प्रयोगः, चिन्तनेऽपि तद्रूपसाक्षात्कारेण वा । एवमपरत्रापि । कुत्र केशव ? शशिनि चन्द्रे निमग्ना कलङ्कस्य कलेव लेखा इव । चन्द्रखण्डेन दशनस्य साम्यात्तत्र कलङ्कोऽपि स्वल्प एव इति युक्तं कलङ्ककलोपादानम् । एतेन दशनस्याति-महत्वं सूचितम् । शिरोऽग्रं शिखरं प्राहुरद्रिशृङ्गेऽपि तन्मतमि'ति विश्वः ॥

४। नरसिंहावतारं स्तौति । हे केशव धृतनरहरिरूप गृहीतनरसिंहदेह त्वं जयजय । तव करकमलवरे नखमद्भुतम् आश्चर्यजनकं श्रृङ्गमग्रमस्ति । कीदृशं श्रृङ्गम् ? दलित-हिरण्यकशिपुतनुभृङ्गं दलितो विदारितो हिरण्यकशिपोः तनुभृङ्गः शरीरभ्रमरो येन, अत एवाद्भुतम् । अन्यत्र भ्रमरेण कमलाग्रं दल्यते, अत्र तु कमलाग्रेण भ्रमरो दलित इति अद्भुतत्वव्याघातः । जगद्धरादयस्तु तव कमलवरे नखमस्ति । कीदृशम् ? अद्भुत-माश्चर्य्यजनकं श्रृङ्गं यस्येति व्याचक्षते । तम्मते नखस्य कमलाग्रत्वेनानिरूपणात् कमलाग्रेण भृङ्गो दलित इति अद्भुतत्वव्याघातः । श्रृङ्गं प्रभुत्वे शिखरे काले क्रीड़ाम्बुजाग्रके । विषाणोत्कर्षयोश्चापि श्रृङ्गं स्यात् कूर्च्चशीर्षक' इति धरणिः ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

छलयसि विक्रमणे बलिमद्भुतवामन।
पदनखनीरजनितजनपावन।
केशव धृतवामनरूप जय जगदीश हरे॥ ५॥

क्षत्रियरुधिरमये जगदपगतपापम्।
स्नपयसि पयसि शमितभवतापम।
केशव धृतभृगुपतिरूप जय जगदीश हरे॥ ६॥

वितरसि दिक्षु रणे दिक्पतिकमनीयम्।
दशमुखमौलिबलिं रमणीयम्॥
केशव धृतरामशरीर जय जगदीश हरे॥ ७॥

सारवती

५। वामनावतारं स्तौति। हे केशव धृतवामनरूप गृहीतवामनशरीर जयजय। कीदृश? अद्भुतवामन अद्भुतमाश्चर्यजनकं वामनं वामनत्वं यत्र तादृशम्। विक्रमेणेति विक्रमावस्थायां बलिं बलिनामानमसुरराजं छलयसि वञ्चयसि। छलछद्म् गतौ चुरादिः। पुनः कीदृश? पदनखनीरेण गङ्गाजलेन जनितं जनानां पावनं पावित्र्यं चरणनखेन ब्रह्माण्ड-भेदनात् अद्भुतत्वम्। 'खर्व्वो ह्रस्वश्च वामन' इत्यमरः॥

६। परशुरामावतारं स्तौति। हे केशव भृगूणां भृगुवंश्यनां पतिः श्रेष्ठः परशुरामः धृतभृगुपतिरूप गृहीतपरशुरामदेह जयजय। क्षत्रियरुधिरमये राजन्यशोणितविकारे पयसि जले जगत् स्नपयसि स्नानं कारयसि। अपगतपापं विनष्टकलुषं शमितभवतापं नाशितसंसाराध्यात्मिकाधिभौतिकाधिदैविकरूपदुःखत्रयञ्च यथा स्यात्। स्नानेन हि पापता-पोपशान्तिर्भवतीत्युचितमेव। पुरा हि परशुरामः प्रतिज्ञापूरणाय सकलक्षत्रियान् हत्वा तेषां शोणितैः समन्तपञ्चकदेशे पञ्चह्रदान् निर्मितवान्। तत्र जगत् संसारिजातं स्नपय-सीति नन्तस्यार्थः॥

७। श्रीरामावतारं स्तौति। केशव धृतरामशरीर गृहीतरामचन्द्रदेह त्वं जयजय। रणे संग्रामे दशमुखस्य रावणस्य मौलयो मस्तकाः, तत्र बलयः पूजोपहारद्रव्याणीव, तु दिक्षु दशदिक्षु वितरसि ददासि। कीदृशम्? दिक्पतिकमनीयं दिक्पतीनामिन्द्रादीनां कमनीयं वाञ्छनीयम् तेन। तेभ्य एव बलिं ददासीति दर्शितम्। कीदृशम्? रमणीयं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वहसि वपुषि विशदे वसनं जलदाभन् ।
हलहतिभीतिमिलितयमुनाभम् ।।
केशव धृतहलधररूप जय जगदीश हरे ॥ ८ ॥
निन्दसि यज्ञविधेरहह श्रुतिजातम् ।
सदयहृदय दर्शितपशुघातम् ।।
केशवधृतबुद्धशरीर जय जगदीश हरे ॥ ९ ॥
म्लेच्छनिवहनिधने कलयसि करवालम् ।
धूमकेतुमिव किमपि करालम् ।
केशव धृतकल्किशरीर जय जयदीश हरे ।। १० ।।

सारवती

मुकुटाद्यलंकृतत्वात् । अन्योऽप्यभिमतसिद्धये देवताभ्यो वलिं ददातीत्युचितमेव । वितरसीति विपूर्वस्तरतिर्दाने ॥

८। वलभद्रावतारं स्तौति । हे केशव धृतहलधररूप गृहीतवलभद्रदेह त्वं जयजय । विशदे शुभ्रे वपुषि शरीरे वसनं वस्त्रं वहसि धारयसि । कीदृशम् ? जलदाभं जलदस्य मेघस्येव आभा कान्तिर्यस्य तादृशम् । अत्रोपमानमाह—हलहतिभीतिमिलितयमुनाभमिति । लाङ्गलाघातभीत्या मिलितयमुनासदृशमित्यर्थः । शरीरसम्बद्धवस्त्रस्योमेयत्वात् यमुनामात्रस्यैव सादृश्यसम्भवेऽपि पौरुषदर्शनार्थं हलहतिभीतिमिलितेत्युक्तम् । अत्रोपमेयोपमानभावान्न पौनरुक्त्यम् । पुरा हि मधुपानमत्तेन वलभद्रेण यमुना स्नानार्थमाहूता । सा च मत्तोक्तमिति कृत्वा न याता । ततः सकोपेन यमुनाकर्षणं कृतमिति श्रीभागवतम् । 'सदृक् समसदृक्षाभाप्रतीकाशाः समार्थका' इति ॥

९। बुद्धावतारं स्तौति । हे केशव धृतबुद्धशरीर जयजय । हे सदयहृदय करुणामयमानस । तन्मते दयाया एव परमधर्मत्वात् । अहह आश्चर्ये—यज्ञविधेर्यज्ञविधानस्य बोधकं श्रुतिजातं निन्दसि दूषयसि । स्वयमेव वेदं प्रतिपाद्य स्वयमेव बुद्धशरीरेण निन्दसीत्याश्चर्यम् । निन्दायां हेतुगर्भविशेषणमाह— वेदं कीदृशम् ? दर्शितः ज्ञापितोऽग्नीसोमीयं 'पशुमालभेत' इत्यादिना पशुघातो येन एतादृशम् । 'अहहेत्यद्भुते खेद' इत्यमरः ॥

१०। कल्क्यवतारं स्तौति । हे केशव धृतकल्किशरीर गृहीतकल्किदेह त्वं जयजय । म्लेच्छानां यवनादीनां निवहः समूहः, तस्य निधने मरणनिमित्तं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीजयदेवकवेरिदमुदितमुदारम्।
शृणु सुखदं शुभदं भवसारम्॥
केशव धृतदशविधरूप जय जगदीश हरे॥ ११॥

वेदानुद्धरते जगन्ति वहते[S] भूगोलमुद्बिभ्रते
दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान्मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः॥ १२॥

सारवती

धारयसि। 'कलिबलि कामधेनौ निधन' इति। 'निमित्तात् कर्मयोगे' इति सप्तमी। कीदृशम्? धूमकेतुमिव धूमयुक्तौत्पातिकतारकमिव, सकलम्लेच्छमरणहेतुत्वात्। अथवा धूमः केतुः चिह्नं यस्य स वह्निः, तमिव। मुष्टेः सुवर्णनिबद्धप्वात् खड्गस्य श्यामवर्णत्वात्* सधूमवह्निसाम्यम्। 'कौक्षेयको मण्डलाग्रः करवालः कृपाणवत्' इत्यमरः। 'करालो दन्तुरे तुङ्गे भीषणे चाभिधेयव'दिति धरणिः॥

११। गीतान्ते श्रोतारमभिमुखीकुर्वन् कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकम् एकोत्क्या दशावतारं स्तौति। हे केशव! धृतदशविधरूप गृहीतमत्स्यादिदशप्रकारदेह त्वं जयजय। एकारस्तु सर्वत्र गानसाम्यार्थकः। हे वष्णवलीक! श्रीजयदेवकवेरिदमुदितं कथितम् अर्थात्, शृणु। उदारं महद् भगवद्विषयत्वात्, सुखदं श्रुतिमनसोः सुश्राव्यत्वात् सुखप्रदायकम्, शुभदं कल्याणदायकं हरिचरितस्मारकत्वाद्, अत एव भवसारं संसारमध्ये सूत्कृष्टम्। 'मत्स्यः कूर्मो वराहश्च नरसिंहोऽथ वामनः। रामो रामश्च रामश्च बुद्धः कल्की च ते दश॥' इति दशावताराः। 'उदारो दातृमहतोरि'त्यमरः॥

१२। कविरधुना श्लोकेन दशावतारनतिरूपमङ्गलमाचरति। कृष्णाय तुभ्यं नमः अस्तु। कीदृशाय? वेदानुद्धरते रक्षते, जगन्ति प्राणिगणान् वहते, भूगोलं भूमण्डलम् उद्बिभ्रते उत्तोल्य बिभ्रते दैत्यं हिरण्यकशिपुं दारयते विदारयते, बलिं छलयते वञ्चयते, क्षत्रक्षयं राजन्यविनाशं कुर्वते, पौलस्त्यं रावणं जयते विनाशं कुर्वते, हलं कलयते लाङ्गलं धारयते, कारुण्यं दयाम् आतन्वते 'अहिंसा परमो धर्म' इत्यादि-प्रतिपादनेन विस्तारयते, म्लेच्छान् मूर्च्छयते नाशयते। अतएव वेदोद्धरणादिप्रयोजनार्थं

S 'जयन्निवसते' इति पाठ०।
* श्याममयत्वात्' हति पाठ०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीतम्—२

गुर्जरीरागनिःसारतालाभ्यांऽ गीयते ।

श्रितकमलाकुचमण्डल धृतकुण्डल ए।
कलितललितवनमाल जय जयदेव हरे॥ ध्रुवम्॥ १॥

दिनमणिमण्डलमण्डन भवखण्डन ए।
मुनिजनमानसहंस जय जय देव हरे॥ २॥

सारवती

दशाकृतिकृते मत्स्यादिदशावतारान् कुर्वते। कृष्णायेत्यनेन कृष्णस्य प्राधान्यप्रतिपादनेनावतारित्वं मत्स्यादीनामवतारत्वमिति दर्शितम्। तथा च भागवतम्—'एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयमि'ति। केचिदत्र सम्बोधनपदाभावाद् हे कृष्ण आय वासुदेवाय तुभ्यं नमः, 'अकारो वासुदेवः स्यादि'त्येकाक्षरकोषदर्शनाद् व्याचक्षते। 'गोला गोदावरीसख्योः कुलटावत्सयोः स्त्रियाम्। पत्राञ्जने मण्डले च क्लीबमञ्जनके द्वयोः॥ वत्सरार्द्धे च गोलः स्याद्विधवायाः सुतेऽपि चे'ति विश्वः॥

१। गुर्जरीरागः प्रतिमठतालः। रागलक्षणम्—'श्यामा सुकेशी मलयद्रुमाणां मृदूल्लसत्पल्लवतल्पजाता। श्रुतेः सुराणां दधती विभागं तन्त्रीमुखाद्दक्षिणगुर्जरीयम्॥' पुनरपि मङ्गलगीतेन हरिं स्तौति—हे देव स्वप्रकाशकरूप हरे बन्धहारिन्! जय जय, संसारसमुद्रपतितजनोद्धारेण सर्वोत्कृष्टो वर्धस्वेति सर्वत्रान्वितम्। आदरेण वीप्सा, यथा नमो नमस्ते शिवायेत्यादि। ग्रन्थस्य शृङ्गाररसप्राधान्यप्रतिपादनाय प्रथमं शृङ्गारित्वेन हरिं स्तौति श्रितेति। श्रितम् आलिङ्गनमर्दनादिना सेवितं कमलाचमण्डलं लक्ष्म्याः स्तनविम्वं येन। अन्योऽपि द्वादशराजकरूपं मण्डलं सेवत एवेति। पुनः कीदृश? धृतकुण्डल धृते परिधृते कुण्डले येन एतादृश! पुनः कीदृश? कलिता धृता ललिता मनोहरा वनमाला येन एतादृश इति विशेषणद्वयेन नागरवेशो दर्शितः। 'स्रानमण्डलं द्वादशराजकेऽपि देशे च विम्बे च कदम्बके चे'ति विश्वः। 'आपादप्रबलां मालां वनमालेति तां विदुरि'ति शाश्वतः॥

२। मोक्षदायकत्वेन परमात्मस्वरूपं स्तौति। दिनमणिमण्डलं सूर्यविम्बः, तस्य मण्डन अलंकाररूप। मोक्षप्रदो विष्णुः सूर्यमण्डले वसतीति योगिभिश्चिन्त्यते। यदाह—'ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्ट' इत्यादि। पुनः

ऽ '···प्रतिमठतालाभ्याम्' इति पाठ०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कालियविषधरगञ्जन जनरञ्जन ए।
यदुकुलनलिनदिनेश जय जय देव हरे॥ ३॥

मधुमुरनरकविनाशन गरुडासन ए।
सुरकुलकेलिनिदान जय जय देव हरे॥ ४॥

अमलकमलदललोचन भवमोचन ए।
त्रिभुवनभवननिधान जय जय देव हरे॥ ५॥

जनकसुताकृतभूषण जितदूषण ए।
समरशमितदशकण्ठ जय जय देव हरे॥ ६॥

सारवती

कीदृश ? भवखण्डन ध्यायतां संसारदुःखखण्डन, अतएव मुनिजनमानसहंस मुनिजनानां नारदादीनां मानसे हृदये हंस परमात्मरूप। अन्योऽपि हंसो मानसे सरसि वसतीति युक्तरूपकम्। 'हंसो विहङ्गभेदे स्यात्परमात्मनि योगिनी'ति विश्वः॥

३। सर्वलोकोपकारित्वं दर्शयन् कालियदमनरूपिणं स्तौति—हे कालियविषधरगञ्जन जनरञ्जन जनानामानन्ददायक, दुःखनिवारकत्वात्, हे यदुकुलनलिनदिनेश यदोः कुलं यदुकुलम्, तदेव निर्मलत्वात् नलिनमिव, तत्र दिनेश प्रकाशकत्वात् सूर्यवदिति रूपकालंकारः॥

४। अस्मदादिविघ्ननिवारणे ईषत्करत्वं सूचयन् मधुमुनुरनरकविनाशं स्तौति—हे मधुमुरनरकविनाशन! मधुश्च मुरश्च नरकश्चेति मधुमुरनरकाः, तेषां विनाशन घातक। तेषां बिनाशे सामग्रीमाह—गरुडासनः गरुडः पक्षिराजः आसनं वाहनं यस्य तादृश। गरुडमारुह्य तान् हतवान् इत्यर्थः। अतएव सुरकुलकेलिनिदान सुराणां देवानां कुलं समूहः, तस्य केलिः हासपरिहासादिः, तस्य निदान आदिकारण। द्रवकेलिपरीहासाः क्रीड़ा खेला च नर्म चे'त्यमरः। 'निदानन्त्वादिकारणमि'ति च॥

५। विश्वम्भररूपिणं स्तौति—हे अमलकमलदललोचन निर्मलपद्मपत्राक्ष। हे भवमोचन भवस्य जन्मनः मोचन नाशन! त्रयाणां भुवनानां समाहारः त्रिभुवनम्, तदेव भवनं विविधजनाश्रयत्वाद् गृहमिव। तस्य निधानम् आश्रयः। अथवा तत्र निधानं निधिमिव आनन्दजनकत्वादिति केचित्। 'निधानं निधिरूपे स्यान्निवासे स्नानपानयोः'॥

६। श्रीरामचन्द्ररूपिणं स्तौति—हे जनकसुताकृतभूषण जनकसुतायाः कृतं भूषणम् अलंकरणं येन, जनकसुतया वा कृतं भूषणं यस्य। पुनः कीदृश ? जितदूषण जितो दूषणनामा राक्षसो येन निष्पापेति वा। अपि किम्भूत ? समरशमितदशकण्ठ समरे युद्धे शमितो मारितो दशकण्ठो रावणो येन॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभिनवजलधरसुन्दर धृतमन्दर ए।
श्रीमुखचन्द्रचकोर जय जय देव हरे ॥ ७ ॥

तव चरणे प्रणता वयमिति भावय ए।
कुरु कुशलं प्रणतेषु जय जय देव हरे ॥ ८ ॥

श्रीजयदेवकवेरिदं कुरुते मुदम् ए।
मङ्गलमुज्ज्वलगीति जय जय देव हरे ॥ ९ ॥

पद्मापयोधरतटोपरिरम्भलग्न—
काश्मीरमुद्रितमुरो मधुसूदनस्य।
व्यक्तानुरागमिव खेलदनङ्गखेद—
स्वेदाम्बुपूरमनुपूरयतु प्रियं वः ॥ १० ।

सारवती

७ क्षीरोदमथनरूपिणं स्तौति—हे अभिनवजलधरसुन्दर नवीनमेघवन्मनोहर ! कीदृश ? धृतमन्दर क्षीरोदमथने धृतो मन्दरनामा गिरिवरो येन। अपि किम्भूत ? श्रीमुख-चन्द्रचकोर। पक्षिविशेषः चकोरोऽपि चन्द्रज्योत्स्नामृतं पिबति, तद्वत् कृष्णोऽपीति भावः ॥

९। श्रीजयदेवकवेरिदं मङ्गलसहितं गीतं मुदं कुरुते, अर्थाद् गायतां शृण्वतां च। कीदृशम् ? उज्ज्वलगीति उज्ज्वला दोषरहिता गीनिर्गानं यस्य तदुज्ज्वलगीति। दोषान् आह च—'शङ्कितं भीतवद्‌घुष्टमव्यक्तमनुनासिकम्। काकस्वरि शिरस्कम्पि तथा ताल-विवर्जितम ॥ विस्वरं[s] विरलञ्चैव विश्लिष्टं विरलाक्षरम्। व्याकुलं तालहीनञ्च गानदोषाश्चतुर्दश ॥'

१०। गीतान्ते लोकानामाशिषमाह—मधुसूदनस्य उरो वक्षःस्थलं कर्त्तृ वो युस्माकं प्रियम् अभीष्टम् अनुपूरयतु पूर्णं करोतु। अनुशब्दो धात्वर्थमेव द्रढयतीति भगीरथः। कीदृशं वक्षः ? पद्मायाः लक्ष्म्याः पयोधरयोः स्तनयोस्तटो परिसरः, तस्य परिरम्भेण आलिङ्गनेन लग्नं यत् काश्मीरं कुङ्कुमं तेन मुद्रितं चिह्नितम्। ममैवेदमुरो मुरारेर्नान्यस्येति कृत्वा लक्ष्म्या मुद्रितमिति भावः। पुनः कीदृशम् ? खेलता क्रीडता अनङ्गेन कामेन हेतुना यः खेदः सुरतश्रमः तेन स्वेदाम्बुपूरो धर्मजलप्रवाहो यत्र। अन्यत्रापि जलपूरवता अपूर्णं पूरणमुचितमेव। अत्र श्लोके उत्प्रेक्षालंकारः। यथा दण्डी—'अन्यथैव स्थिता

s. 'अस्वरम्' इति पाठ०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वसन्ते वासन्तीकुसुमसुकुमारैरवयवै—
भ्रमन्ती कान्तारे बहुविहितकृष्णानुसरणाम्।
अमन्दं कन्दर्पज्वरजनितचिन्ताकुलतया
बलद्बाधां+ राधां सरसमिदमूचे सहचरी ॥ १ ॥

सारवती

वृत्तिश्चेतनस्येतरस्य वा। अन्यथोत्प्रेक्ष्यते यत्र तामुत्प्रेक्षाम्विदुर्बुधाः।' 'पूरो जलप्रवाहे स्यात् प्राणसंशुद्धिराद्ययोरि'ति* विश्वः॥

१। कविरधुना कृष्णस्य वसन्तवनविहारवर्णनमारभमाणस्तत्प्रसङ्गमवतारयति। काचित् सहचरी सखी सरसं सविलासं शृङ्गाररससहितं वा यथा स्यात्तथेदं वक्ष्यमाणं वाक्यं राधामूचे उक्तवती। किम्भूतां राधाम्? अमन्दं यथा स्यात्तथा कन्दर्पज्वरेण कामजनितसन्तापेन जनिता चासौ चिन्ता चेति सा तथा, तया आकुलतया वैयग्र्यविशेषेण बलन्ती प्रकाशमाना बाधा पीड़ा यस्यास्ताम्। भगीरथादयस्तु आकुलतया दुःखेन बलन्ती वर्धमाना बाधा पीड़ा यस्या इति व्याचक्षते। तत्तु पौनरुक्त्या उपेक्षितम्। पुनः किम्भूताम्? वासन्तीकुसुमसुकुमारैरवयवैर्लक्षिताम्। इत्थम्भूतलक्षणे तृतीया। पुनः किम्भूताम्? बहुविहितकृष्णानुसरणाम्। पुनः कीदृशीम्? वसन्ते कान्तारे दुर्गमवर्त्मनि भ्रमन्तीम्। अत्र हरिविरहाकुलाया राधाया वसन्तसमये कान्तारभ्रमणेनातिदुष्कर-कारित्वं दर्शितम्। वासन्ती माधवीलते'त्यमरः॥

+ 'चलद्बाधामि'ति पाठान्तरं रसमञ्जर्यां टीकायां दृश्यते। निर्णयसागरयात्रालयमुद्रित-पुस्तके मूले 'बलद्बाधामि'ति पाठः। तथा रसिकप्रियायां टीकायामपि।

* '...संशुद्धिचाद्ययोः' इति पाठ०। मेदिन्यां तु 'पूरो जलसमूहे स्याद् व्रणसंशुद्धिखाद्ययोरि'ति पठ्यते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीतम् — २

वसन्तरागयतितालाभ्यां+ गीयते।

ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे।
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे।
विहरति हरिरिह सरसवसन्ते
नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते* ।। ध्रुवम् ।। २ ।।

सारवती

२। वसन्तरागः। रूपकतालः। रागलक्षणम्—शिखण्डिबर्होच्चयबद्धचूडः पुष्णन् पिकं चूतलतांकुरेण। भ्रमन्मुदा वाममनङ्गमूर्त्तिर्मतङ्गमत्तः स वसन्तरागः[S] ।।' सरसमिदमूचे सहचरीति यदुक्तं तत् कथयति—हे सखि राधिके! इह सरसे लोकानुरागसहिते वसन्ते मधुसमये युवतिजनेन समं हरिर्विहरति क्रीडति नृत्यति च। यद्वा वसन्ते मधुसमये विहरति सति हरिः युवतिजनेन समं नृत्यतीति योज्यम्। कीदृशे वसन्ते? विरहिजनस्य दुरन्ते भगवद्विश्लिष्टस्य जनस्य दुरन्ते, दुःखेनान्तो यस्य एतादृशे। पुनः कीदृशे? ललिताया लवङ्गलतायाः परिशीलनेन सम्बन्धेन कोमलो मृदुः मलयसमीरो यत्र एतादृशे। अत्र स्वभावात् मन्दगतेर्वायोः लवङ्गतापरिशीलनं न तु लवङ्गलतापरिशीलनेन मान्द्यम्. तथापि लवङ्गलताऽत्र नायिकात्वेन निरूपिता, मलयसमीरश्च नायकत्वेन निरूपित इति नायिकासम्बन्धेन नायकस्य मृदुत्वं सूचितमेवेति उत्प्रेक्षालङ्कारः। तथा चोक्तम्—'अन्यथैव स्थिता वृत्तिश्चेतनस्येतरस्य च। अन्यथोत्प्रक्ष्यते यत्र तामुत्प्रेक्षाम्विदुर्बुधाः।।' अत्र लवङ्गलतासम्पर्केण मन्दत्वप्रतिपादनेन अर्थवशप्राप्ततद्वनोद्भूतपुष्पादिसम्पर्केण शीतलत्वसुरभित्वप्रतिपादनेन वायोस्त्रैगुण्यं वर्णितम्। पुनः किम्भूते? मधुकराणां निकरः समूहः, तेन करम्बितो मिश्रितश्चासौ कोकिलश्चेति मधुकरनिकरकरम्बितकोकिलः, तेन कूजितः शब्दायमानः कुञ्ज एव कुटीरोऽल्पकुटी यत्र। 'अल्पा कुटी कुटीरः स्यात् मिश्रितेऽपि करम्बित' इति शाश्वतः ।।

+ 'रूपक-तालाभ्याम्' इति पाठः।

* निर्णयसागरयात्रालयमुद्रितपुस्तके अस्य श्लोकस्य तृतीयचरणे 'वसन्ते नृत्यति' इति पाठोऽस्ति। चतुर्थचरणे 'युवतिजनेन सममि'ति पाठः। तादृक्पाठो रसिकप्रियायां टीकायामपि। किन्तु रसमञ्जर्यां टीकायामस्य श्लोकस्य चतुर्थचरणे 'युवतिजनेन' इति पाठो विद्यते।

S '......मूर्त्तिर्मतो मतङ्गस्य वसन्तरागः' इति पाठः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उन्मदमनदनमनोरथपथिक-
वधूजनजनितविलापे ।
अलिकुलशङ्कुलकुसुमसमूह—
निराकुलवकुलकलापे ॥ विहरति० ॥ ३ ॥

मृगमदसौरभरभसवशम्बद—
नवदलमालतमाले ।
युवजनहृदयविदारणमनसिज—
नखरुचिकिंशुकजाले ॥ विहरति० ॥ ४ ॥

सारवती

३। पुनः कीदृशे वसन्ते तत्राह—उद्गतौ मदमदनौ हर्षकामौ यत्र एवम्भूतो मनोरथोऽभिलाषो यस्य स उन्मदमदनमनोरथः, स चासौ पथिकवधूजनश्चेति, तेन जनितः विलापः परिदेवनं यत्र। 'विलापः परिदेवनमि'त्यमरः। पुन किम्भूते ? अलीनां कुलं समूहस्तेन सङ्कुलो व्याप्तो यः कुसुमसमूहः तेन निराकुलो वायुकृतचलनादिव्याकुलता-रहितो वकुलकलापो वकुलवृक्षसमूहो यत्र। अत्र निश्चलत्वेन तादृङ्मधुपसमावेशो येन* पवनस्यापि नागमनमित्युक्तिरलङ्कारः। जगद्धरादयस्तु अलिकुलसंकुलकुसुममूहेन निःशेषेण आकुलोऽस्तव्यस्तो वकुलकलापो यत्रे'ति व्याचक्षते। तत्तु निराकुलशब्दस्याऽतिव्याकुलता-यामप्रयोगादुपेक्षितम्। 'संकुलं त्रिषु विस्पष्टवाचि व्याप्ते च मस्तके।' 'कलापः संहतौ वर्हे काञ्च्यां भूषणतूणयोरि'ति ॥

४। पुनः कीदृशे वसन्ते ? मृगमदः कस्तूरी, तस्य सौरभम्, तस्य रभसः प्रवाहः प्रसरणमिति यावत्, तत्र वशम्वदा आयत्ता नवदलमाला यस्य एतादृशः तमालः तापिच्छ-वृक्षो यत्र। तमालदलस्य गन्धः कस्तूरीसदृश इति प्रसिद्धिः। 'वशम्वदः स्यादायत्ते चाटुकारेऽभिधेयवत्।' 'उत्साहसहितवेगे प्रवाहे रभसोऽर्थवदि'ति। अपि किम्भूते ? युव-जनानां विरहितरुणानां हृदयं विदारयतीति युवजनहृदयविदारणः। नद्यादित्वाद्यः। एतादृशो यो मनसिजः तस्य नखरुचिरिव रुचिर्यस्य एवम्भूतं किंशुकजालं पलाशकुसुमं वृन्दं यत्र एवम्भूते। पलाशकुसुमानां रक्तत्वादरुणत्वाच्च हृदयविदारकमनसिजनखसाम्यम्। 'जालमालयवृन्दयोरि'ति ॥

---

* 'यत्र' इति पाठ०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मदनमहीपतिकनकदण्डरुचि—
केशरकुसुमविकाशे।
मिलितशिलीमुखपाटलिपटल-
कृतस्मरतूणविलासे ॥ विहरति ॥ ५ ॥

विगलितलज्जितजगदवलोकन—
तरुण×करुणकृतहासे।
विरहिनिकृन्तनकुन्तमुखाकृति –
केतकि+दन्तुरिताशे ॥ विहरति ॥ ६ ॥

सारवती

५। पुनः किम्भूते वसन्ते तत्राह—कनकस्य दण्डो यत्र सम्भवतितत् कनकदण्डच्छत्रम्, मदन एव महीपतिः मदनमहीपतिः। मदनमहीपतिकनकदण्डस्येव रुचिर्यस्य एतादृशः केशरकुसुमानां विकाशः प्रकाशो यत्र। यद्वा मदनमहीपतिकनकदण्डरुचि, तत् केशर-कुसुमं नागकेशरकुसमञ्चेति, तद्विकाशयतीति कर्मण्यण्, एतादृशे। पुनः किम्भूते? मिलिताः सङ्गताः शिलीमुखाः भ्रमराः येषु तैः पाटलिपाटलैः पाटलिपुष्पसमूहैः कृतो विहितः स्मरतूणविलासः कामतूणीरचेष्टितं यत्र एतादृशे। अन्यत्रापि तूणीरे शिलीमुखाः स्थाप्यन्त इति परस्पररूपकम्। 'अलिबाणौ शिलीमुखौ' इत्यमरः॥

६। पुनः किम्भूते वसन्ते तत्राह—लज्जितं लज्जा, भावे क्तः। विगलितज्जितस्य जगतोऽवलोकनेन तरुणकरुणैः कुसुमैः कृतो हासो येन तस्मिन्। तथा च तादृशं जगदवलोक्य करुणकुसुमव्याजेन वसन्तो हसतीत्युत्प्रेक्षालंकार:। 'करुणः सदृशे वृक्षे कृपायां करुणा मता।' पुन कीदृशे वसन्ते? विरहिणां प्रियवियुक्तजनानां निकृन्तनाय छेदनाय कुन्तोऽस्त्रविशेषः, तस्य मुखम् अग्रभागः। तस्याकृतिरिवाकृति-र्यस्य तत् कुन्तमुखाकृति। तत् केतककुसुमञ्चेति तत् कुन्तमुखाकृतिकेतककुसुमम्। तेन दन्तुरिता व्याप्ता आशा दिशो येन तस्मिन्। तथा च ऋतुराजेन वसन्तेनैव विरहिणां प्रियजनपरित्यागापराधभागिनां निकृन्तनार्थं दिशि दिशि केतककुसुमानि स्थापितानीत्युत्प्रेक्षालंकारः। साम्प्रदायिकास्तु विरहिणां निकृन्तनम् छेदनं कर्तरि अनट्,

---

× अवलोकितकरुण' इति पाठान्तरम्।

+ निर्णयसागरयात्रालयमुद्रितपुस्तके मूले 'पाटलपटले'ति पाठोऽस्ति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

माधविकापरिमलललिते
नवमालिकजाति[S]सुगन्धौ ।
मुनिमनसामपि मोहनकारिणि
तरुणाकारणबन्धौ ॥ विहरति० ॥ ७ ॥

स्फुरदतिमुक्तलतापरिरम्भणमुकुलितपुलकितचूते ।
वृन्दावनविपिने परिसरपरिगतयमुनाजलपूते ॥ विहरति० ॥ ८ ॥

श्रीजयदेवभणितमिदमुदयति हरिचरणस्मृतिसारम् ।
सरसवन्तसमयवनवर्णनमनुगतमदनविकारम् ॥ विहरति० ॥ ९ ॥

सारवती

विरहिनिकृन्तनञ्च तत् कुन्तमुखाकृति चेति तत्तथा, तादृशं यत् केतककुसुमं तेन दन्तुरिता उन्नता इव दिशो यत्रेति व्याचक्षते । 'निम्नोन्नते तथा व्याप्ते दन्तुरं कथ्यते बुधैरि'ति धरणिः ॥

७। पुनः किम्भूते वसन्ते तत्राह । माधविकायाः वासन्त्याः परिमलेन गन्धेन ललिते मनोहरे । अपि किम्भूते ? नवमालिकया नूतनमालिकापुष्पविशेषेणातिसुगन्धौ शोभनगन्धयुक्ते । अपि किम्भूते ? मुनिमनसामपि मननशीलमहाजनचित्तानामपि मोहनकारिणि मोहजनके । अपिशब्देनान्यजनचित्तोन्मादकत्वमीषत्करमिति दर्शितम् । तरुणानां यूनामकारणबन्धौ सहजमित्रे । मानिनिजनमनोभञ्जकत्वेन यूनामभिमतकारित्वात् परमप्रीतिदायकत्वाच्च वसन्तो बन्धुत्वेन निरूपित इति । 'विमर्दोत्थे परिमलो गन्धे जनमनोहर' इत्यमरः ॥

८। पुनः किम्भूते वसन्ते तत्राह । स्फुरन्त्याः शोभमानायाः अतिमुक्तलतायाः परिरम्भणेन आलिङ्गनेन मुकुल एव मुकुलितम्, तेन पुलकितश्चूतो यत्र । अत्र वासन्तीलता नायिकात्वेन निरूपिता । तस्याः परिरम्भणेन नायकत्वेन निरूपितचूतवृक्षस्याचेतनस्यापि पुलकोद्गम इति दर्शयता वसन्तस्याधिक्यं दर्शितम् । कुत्र विहरतीति स्थानमाह— वृन्दावनविपिने वृन्दावननाम्नि वने । कीदृशे वने ? परिसरं पर्यन्तभुवं परि सर्वतोभावेन गतेन यमुनाजलेन पूते पवित्रे । एतेन स्थानस्य विहारयोग्यत्वं दर्शितम् । 'पर्यन्तभूः परिसर' इत्यमरः ॥

९। कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकमुपसंहरति । श्रीजयदेवभणितं कर्त्तृ, उदयति

S निर्णयसागरयात्रालयमुद्रितपुस्तके 'मालति जाति' इति पाठो वर्तते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दरविदलित+मल्लीवल्लिचञ्चत्परागS—
प्रकटितपटवासैर्वासयन् काननानि।
इह हि दहति चेतः केतकीगन्धबन्धुः
प्रसरदसमबाणप्राणवद्गन्धवाहः ॥ १० ॥

सारवती

अभ्युदितं भवति। किम्भूतम्? हरेश्चरणं चर्याचरित्रमिति यावत्, तस्य च स्मृत्या सारम् उत्कृष्टमित्यर्थः। न तु चरणपदं प्रकृतपादपरम्, अनेन गीतेन तस्यावर्णनात्। अपि किम्भूतम्? सरसं काव्यरससहितं वसन्तसमयस्य वनानां वर्णनञ्च यत्र, अत एवानुगत आयत्तो मदनविकारो यस्य एतादृशम्। अतिसरसप्रकृतगीतश्रवणेन सहसैव जनानां विकारो भवतीति भावः। 'चरणः पुंसि पादे स्यात् क्लीवं सेवाचरित्रयोः ।।

१०। उत्कण्ठिता राधा सखीमाह। हि जानीहीत्यर्थे। हे सखि! जानीहि इह वसन्ते यमुनातीरे वा गन्धवाहो वायुः चेतो दहति। किं कुर्वन्? काननानि वनानि वासयन् सुरभीकुर्वन्। कैः? दरविदलितमल्लीवल्लिचञ्चत्परागप्रकटितपटवासैः। मल्ली मल्लिकापुष्पम्, दरविदलितायाः ईषद्विकसिताया मल्ल्या मल्लिकायाः वल्लीषु लतासु चञ्चदुद्गच्छन् यः परागः स एव प्रकटितो व्यक्तीभूतः पटवासः सुगन्धिचूर्ण-द्रव्यविशेषः, तैः। अत्र मल्लिकावल्ली नायिका, वायुर्नायकः। तथा चान्योऽपि नायको नायिकाङ्गसङ्गिपटवासेन* स्वसञ्चारदेशं वासयतीत्युचितमेव। पुनः किम्भूतः? केतकी-गन्धस्य बन्धुः, सहचरत्वाद् बन्धुरिव। पुनः किम्भूतः? प्रसरतो विश्वं व्याप्नुवतः असमबाणस्य कामस्य प्राणवत् प्राणसदृश इत्यर्थः। यद्वा प्रसरताऽसमबाणेन कामेन प्राणवत् सामर्थ्यसहितं यथा स्यादिति क्रियाविशेषणतया योज्यम्। अत्र यमुनातीर-सम्बन्धेन शैत्यं परागचालनेन मान्द्यं केतकीगन्धबन्धुत्वेन सुगन्धित्वञ्च दर्शयता वायोस्त्रैगुण्यं वर्णितम्। 'ईषदर्थे दराव्ययमि'त्यमरः। 'पटवासे गन्धचूर्णे वस्त्राणां निस्वनेऽपि चे'ति ।।

\+ रसमञ्जर्यां टीकायां 'विगलित' इति पाठः।

S निर्णयसागरयन्त्रालयमुद्रितपुस्तके 'वल्लिचञ्चत्परागे'त्यत्र 'मल्लिचञ्चत्परागे'ति पाठः।

* 'नायिकाङ्गसंसर्गिपटवासेन' इति पाठः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर—
क्रीडत्कोकिलकाकलीकलकलै+रुद्गीर्णकर्णज्वराः ।
नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण—
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥ ११ ॥

ऽनित्योत्सङ्गवसद्भुजङ्गकवलक्लेशादिवेशाचलं
प्रालेयप्लवनेच्छयानुसरति श्रीखण्डशैलानिलः ।
किञ्च स्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदया—
दुन्मीलन्ति कुहूकुहूरिति कलोत्तालाः पिकानां गिरः ॥ १२ ॥

सारवती

११। राधैव पुनः स्वदुःखानुभवेन परदुःखम् अवधार्य वितर्कयति। पथिकैः प्रियाविरहिणैरमी वासराः वसन्तदिवसाः कथं कथमपि कष्टसृष्टया नीयन्ते। केनावलम्बनेनेत्याह—ध्यानं चिन्तनं तत्रावधानम्, एकचित्तता, तया क्षणप्राप्तः स्वल्पकालमनुभूतः प्राणसमायाः प्राणतुल्यायाः यः समागमरसः सम्बन्धरूपो रसस्तज्जनितैरुल्लासैरानन्दैरित्यर्थः। अत्र यद्यपि उल्लासैः कथं कथमपि नीयन्त इत्यन्वितम्, तथापि स्वल्पकालानुभूतप्राणसमासम्बन्धजनितः उल्लासोऽपि न चिरस्थायीति नैकान्तं दुःखमिति नीयन्त इत्युक्तम्। नापि सुखमैकान्तिकमिति कष्टसृष्टयेत्युक्तमिति बोद्धव्यम्। दुर्णयतां प्रति हेतुमाह—कीदृशा वासराः ? उन्मीलन्मधुगन्धैः मुग्धैः सतृष्णैर्भ्रमरैः व्याधूतेषु चालितेषु चूताङ्कुरेषु क्रीडतां कोकिलानां काकलीकलकलैः सूक्ष्माव्यक्तमधुरकोलाहलैरुद्गीर्णः प्रकाशितः कर्णज्वरः श्रवणोपतापो येषु वासरेषु तत्तथा। कलकलैरुद्गीर्णकर्णज्वरैरिति पाठे करणतया पृथक् योज्यमिति। 'काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे' 'कोलाहलः कलकल' इत्यमरः॥

१२। एतत्समयस्य केलियोग्यत्वं दर्शयति। अद्य एतदहनि श्रीखण्डशैलानिलो मलयपर्वतगन्धवाहः ईशाचलं ईशो महादेवस्तस्याचलं पर्वतं कैलासमनुसरति अनु लक्ष्यीकृत्य सरति गच्छति। अत्रोत्प्रेक्षते कविः—उत्सङ्गे क्रोडेऽर्थात् पर्वतस्य, वसन्तो

+ निर्णयसागरयात्रालयमुद्रितपुस्तके 'कलरवैरि'ति पाठोऽस्ति। तथा रसिकप्रियायां टीकायामपि। किन्तु रसमञ्जर्यां टीकायां 'कलकलैरि'त्येव पाठो विद्यते।

ऽ 'अद्योत्सङ्ग' इति पाठ०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सटीक-गीतगोविन्दम् ।

अनेकनारीपरिरम्भसम्भ्रमस्फुरन्मनोहारिविलासलालसम् ।
मुरारिमारादुपदर्शयन्त्यसौ सखी समक्षं पुनराह राधिकाम् ॥ १ ॥

सारवती

ये भुजङ्गाः । क्वचिच्चात्रोत्सङ्गवसदित्येव पाठः । अत्र शब्दार्थ एव सोऽर्थः । तेषां कवलक्लेशात् ग्रासदुःखात् प्रालेयप्लवनेच्छया हिमावगाहनेच्छयैव । यद्वा ल्यबलोपे पञ्चमी । तादृशं क्लेशं प्राप्येत्यर्थः । अत्र विषज्वालाभिभूतेन महेशेनापि स एवाश्रित इत्यन्येषामपि विशेषणाभिभूतानां तदाश्रयणमुचितमिति दर्शयितुम् ईशाचलपदेनोपन्यासः । पुनस्तदेव दर्शयति—किञ्चेति, अन्यच्चेत्यर्थः । हर्षोदयादानन्दोदयात् पिकानां गिरो वाचः उन्मीलन्ति । गिरः किम्भूताः ? कलोत्तानाः कला मधुराः, उद्गतः तालो यासां ता उत्तानाः, ततश्च कर्मधारयः । क्वचिच्च कलोत्तालाः इति पाठः । तत्र कलेन माधुर्येण उद्गतस्तालो रागध्वनिर्यासां ताः । तदाह— सप्तस्वरास्त्रयो ग्रामाः मूर्च्छनास्त्वेकविंशतिः । द्वाविंशतिश्च श्रुतयः तालाः पञ्चाशदूनकाः ॥' 'पुष्पसाधारणे काले कोकिलो रौति पञ्चमम्" । स्निग्धरसालमौलिमुकुलान्यालोक्य स्थितानाम्' इत्यध्याहार्यम्, कुहुःसामानाधिकरण्यप्रतिपादकत्वाद् गिरामचेतनत्वेन दर्शनाधिकरणत्वात् । वस्तुतस्तु तादृशमुकुलान्यालोक्य हर्षोदयादित्येवं योज्यम । तथा चालोकनहर्षोदययोः सामानाधिकरण्यं वर्तत एव, नानुपपत्तिगन्धोऽपीति ॥

१। यया सख्या ललितलवङ्गेति गीतेन पूर्वं राधा रोधिता, सैव पुनराहेति दर्शयति । असौ सखी पुनरिदं गीतेन वक्ष्यमाणं राधिकामाह गदितवती । कीदृशी ? आरात् समीपे समक्षं प्रत्यक्षं मुरारिं कृष्णम् उपदर्शयन्ती अङ्गुल्या दर्शयन्ती । कीदृशं मुरारिम् ? अनेकानां नारीणां परिरम्भ आलिङ्गनम्, तत्र यः सम्भ्रमः तेन स्फुरन् व्यक्तीभवन् मनोहारी चिताकर्षी यो विलासः तत्र लालसम् उत्तरोत्तरं सतृष्णमित्यर्थः । 'सम्भ्रमं त्रयमिच्छन्ति भयमुद्वेगमादरमि'ति विश्वः । लीलेष्टजनचेष्टानुकरणं सुष्ठुभाषया । 'विशेषालापनङ्क्षिश्चिद्विलासः सद्भिरुच्यतं इति भावलता । रामकरीरागः[S] । रूपकतालः[*] । रागलक्षणम्—'स्वर्णप्रभा भास्वरभूषणा च नीलं निचोलं सुतनौ वहन्ती । कान्ते पदोपान्तमधिश्रितेऽपि मानोन्नता रामकरी प्रदिष्टा ॥'

S 'रामकरिरागः' इति पाठ० ।
* यतितालः इति पाठ० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीतम् – ४

रामकरीरागरूपकतालाभ्यां गीयते।

चन्दनचर्च्चितनीलकलेवरपीतवसनवनमाली।
केलिचलन्मणिकुण्डलमण्डितगण्डयुगस्मितशाली
हरिरिह मुग्धवधूनिकरे विलासिनि! विलसति केलिपरे ॥ध्रुवम् ॥२॥

पीनपयोधरभारभरेण हरिं परिरभ्य सरागम्।
गोपवधूरनुगायति काचिदुदञ्चितपञ्चमरागम् ॥ हरिरिह० ॥ ३ ॥

कापि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले।
चारु चुचुम्ब+नितम्बवती दयितं पुलकैरनुकूले ॥ हरिरिह० ॥ ४ ॥

सारवती

२। सखी राधामाहेति यदुक्तन्तदाह—हे विलासिनि श्रृङ्गारभावजनितविकारवति* राधे! इह मुग्धवधूनिकरे मनोहरवधूसमूहे हरिर्विहरति क्रीडति। वधूनिकरे किम्भूते? केलिपरे क्रीडापरायणे। हरिः किम्भूतः? चन्दनेत चर्च्चितमनुलिप्तं नीलं कलेवरं यस्य स तथा, पीतं वसनं यस्य स तथा। वनमाला अस्यास्तीति स वनमाली। अत्र प्रत्येकं कर्मधारयः। पुन किम्भूतः? केलिः कीडा, तया चलता मणिकुण्डलेन मण्डितं गण्डयुगं यस्य स तथा। केलिचलन्मणिकुण्डलश्चासौ स्मितशाली चेति कर्मधारयः। तदनेन श्रृङ्गारिवेशो दर्शितः॥

३। तासां केलिपरत्वमेव दर्शयति। काचिद् गोपवधूः पीनयोधरभारभरेण भारातिशयेन सरागं सानुरागं यथा स्यादेवं हरिं परिरभ्यालिग्य उदञ्चितपञ्चमरागम् उद्गतपञ्चमरागं यथा स्यादेवमनुगायति कृष्णगानानुगानं करोति। 'अतिशयो भर इत्य'मरः॥

४। पुनस्तदेव दर्शयति। कापि सखी जनहास्यभीतापि संश्लेषमिच्छती नितम्बवती किमपि यदेव तदेव लपितुं श्रुतिमूले कर्णमूले मिलिता सङ्गता पुलकैः रोमाञ्चैरनुकूले सङ्गमजसात्त्विकभावभाजि कपोलतले दयितं चारु शोभनं यथा स्यादेवं चुचुम्ब। 'स्वरूपा-

---

+ निर्णयसागरयात्रालयमुद्रितपुस्तके मूले 'कापि चुचुम्ब'इति पाठः।
*'विकाशवति' इति पाठ०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कापि विलासविलोलविलोचनखेलनजनितमनोजम् ।
ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजम् ॥ हरिरिह० ॥ ५ ॥

केलिकलाकुतुकेन च काचिदमुं यमुनाजलकूले ।
मञ्जुलवञ्जुलकुञ्जगतं विचकर्ष करेण दुकूले ॥ हरिरिह० ॥ ६ ॥

करतलतालतरलवलयावलिकलितस्वनवंशे ।
रासरसे सहनृत्यपरा हरिणा युवतिः प्रशंससे ॥ हरिरिह० ॥ ७ ॥

सारवती-३

धारयोस्तुलमि'ति विश्वः। तथा च सव्याजं मिलिता मिलनजातभावभाजि कपोले चुचुम्बेति वाक्यार्थः॥

५। पुनः क्रीडापरत्वमेव दर्शयति। कापि भावजनिताश्रुभरेण दर्शनमलभमाना मुग्धवधूः मनोहरवधूरधिकमत्यर्थं यथा स्यादेवं मधुसूदनस्य वदनसरोजं श्रीकृष्णाननपद्मं ध्यायति चिन्तयति। कीदृशम् ? विलासे विलोलविलोचनस्य खेलनेन तादृक्कटाक्षादिनाऽ जनित उत्पादितो मनोजः कामो येन तत्तथा॥

६। पुनस्तदेव दर्शयति। काचिद्दृष्टा यमुनाजलकूले यमुनाजलसमीपे केलिकला-कुतुकेन क्रीडाकलाकौतुकेन मञ्जुलो मनोहरो वञ्जुलो यत्र कुञ्जे तत्र गतम्। अनेन देशस्य क्रीडायोग्यत्वमादर्शितम्। अमुं श्रीकृष्णं दुकूले पट्टवस्त्रे करेण विचकर्ष आकृष्टवती। क्वचिद् यमुनावनकूल इति पाठः। तत्र कालिन्द्युपलक्षितविपिनसमीप इत्यर्थः। 'वञ्जुलो वकुले ख्यातो वञ्जुलो वेतसे मत' इति धरणिः। 'दुकूलं पट्टवाससी'त्यपि। वनं काननतोययोरि'त्यपि धरणिरेव॥

७। पुनस्तदेव दर्शयति। रासरसे गोपक्रीडारसे सहनृत्यपरा सहैव नृत्यन्ती युवतिः हरिणा कृष्णेन प्रशंससे प्रशंसिता। कीदृशे रासरसे ? करतलयोर्हस्ततलयोस्तालेन चपेटध्वनिना तरला चञ्चला या वलयावलिः तया कलितः सम्बद्धः कलस्वनवंशोऽव्यक्तमधुरशब्दवेणुर्यत्र। 'तलश्चपेटतालश्चे'ति शाश्वतः। 'रासः कोलाहलध्वाने क्रीडायामपि गोदुहामि'ति विश्वः।

ऽ. 'विलासेन विलोलं विलोचनम्, तस्य खेलनेन तादृक्कटाक्षादिना' इत्यादि पाठ०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लिष्यति कामपि चुम्बति कामपि कामपि रमयति रामाम् ।
पश्यति सस्मितचारुतरामपरामनुगच्छति वामाम् ॥ हरिरिह० ॥ ८ ॥

श्रीजयदेवभणितमिदमद्भुत+केशवकेलिरहस्यम् ।
विपिनविनोदकलावलितं*वितनोतु शुभानि वतय यशस्यम् ॥ हरिरिह० ॥ ९ ॥

विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवर—
श्रेणीश्यामलकोमलैरुपनयन्नङ्गैरनङ्गोत्सवम् ।
स्वच्छन्दं व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः
शृङ्गारः सखि मूर्त्तिमानिव मधौ मुग्धो हरिः क्रीड़ति ॥ १० ॥

सारवती

८। कृष्णस्य शठनायकत्वं दर्शयन् चित्रविलासमाह§। कामपि आश्लेषमिच्छन्तीमाभीरनारीं श्लिष्यति आलिङ्गति। कामपि चुम्बनार्थिनीं चुम्बति। चुबि वक्त्रसंयोगे धातुः। कामपि रतार्थिनीं रामां रमयति क्रीड़ां प्रापयति। स्मितेन चारु शोभनं यथा स्यादेवमपरान्तरामत्यर्थेन पश्यति। इत्याद्यसहमानामोर्ष्यया गच्छन्तीमनायत्तां वामामदक्षिणामनुगच्छति पश्चाद्गच्छति। 'अदक्षिणे मतो वामो वामा योषित्प्रकीर्तिते'ति धरणिः॥

९। निजकीर्त्यनुवृत्त्यर्थं स्वनामाङ्किताशीर्दानेन उपसंहरति। श्रीजयदेवकवेरिदं भणितं सर्वेषामेव शुभानि वितनोतु विस्तारयतु। किम्भूतम्? अद्भुतकेशवकेलिरहस्यम् अद्भुता एकेनैव तावदाभीरनारीणां युगपदेव प्रीणनादाश्चर्या केलिः, अद्भुता चासौ केशवकेलिश्चेति अद्भुतकेशवकेलिः, अस्य रहस्यं रहसि भवं रहस्यं गोपनीयमित्यर्थः, अत्र वर्णनीयत्वात्तथा। पुनः किम्भूतम्? विपिनविनोदकलया वनविहारकौशल्येन वलितं सम्बद्धम्। पुनः किम्भूतम्? यशस्यं यशस्करम् अर्थात् कवीनां गायतां शृण्वताम् ॥

१०। गीतार्थमेव यथासम्भवश्लोकेन दर्शयति। हे सखि राधिके! मधौ वसन्ते मुग्धो मनोहरो हरिः कृष्णः क्रीडति। अत्रोत्प्रेक्षते कविः—मूर्तिमान् शरीरी शृङ्गार

+ रसिकप्रियायां टीकायां 'श्रीजदेवकवेरिदमद्भुत' इति पाठोऽस्ति। तथा रसमञ्जर्यां टीकायामपि।

* पुस्तकान्तरे 'वृन्दावनविपिने वलितम्' इति पाठः।

§ 'विचित्रविलापमाह' इति पाठ०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवा—
मभ्यर्णे परिरभ्य निर्भरमुरः प्रेमान्धया राधया।
साधु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुति—
व्याजादुद्भटचुम्बितःस्मितमनोहारी हरिः पातु वः॥ ११॥

इति श्रीगीतगोविन्दे सामोददामोदरो नाम प्रथमः सर्गः।

सारवती

इव। कीदृशः? स्वच्छन्दं यथा स्यादेवं व्रजसुन्दरीभिः व्रजनायिकाभिः प्रत्यङ्गम् अङ्गे अङ्गे आलिङ्गितः आश्लिष्टः। स्वस्य छन्दोऽभिप्रायः स्वच्छन्दम्, क्रियाविशेषणत्वेन नपुंसकत्वम्। 'अभिप्रायवशौ छन्दावि'त्यमरः। अभितः सर्वतः अङ्गैरवयवैः अर्थान्नारीणामनङ्गोत्सवं कामजनितानन्दम् उपनयन्। किम्भूतैः अङ्गैः? इन्दीवरश्रेणीश्यामलकोमलैः नीलसरोजदामसुन्दरसुकुमारैः। श्रेणीपदोपन्यासेनातिघनत्वमतिनीलत्वञ्च दर्शितम्? पुनः किम्भूतः? अनुरञ्जनेन विश्वेषां सर्वेषामानन्दं जनयन्। एतावन्ति विशेषणानि श्रृङ्गारेऽपि योज्यानि। 'पुंसः स्त्रियां स्त्रियः पुंसि संयोगः सततं स्पृहा। श्रृङ्गार इति विख्यातो रतिक्रीडादिकारणम्॥' श्यामो भवति श्रृङ्गारः श्वेतो हासः प्रकीर्तितः।' मधु क्षौद्रे जले क्षीरे मद्ये पुष्परसे मधुः। दैत्ये चैत्रे वसन्ते चे'ति विश्वः॥

११। रासवर्णनमेव प्रकृतसर्गार्थ इत्यादि दर्शयितुमाशीर्दानव्याजेन पुनस्तदेव दर्शयति। साधु समीचीनं त्वद्वदनं त्वदाननं सुधामयम् अमृतमयमिति व्याहृत्य उक्त्वा गीतस्तुतिव्याजात् गानप्रकर्षछलात् रासोल्लासभरेण गोपक्रीडातियेन विभ्रमभृतां श्रृङ्गारभावधारिणीनाम् आभीरवामभ्रुवां गोपाङ्गनानाम् अभ्यर्णे निकटे उरो वक्षःस्थलं निर्भरं गाढं यथा स्यादेवं परिरभ्यालिङ्ग्य। एतादृशधाम्नेऽ हेतुगर्भविशेषणमाह—प्रेमान्धया प्रेमान्धयेव राधया गोप्या उद्भटचुम्बितः प्रकटचुम्बितः। अतएव प्रेमान्धायाः तादृशछलपरिचयात् स्मितेन मनोहर्तुं शीलं यस्य तादृक् हरिः कृष्णः वो युस्मान् पातु रक्षतु। सामोदो दामोदरो यत्रेति व्युत्पत्त्या सामोददामोदर इति सर्ग नाम॥

इति श्रीमहाकाव्ये समस्तप्रक्रियाविराजमानमहाराजशुक्लध्वजविरचितायां सारवत्यां गीतगोविन्दटीकायां प्रथमः सर्गः।

ऽ. '... धाष्ट्र्ये' इति पाठः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सटोक-गीतगोविन्दम्

द्वितीय सर्गः।

अक्लेशकेशवः।

विहरति वने राधा साधारणप्रणये हरौ
विगलितनिजोत्कर्षादीर्ष्यावशेन गतान्यतः।
क्वचिदपि लताकुञ्जे गुञ्जन्मधुव्रतमण्डली—
मुखरशिखरे लीना दीनाप्युवाच रहः सखीम्॥ १॥

सारवती

१। अथाभिमानिनी राधा न्यूनजनसाधारण्यजनितासहिष्णुतावशाद् विचारितमेवान्यतो गता। ततो निजसौभाग्यातिरेकेण कृष्णस्यानुसन्धानमाशंक्यमाना क्वचिदपि अतिनिभृतस्थले आत्मानं निगृह्य स्थिता। अतः तदलभमानादरात् प्रेमातिरेकात्तदैकचित्तां सखीं निवेदयति। राधा रहः गोप्यम् अग्रेतनगीतमुत्पाद्यं सखीमुवाच। कीदृशी राधा? वने वृन्दावने साधारणः सकलजनतुल्यः प्रण्यः स्नेहो यस्य एतादृशि हरौ कृष्णे विहरति विहारं कुर्वती, अतएव विगलितो विशेषेण गलितो निजोत्कर्षो निजाधिक्यं तस्मात् तया ईर्ष्या असहिष्णुता तस्याः वशेन आयत्ततया। 'ईर्ष्या द्वेषमिच्छाप्रभुत्वयोरि'ति। तथा च ईर्ष्यावशेनाविचारितमेवागता यतः अतएव विचारादेव प्रियमलभमाना खिद्यन्ती स्वचित्तवृत्तान्तं सखीषु निवेदयतीति वाक्यार्थः। पुनः कीदृशी? ततः क्वचिदपि लताकुञ्जे लतापिहिते देवस्थाने लीना आत्मानं निगृह्य स्थिता असौ भाग्यातिरेकात् प्रियानुसन्धानशंकया। अतएव यद्यपि कुञ्जे एतावतैव लतापिहितस्थानं लभ्यते, तथापि आत्यन्तिकत्वसूचनाय लतेत्युक्तम्। कीदृशे कुञ्जे? गुञ्जतां कलध्वनतां मधुव्रतानां मण्डलीभिः मुखरं वाचालम् अग्रं यस्य एतादृशि। एतेनोद्दीपनविभावो दर्शितः। अतः प्रियमलभमाना दीना, अपिरत्यर्थे तथा चातिदुखितेत्यर्थः। 'प्रणयः प्रेम्नि विश्वासे याच्ञाप्रश्रययोरपी'ति विश्वः। अन्यत इति अन्यदादिभ्यस्तस्युपसख्यानमिति तसिः। 'बिम्बोऽस्त्रीमण्डलं त्रिषु' इत्यमरः। अत्र सर्गे विरहोत्कण्ठिता नायिका। तल्लक्षणं यथा— 'उद्दाममन्मथमहाज्वरवेपमानां रोमाञ्चकण्ठकितमङ्गमावहन्तीम्। सम्वेदवेपथुघनोत्कलिकाकुलाङ्गीमुत्कण्ठितां वदति तां भरतः कवीन्द्रः॥'

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गुर्जरीरागेण यतितालेन च गीयते ।

सञ्चरदधरसुधामधुरध्वनिमुखरितमोहनवंशं
चलितदृगञ्चलचञ्चलमौलिकपोलविलोलवतंसम् ।
रासे हरिमिह विहितविलासं
स्मरति मनो मम कृतपरिहासम् ॥ ध्रुवम् ॥ २ ॥

चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशम ।
प्रचुरपुरन्दरधनुरनुरञ्जिते मेदुरमुदिरसुवेशम् (रासे) ॥ ३ ॥

२। प्राहेति यदुक्तं तदाह। गीतस्यास्य गुर्जरीरागः। तालः रूपकः। राग-रागलक्षणन्तूक्तमेव।

गीतार्थः– हे सखि मम मनः कर्त्तृ हरिं कृष्णं स्मरति ध्यायति। कीदृशं हरिम्? इह रासे गोपक्रीडायां विहितविलासं कृतं कृतम्। पुनः किम्भूतम्? कृतः परिहासादिः हास्यादिकौतुकं येन एतादृशम्। पुनः कीदृशम? सञ्चरन्त्या उद्गच्छन्त्या अधरसुधया अधरामृतेन मधुरः स्पृहनीयः यो ध्वनिः तेन मुखरितः शब्दायितो मोहनवंशी येन स तथा। मोहयतीति मोहनः कर्तरि ल्युट्। यद्वा अधरसुधा मधुरध्वनि-र्यथा मुखरितो मोहनकारी वंशी येन स तथा। पुनः कीदृशम्? वलितं तिर्यक्प्रेरितमूर्द्धीकृतं वंशीदण्डस्याग्रदर्शनार्थं दृगञ्चलमपाङ्गो येन वंशीवादनानुकूलमुखरासु पूर्वेन हेतुना चञ्चलो मौलिर्यस्य तम्, अतएव कपोले गण्डदेशे विलोलः चञ्चलोऽवतंशः कर्णपूरो यस्य तम्। कर्मधारयः। 'अवतंस्तु पुमान् कर्णभूषणे शेखरेऽपि च ॥'

३। पुनः कीदृशन्तत्राह—चन्द्रकेन चन्द्राकारकेन अवयवेन चारूणां शोभनानां मयूर-शिखण्डकानां बर्हिःपुच्छानां मण्डलेन समूहेन वलयिता वलयाकारेण वेष्टिता केशा यस्य तम्। गोपतनूद्भवानां सारूप्याय मयूरपुच्छैर्बद्धा भवन्त्येवेत्यनुभवोऽपि। पुनः किम्भूतम्? प्रचुरं महत् पुरन्दरधनुः शक्रचापः तेनानुरञ्जितो भूषितो मेदूरः स्निग्धः मुदिरो मेधः तद्वत् सुन्दरो वेशो यस्य तम्। वेशोऽत्र केश एव, तेषामपि भोगानवच्छेदकतया शरीर-भिन्नत्वादतिकृष्णतया चित्रिततया प्राचुर्येण च सादृश्यम् ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गोपकदम्बनितम्बवतीमुखचुम्बनलम्भितलोलम् ।
बन्धुजीवमधुराधरपल्लवमुल्लसितस्मितशोभम् (रासे) ॥ ४ ॥
विपुलपुलकभुजपल्लववलयित वल्लवयुवतिसहस्रम् ।
करचरणोरसि मणिगणभूषण+किरणविभिन्नतमिस्रम् (रासे) ॥५॥
जलदपटलचलदिन्दु† विनिन्दकचन्दनतिलकललाटम् ।
पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटम् (रासे) ॥ ६ ॥
मणिमयमकरमनोहरकुण्डलमण्डितगण्डमुदारम् ।
पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारम् (रासे) ॥ ७ ॥

४। पुनः किम्भूतन्तत्राह—गोपकदम्बनितम्बवतीनामाभीरसमूहवामभ्रुवां मुखचुम्बने ऽर्थात् मुखचुम्बनेन लम्भितः प्रापितो लोभो येन तम् / पुनः किम्भूतम् ? बन्धुजीववत् बन्धुकपुष्पमिव मधुरो मनोहरोऽधरपल्लवो यस्य तम्, अत्र लोहितादिना अधरः किसलयेन रोपितः। पुनः किम्भूतम् ? तासां मुखचुम्बनकौतुकेन उल्लासिता प्रकाशिता स्मितशोभा हास्यश्रीर्यस्य तम् । 'कदम्बमाहुः सङ्घार्थे नीपे च नीकुरुम्बके ॥'

५। पुनः किम्भूतन्तत्राह—विपुलः प्रचुरः पुलकः रोमाञ्चो यत्रेति। तादृशेन भुजपल्लवेन बाहुपल्लवेन वलयितं वलयाकारेण वेष्टितम् आलिङ्गितं वल्लवयुवतिसहस्रं गोपतरुणीसहस्रं येन तम् । सहस्रशब्देन बल्लवीनामाधिक्यप्रतिपादनेन कृष्णस्य विश्वमूर्तित्वं दर्शितम्। तावन्त्य एव कृष्णमूर्तयोऽपीति भावः। पुलकोद्गमश्च आलिङ्गनसुखादेव। यद्यपि आलिङ्गनसुखात् सर्वाङ्गीन एव रोमाञ्चो भवति तथापि नान्याङ्गरोमाञ्चोऽभिमतः किन्तु मुख्यता भुजयोरित्येव भुजयोरित्युक्तम् । पुनः किम्भूतम् ? करचरणोरसि स्थितानां मणिगणभूषणानां किरणेन दीप्त्या विभिन्नं विशेषतो भिन्नं विदारितम्। करचरणोरसीत्यत्र प्राण्यङ्गत्वादेकवद्भावः। मनोहरत्वेन कमलत्वेन च पल्लवसादृश्यं भुजयोः ॥

६। पुनः किम्भूतन्तत्राह—जलदपटलो मेघसमूहः, तत्र वलतः सम्भजत इन्दोश्चन्द्रस्य विनिन्दकं चन्दनस्य तिलकं यत्र एवम्भूतं ललाटं यस्य तम्। गोपानां तिलकं वर्त्तूलम्भवत्यतश्चन्द्रसारूप्यम्, ललाटस्य च कृष्णतया मेघसारूप्यम्। पुनः किम्भूतम् ? पीनानां मांसलानां पयोधराणां परिसरस्य पर्यस्तभागस्य मर्दने निर्दयो हृदयरूपः कपाटो यस्य तम्। हृदयमेव प्रकीर्णत्वाद् दृढ़त्वाच्च कपाटत्वेन रूप्यते ॥

७। पुनः किम्भूतन्तत्राह मणिमयमकरेण मणिकृतमकराकारेण मनोहरकुण्डलाभ्यां

+ रसमञ्जर्यां टीकायां 'मणिमयभूषण' इति पाठः।

† निर्णयसागरयात्रालयमुद्रितपुस्तके मूले 'वलदिन्दु' इति पाठोऽस्ति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विशदकम्बतले मिलितं कलिकलुषभयं शमयन्तम् ।
मामपि किमपि तरलतरङ्गदनङ्गदशा मनसा रमयन्तम् (रासे) ॥ ८ ॥
श्रीजयदेवभणितमतिसुन्दरमोहनमधुरिपुरूपम् ।
हरिचरणस्मरणम्प्रति सम्प्रति पुण्यवतामनुरूपम् । (रासे) ॥ ९ ॥

मण्डितौ गण्डो यस्य तम् । उदार-मुद्भटं पीतवस्त्रं यस्य तम् । अनुगताः पश्चाल्लब्धा मुनिमनुजसुरासुरवराः परिवारा यस्य तम् । 'परिवारः परिजने खड्गकोषे परिच्छदे ॥'

८। पुनः किम्भूतन्तत्राह विशदकदम्बतले निर्मलकदम्बाधःस्थले मीलितम् इतस्ततः क्रीड़ाः कृत्वा आगत्य स्थितम् । पुनः किम्भूतम् ? कलिकलुषभयं कलियुगजनित-पापत्रासं शमयन्तं नाशयन्तं पश्यतां तादृशावस्थां स्मरतामित्यर्थः । पुनः किम्भूतम् ? मामपि किमपि अनिवर्चनीयं यथा स्यादेवं तरङ्गन्तद्वच्छन्नाङ्गो यस्यामेतादृशा दशा मनसा च रमयन्तम् ॥

९। कीर्त्यनुवृत्यर्थं स्वनामनिबन्धनपूर्वकमाशीर्ददाति । श्रीजयदेवभणितं वर्णितम् अतिसुन्दरम् अतएव मोहजनकञ्च तन्मधूरिपुरूपञ्चेति तदतिसुन्दरमोहनमधुरिपुरुपङ्कर्त् सम्प्रति कलियुगे पुण्यवतां पुरुषाणाम् अनुरूपं भवत्विति विशेषः । कुत्र कर्मणि ? हरिचरण-स्मरणम्प्रति तथा च श्रीजयदेवकृतवर्णनोपस्थापितरुपेण सम्प्रति हरिचरणस्मरणं धार्मिकानां भवत्विति वाक्यार्थः ॥

—:—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सटीक-गीतगोविन्दम्

मालवगौडरागेण एकतालीतालेन च गीयते।

गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते
वहति च परितोषं दोषं विमुञ्चति दूरतः।
युवतिषु चलत्तृष्णे कृष्णे विहारिणि मां विना
पुनरपि मनो वामं कामं करोति करोमि किम् ॥ १ ॥
निभृतनिकुञ्जगृहं गतया निशि रहसि निलीय वसन्तम्।
चकितविलोकितसकलदिशा रतिरभसभरेण+ हसन्तम्।
सखि हे केशिमथनमुदारं रमय मया सह।
मदनमनोरथभावितया सविकारम्॥ (ध्रुवम्) ॥ २ ॥

सारवती

१। ननु तथानवधानाविधायिनि कथमेवमनुरज्यस इति सखीवचनमाशंक्याह—हे सखि वामं प्रतीपं मे मम चित्तं पुनरपि तथाभूते कृष्णे काममभिलाषङ्करोति। किङ्करोम्यहं तथा च नाहमभियोज्येति भावः। कीदृशे कृष्णे? युवतिषु चलन्ती वर्धमाना तृष्णा यस्य एवम्भूते, मान्तदेकमात्रनिरतां विहाय त्यक्त्वा विहारिणि क्रीडति। अत्र युवतिपदेन तासामतिरिक्तगुणे न्यूनता दर्शिता। चलन्ती तृष्णा यस्येत्यनेन माधवस्य तास्वेकाश्रयं प्रेम दर्शितम्। तदनेन प्रबन्धेन कृष्णस्यापराधातिरेकं दर्शयन् तद्गामित्वेन चेतसो वामत्वमुपपादितम्। चेतसो वामत्वे हेत्वन्तरमाह—यस्मादेतन्मनः सापराधस्यापि माधवस्य गुणग्रामं रतिकौशलादिगुणसमूहं गणयति विचारयति। भ्रामं (क्रोधं भ्राम क्रोधे धातोः भावे घञ्।) भ्रमादपि भ्रान्तेरपि नेहते न चेष्टते। परितोषं प्रीतिं वहति धारयति दोषं मदीयावहेलनादिकं दूरतो विमुञ्चति नानुसन्धत्ते इति यावत्। 'वामं सव्ये प्रतीपे च द्रविणे चातिसुन्दरे। वारिवाहे हरे कामे विद्याद् वामेति योषिति॥'

२। मनोरथनिहितसङ्गमप्राणा निकया कामपीडामसहमाना राधा सखीमभ्यर्थयति। गीतस्यास्य मालवरागः। एकतालीतालः। तल्लक्षणञ्चोक्तमेव। हे सखि मया सह केशिमथनं कृष्णं रमय क्रीडय अत्र प्रायो वीररताः स्त्रिय इति श्लाघप्रयोजकगुणपुर-

+ 'रभसरसेन' इति पाठान्तरम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रथमसमागमलज्जितया पटु चाटुरनुकूलम् ।
मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलम् । (सखि हे) ॥ ३ ॥

स्कारेणोपन्यासः कथमेवम्विधस्तव दुराग्रह इत्याशंक्याह । मया कथम्भूतया ? मदयतीति मदनः कामः तेन दुर्दशत्वं दर्शितम्, तज्जनितो मनोरथोऽभिलासः स एव रतिनाम स्थायीभावः स जातोऽस्यास्तीति तारकादित्वादितः । यद्वा मदनजनितमनोरथेन भावि-तया तदेकचित्ततयेत्यर्थः । तथाचाहं स्वायत्त्व इति दर्शितम्, मद्वचसा कथं कृष्णः समागमिष्यसीति सखीवचनमाशंक्याह—कीदृशम् ? उदारं महान्तं तथा च समहान् सम-दुःखवार्तामुपश्रुत्य कृपया सर्वथा समागमिष्यसीति दर्शितम् । महतामपि निरागाणा-मतौदास्यं सम्भाव्यत एवेत्याशंक्याह—कीदृशम् ? सविकारं कामजनितविकारसहितं तथा च सोऽप्यत्र सौत्कण्ठ एवेति न तदभ्यर्थने भवत्याः कोऽपि परिश्रम इति दर्शितः । पुनः किम्भूतया ? निभृतं सगुप्तं यन्निकुञ्जं गृहं तत्र गतया । एतेन निकुञ्जेत्यनेनाभि-सारयोग्यं स्थानमुपदर्शितम् । तथा च साहित्यदर्पणे—क्षेत्रम्वाटी तथा भग्नदेवालयो दूती-गृहम्वनम् । आयनञ्च स्मशानञ्च नदीनाञ्च तटन्तथा ॥ एवं कृताभिसाराणां पुंश्चलीनां विनोदने । स्थानान्यष्टौ तथाध्वान्ते कुत्रचिदाश्रय इति ॥+ केशिमथनं किम्भूतम् ? निशि रात्रौ निलीय वसन्तम् इयमागत्य किमाचरिष्यतीति तिगृह्य तिष्ठन्तं तथा चाग्रतस्तां नय पश्चान्मां नयेति वाक्यार्थः । ततः किम्भूतया मया ? चकितं चमत्कारं यथा स्यादेवं विलोकिताः सकला दिशो यया । अत्र स एव कृष्णं क्वास्तीति तन्निरूपणार्थं नयनचमत्कारः । केशि-मथनं ततः किम्भूतम् ? रतिरभसभरेण हसन्तं प्राप्तव्यरतिजनितप्रमोदाय तत्तया हास्य-वन्तमित्यर्थः । 'रभसो वेग उत्साह' इत्यमरः ॥

३। ततः किम्भूतया मया तत्राह—प्रथमसमागमलज्जितया ईर्ष्यया अन्यत्र गम-नान्तरं यद्वाक्येनैव यः प्रथमः समागमः तेन लज्जितया, न तु प्रथम एव समागमः तस्य पूर्वमनिष्पन्नत्वादिति केशिमथनम् । पुनः किम्भूतम् ? पटुचाटुशतैरनुकूलं चाटूनां प्रयोक्तृणां

+ साहित्यदर्पणस्य चौखम्बासस्करणे अनयोः श्लोकयोः पाठ एवं विद्यते—

'क्षेत्रं वाटी भग्नदेवालयो दूतीगृहं वनम् ।
मालापञ्चः श्मशानञ्च नद्यादीनां तटी तथा ॥
एवं कृताभिसाराणां पुंश्चलीनां विनोदने ।
स्थानान्यष्टौ तथा ध्वान्तच्छन्ने कुत्रचिदाश्रये ॥'

—साः दः, ३ परि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किसलयशयननिवेशितया चिरमुरसि ममैव शयानम् ।
कृतपरिरम्भणचुम्बनया परिरभ्य कृताधरपानम् (सखि हे) ॥
अलसनिमीलितलोचनया पुलकावलितललितकपोलम् ।
श्रमजलसिक्तकलेवरया वरमदनमदादतिलोलम् (सखि हे) ॥ ५ ॥

शतं चाटुशतं तैरनुकूलं क्रीडाविरोधि लज्जापहारकमित्यर्थः । तदुक्तम्—'प्रथममिह हि देयं पूगपुष्पादिभूयो मृदुमधुरवचोभिर्योजयेत् सन्निधाने । करतलमथ गात्रे भ्रामयेत् शश्वदस्याश्चिरमुदिरपृष्ठे मन्दमाश्लिष्य दद्यात् ॥' मया किम्भूतया ? मधुरे मनोज्ञे स्मितभाषिते यस्या एवम्भूतया । तथा च तदीयचाटुशतशिठिललज्जाहमपि वदिष्यामीति वाक्यार्थः । केशिमथनं पुनः किम्भूतम् ? शिथिलीकृतं श्लथीकृतं करेण स्वसम्बद्धाराधाजघनदुकूलं जघनस्थितपट्टवस्त्रं येन । तदुक्तम्—'कान्ते तल्पमुपागते विगलिता नीवी स्वयम्बन्धनात् । वासश्च श्लथमेखलागुणधृतं किञ्चिन्नितम्बस्थितम् ॥ एतावत् सखि वेद्मि केवलमहन्तस्याङ्गसङ्गे । पुनः कोऽसौ काऽस्मि रतञ्च कीदृशमिति स्वल्पापि मे न स्मृतिः ॥'

४। पुनः किम्भूतया तत्राह—किसलयशयननिवेशितया पल्लवशय्यामुपवेशितया, अर्थात्तेन । तदाह भरतः—'अङ्केऽथ तल्पे 'सुखोपविष्टं गाढं पतिः श्लिष्यति सा च कान्तम् । अन्योन्यगात्रे विशतीव रागात् द्वन्द्वं तदा क्षीरजलाभिधानम् ॥' पुनः किम्भूतम् ? ममैवोरसि वक्षःस्थले चिरं चिरकालम्व्याप्य शयानं सुप्तम् । नेह सुरतावस्था किन्त्वालिङ्गनविशेष एवेति ध्येयम् । तदाह—'अलंकृदतनुगाढा श्लेषणी नावितन्वन् । जनितजघनवाहुव्यत्ययः स्पर्धते ताम् ॥ मिथुनमत्यु मिथोऽङ्के नीयते निस्तरङ्गम् । निगदति तिलपूव—तण्डुलं तं मुनीन्द्रः ॥' मया पुनः किम्भूतया ? चिरेण हृदि तदीयावस्थानेनाधीरतया कृते परिरम्भणचुम्बने यया एवम्भूतया । इदमप्यालिङ्गनविशेषापेक्षया पूर्वं कृष्णकर्तृकमिदानीं राधाकर्तृकमिति भेदः । तदुक्तं भारते---'जघनकलितकान्तः श्रेणीरप्योपविष्टाद् । व्रजति यदिह नारी मुक्तकेशोत्तरीया ॥ करजवदनकृत्यं चुम्बनञ्चाविधत्सुः । कलयति जघनोपश्लेषमेनं मुनीन्द्रः ॥' कृष्णं पुनः किम्भूतम् ? परिरभ्यालिङ्ग कृतमधरपानं येन तम् । तदुक्तम्—'अधरदशनजिह्वापानमारभ्य कुर्यात् । नयन वदनगुह्यश्चेति जिह्वाप्रचारम् ॥ ग्रहणमथ विदध्याद्वस्त्रकेशस्तनादः । कुचयुगभगदेशे मर्दनञ्चोस्युग्मे ॥'

५। मया ततः किम्भूतया ? अलसं मन्थरञ्च तन्निमीलितञ्चेति अलसनिमीलितं लोचनं यस्याः तथा । यद्वा अलसं मन्थरं यथा स्यादेवं निमीलिते लोचने यया, चुम्बनादिसुखयोगादिति भावः । 'अलसः पादयोगे स्यात्क्रियामान्द्ये द्रुमान्तरे' इति । पुनः

+ निर्णयसागरयात्रालयमुद्रितपुस्तके मूले 'सकलकलेवरया' इति पाठोऽस्ति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कोकिलकलरवकूजितया जितमनसिजतन्त्रविचारम् ।
श्लथकुसुमाकुलकुन्तलया नखलिखितघनस्तनभारम् (सखि हे) ॥ ६ ॥
चरणरणितमणिनूपुरया परिपूरितसुरतवितानम् ।
मुखरविशृंखलमेखलया सकचग्रहचुम्बनदानम् । (सखि हे) ॥ ७ ॥

किम्भूतम् ? पुलकावल्या रोमाञ्चपंक्त्या ललितौ कपोलौ यस्य तम् । एतेन यत्र यत्रैव चुम्बनं तत्र तत्रैव सात्त्विकविकार: इति मन्तव्यमिति सूचितम् । तदुक्तं भारते—'सङ्गमे स्मरणे चैव प्रियस्यालोकने तथा । हेतुत्रयं समासाद्य सात्त्विकं संप्रवर्तते' इति । 'स्वेदः कम्पोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः । वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मताः ॥' मया किम्भूतया ? श्रमजलेन सुरतयासजनितेत गात्रवारिणा सकलं सम्पूर्णं कलेवरम् अङ्गं यस्या एवम्भूतया । तं पुनः किम्भूतम् ? वरमदनमदादतिशयितकामदर्पात् हर्षाद्वा अतिलोलं सुरतक्रियायामित्यर्थेन चञ्चलमित्यर्थः ॥

६। मया ततः किम्भूतया तत्राह कोकिलकलरववत् अव्यक्तध्वनिवत् कूजितं यस्या एतादृशा । सुरतकाले विदग्धनायिकाभिः नाथकस्य वासात्रैकार्थं तथाविधशब्दविशेषस्य विधेयत्वात् । तदुक्तं नागरसर्वस्वे—'दात्युभलोचकमयूरकपोतहंसपारावतादिरुतवत् ध्वनितं रुताख्यं तन्मन्त्रितं श्वसितशीत्कृतहानिर्दानैः संयोजयेद्वदनचुम्बनमिथुनादौ ।' तं पुनः किम्भूतम् ? जितो मनसिजतन्त्रस्य कामशास्त्रस्य विचारो येन तम् । तथा च कामशास्त्रविचारिततत्तत्कर्माधिककर्मकुशलमित्यर्थः । 'तन्त्रं प्रधने शास्त्रयोरि'ति विश्वः । मया पुनः किम्भूतया ? श्लथकुसुमा शिथिलबन्धपुष्पयोराकुला असुव्यस्ताः कुन्तलाः केशा यस्या एवम्भूतया सुरतकालीन-कुन्तलाकर्षणादिना इति भावः । तं पुनः किम्भूतम् ? नखेन लिखितः अंकितः घनो निविडः स्तनभारो येन तम् । एतेन व्याप्यरतमुक्तम् । तदुक्तम् —'आश्लेषचुम्बननखक्षतताडनानि समर्दने प्रसरणं खलु वीक्षितानि । जिह्वाप्रवेशरसनग्रहणन्तु नाभिक्षोभं रतम्वदति राद्यरतानि तज्ज्ञः ॥'

७। ततः किम्भूतया मया तत्राह—चरणयो रणितौ शब्दितौ मणिनूपुरौ मणिप्रधाननूपुरौ यस्याः तया ग्रामाख्यो बन्धः सूचितः । तदुक्तम्—'उत्तानितायाः सुरते यदुरू आसीनकान्तोरुगतौ भवेताम् । ग्राम्यं तदा स्यात् कटितो यदास्यबहिर्भवेतां किल नागराख्यम् ॥' तं पुनः किम्भूतम् ? परिपूरितः कथितप्रकारेण समाप्तं नीतः सुरतवितानः प्रकृतसुरतविस्तारो येन तम् । 'वितानो यज्ञ उल्लोचे विस्तारे पुन्नपुंसकम् । क्लीवं वित्तविशेषे च त्रिषु मत्ते च तुच्छके ॥'+ मया पुनः किम्भूतया ? मुखरा वाचाला विशृंखला

चोखम्बा मुद्रिते मेदिनीकोशे क्लीवं वृत्तविशेषे स्यात्त्रिलिङ्गो मत्ततुच्छयोः' इति पाठो वर्तते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रतिसुखसमयरसालसया दरमुकुलितनयनसरोजम् ।
निःसहनिपतिततनुलतया मधुसूदनमुदितमनोजम् (सखि हे) ॥ ८ ॥

श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलम् ।
सुखमुत्कण्ठितगोपवधूकथितं वितनोतु सलीलम् (सखि हे) ॥ ९ ॥

विपर्यस्ता मेखला यस्याः एवम्भूतया । 'एकयष्टि भवेत्काञ्ची मेखला त्वष्टयष्टिका' इति । अत्र मुखरमेखलात्वेन विपरीतरतिः सूचिता । तत्राह - 'नूपुरनिःस्वनौ जातौ श्रूयते रसनाध्वनिः । मूढकान्ते रतिश्रान्ते कामिनीरूपमायते ॥' तं पुनः किम्भूतम् ? सुकचग्रहं चुम्बनदानं यस्य तम्, इदमपि विपरीतरतिसूचकमेव ॥

८। मया पुनः किम्भूतया तत्राह—रतिसुखसमयरसालसया सुरतसमये रसेन शृङ्गाररसेन अलसया च्युतिकालीनसुखविशेषानुभवेन मन्दक्रिययेत्यर्थः । 'अलसः पादयोगे स्यात् क्रियामान्द्ये द्रुमान्तरे' इति । अलसयेत्यनेन तदविनाभूतचक्षुनिमीलनादिकं दर्शयता च्युतिलक्षणं दर्शितम् । तदुक्तम्—'मूर्च्छनामीलनं चक्षोश्च्युतिकालस्य लक्षणम् । ततः स्वजघनाश्लेषः शीत्कारो वीतलज्जता ॥ हुंकारः शाश्वतं नार्याश्च्युतिसान्निध्यकारकाः ।' पुनः किम्भूतम् ? तं दर ईषत् मुकुलितं मुद्रितं नयनसरोजं नयनकमलं येन तम् । एतदपि च्युतिकालीनसुखसूचकमेवेत्युक्तम् । मया पुनः किम्भूतया ? निःसहारतान्ते असमर्थात् अतएव निपतिता तनुलता यस्यास्तया । एतेन सुरतान्तावस्था दर्शिता । तदुक्तम्भारते—'अङ्गस्वदेः श्लथत्वञ्च केशवस्त्रादिसम्वृत्तिः । या ते च्युतिसुखेनार्ये विरागेच्छा च गम्यत' इति । तं पुनः कीदृशम् ? मधुसूदनं मधुनामदैत्यहन्तारम्, वीरसूचनार्थं पुनरुक्तिः । यद्वा मधु पुष्परसं पिवतीति मधुसूदनं, सूदधातुः पानार्थः, धातोरनेकार्थत्वात् । अतएव उदितमनोजम् उदितकाममित्यर्थः ॥

९। कौर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं गीतमुपसंहरति । उत्कण्ठिता चासौ गोपवधूश्चेति उत्कण्ठितगोपवधूः, तया कथितं विलापरूपं कर्त्तृ इदं वाक्यं सुखं वितनोतु गायतां शृण्वतामित्यर्थः । कीदृशम् ? श्रीजयदेवभणितं वर्णितम् । पुनः कीदृशम् ? अतिशयेन केशवस्य निधुवनशीलं यत्र प्रतिपद्यत इति भावः । पुनः कीदृशम् ? सलीलं लीलाः शृंगारभावजाः तत्साहित्यमपि प्रतिपाद्यतयेत्यवधेयम् । 'निधुवनमायोधनमाःहु वन्धरिद' इति हारावली । 'स्वभावे शीलने शीलमि'ति धरणिः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हस्तस्रस्तविलासवंशमनृजुभ्रू वल्लिमद्बल्लवी—
वृन्दोत्सारिदिगन्तवीक्षितमतिस्वेदार्द्र गण्डस्थलम् ।
मामुद्वीक्ष्य विलक्षितं स्मितसुधामुग्धाननं कानने
गोविन्दं व्रजसुन्दरीगणवृतं पश्यामि हृष्यामि च ॥१०॥

दुरालोक× स्तोकस्तवकनवकाशोकलतिका—
विकासः कासारोपवनपवनोऽपि व्यथयति ।
अपि भ्राम्यद्भृङ्गीरणितरमणीयाऽ न मुकुल—
प्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति ॥११॥

१०। कामपीडितराधा वशेनोपनीतकृष्णसाक्षात्कारं निवेदयति—हे सखि गोविन्दं कृष्णं पश्यामि तद्दर्शनेन हृष्यामि च, कानने व्रजसुन्दरीगणेन गोपनारीवृन्देन वृतम्वेष्टितमित्यर्थः। अतएव मामुद्वीक्ष्य दृष्ट्वा, विलक्षितमिति भावे क्त: विलक्षितेन लज्जया यत्स्मितं तदेव सुधा तया मुग्धं मनोहरम् आननं यस्य तम्। पुनः किम्भूतम्? अति-स्वेदार्द्रगण्डस्थलं मामुद्वीक्ष्यैव अतिस्वेदेन अतिघर्मेण आर्द्रस्तिमितं गण्डस्थलं यस्य एतादृशम्। तेन सात्त्विकभावो दर्शितः। पुनः किम्भूतम्? अतएव हस्तात् स्रस्तः विलासवंशः क्रीडानिमित्तवेणुर्यस्य तम्। पुनःकिम्भूतम्? तथाभूतसम्भ्रमादिदर्शनेन अनृ-जुभ्रवल्लीमतीनां कुटिलभ्रुवां वल्लवीनां वृन्देन समूहेन उत्सारिदिगन्तं न ऊर्द्ध्वं तिर्यग् गामि—दृगन्तेन वीक्षितं दृष्टमित्यर्थः। तेन तासां क्रोधातिरेको दर्शितः। तथाच्छलेन प्रबन्धेन मयि सानुकूल एव कृष्णः न भवत्या तदनु नायकोऽपि श्रमइति सूचितम्। प्रेयो नामालंकारः॥

११। भवतु क्रमेण कृष्णमनुनीयानयिष्यामीति सखीवचनमाशंक्य स्वकीयकालक्षे-पासहिष्णुता प्रतिपदेनायद्हृत्तापमुद्भावयति। हे सखि स्तोकोऽल्पः स्तवकः गुच्छो यस्य एतादृशो यो नवकाशोको नूतनाशोकवृक्षः तत्र लतिकाया यो विकासः प्रकाशः स दुरालोकः दुःखेन दर्शनीयः, अर्थात् मम तथा चाचेतनस्या अपीदानीं परस्परं सोल्ला-समाशंक्य इति दर्शयन्त्या अतिरिक्तहृदयोद्वेग उद्भासित इति भावः। यद्वा तादृशनवका—शोकवृक्षः लतिका च तयोर्विकास उद्गमः दुरालोकः अर्थान्मम। तथा च-सन्नद्धस्तव-काशोकलतिकायाः काकत्येति धरणिः। यद्वा दूरादालोके दुःखेन दर्शनीयोऽर्थान्मम स्तोकः

× 'दूरालोकः स्तोकस्तवकनविका' इति पाठान्तरं वर्तते।
ऽ 'रणिति रमणीये'ति पाठान्तरं वर्तते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

साकूतस्मितमाकुलाकुलगलद्धम्मिलमुल्लासित—
भ्रूवल्लीकमलीकदर्शितभुजामूलोर्द्ध दृष्ट+स्तनम् ।
गोपीनां निभृतं निरीक्ष्य गमिताकांक्ष×श्चिरं चिन्तयन्—
नन्तमुग्धमुनोहरं हरतु वः क्लेशं नवः केशवः ॥१२॥

स्वल्पो स्तोको गुच्छो यस्य एतादृशो यो नवकाशोको नूतनाशोकवृक्षः लतिका च विकासयतीति कर्मण्यन्निति पवनविशेषणतया व्याख्येयम् । कासारः तडागः उपवनम् उद्यानं तयोश्च पवनः कासारोपवनपनः, सोऽपि व्यथयति पीडयत्यर्थान्माम् । अत्राशोकलतिकाविकासकत्वमात्रदर्शनेन वायोः मान्द्यत्वम्, तडागोपवनसम्बन्धित्वेन शोतलत्वं सुरभित्वञ्च दर्शितम् । तथा च ईदृशः सुखदोऽपि वायुः पीडाकरः इति चित्रमिति भावः । न केवलमेतदेव शिखरिणि पर्वते स्थितेत्यर्थात् चूतानामियं मुकुलप्रसूतिरपि न सुखयति । कीदृशी ? भ्राम्यन्तीनाम् उपर्यधः पार्श्वे च चलन्तीनां भृङ्गीनां रणितैः शब्दितैः रमणीया मनोज्ञा तथा चातिदूरस्थापि सहकारमञ्जरी मधुकररणितेनानुमीयमानापि न सुखयति किं पुनः निकटस्थेति भावः । 'अपि सम्भावना प्रश्नशंकाहर्षसमुच्चयोरिति । तथाह्यनुकूलपदार्थे च कामचारक्रियासु च ॥' छन्दोऽप्यत्र शिखरिणीति छलेनोपदर्शितम् ॥

१२। सर्गान्ते जनानामाशीषमाह—नवो नूतनः केशवः वो युस्माकं क्लेशं कष्टं हरतु । किम्भूतः ? गोपीनां निभृतं सगोप्यभावं निरीक्ष्य अन्तः चेतसि किञ्चिद्विशिष्यानिर्वचनीयम् । तदुक्तं 'साहित्यदर्पणे—शठोऽयमेकत्र दर्शित-बद्धभावोऽन्यत्र दर्शितबहिरनुराग' इति । निभृतं किम्भूतम् ? साकुतं साभिप्रायं स्मितं यत्र एतादृशम् । पुनः किम्भूतम् ? आकुलाकुलोऽत्यन्तास्तव्यस्तो गलन् बन्धादुन्मुक्तीभवन् मिलाः संयताः केशाः यत्र । पुनः किम्भूतम् ? उल्लासिता भ्रूवल्ली यत्र तदुल्लासितभ्रुवल्लीकम् । पुनः किम्भूतम् ? अलीकेन परिदृश्यमाना कार्यं विना छलेन वा दर्शितम् भुजामूलञ्च अर्धहस्तश्च स्तनश्च तद् भुजमूलार्धहस्तस्तनं यत्र । एतेन मोट्टायितभावो दर्शितः । अर्धहस्तदर्शनमङ्गुलीनां श्लेषेनातिबोधनादित्यवधेयम् । 'दोर्दोषा तु भुजाभुज' इत्यमरः । 'अलीकञ्च लमिथ्ययोरि'ति धरणिः । अक्लेशो दुःखरहितः केशवो यत्रेतिव्युत्पत्त्या अक्लेशकेशव इति सर्ग नाम ।

इति श्रीगीतगोविन्दे महाकाव्ये अक्लेशकेशवो नाम द्वितीयः सर्गः ॥

इति समस्तप्रक्रियाविराजमान-महाराजशुक्लध्वजविरचितायां सारवत्यां गीतगोविन्दटीकायां द्वितीयः सर्गः ॥

+ निर्णयसागरयात्रालयमुद्रितपुस्तके 'मूलोद्ध हस्त' इति पाठः ।
× 'दयिताकांक्षः' इति पाठान्तरो वर्तते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सटीक-गीतगोविन्दम् ।

तृतीयः सर्गः

मुग्धमधुसूदनः ।

कंसारिरपि संसारवासनाबद्ध-शृंखलाम् ।
राधामाधाय हृदये तत्याज व्रजसुन्दरीः ॥१॥

इतस्ततस्तामनुसृत्य राधिका—
मनङ्गबाणव्रणखिन्नमानसः ।
कृतानुतापः सा कलिन्दनन्दिनी—
तटान्तकुञ्जे विषसाद माधवः ॥२॥

सारवती

१। एकाश्रितत्वेन राधाभिनिवेशस्य रसाभारतां निराकर्त्तुं तस्यापि राधाया-मेतादृगेवाभिनिवेश इति दर्शयति। कंसारिः कृष्णः व्रजसुन्दरीः सर्वगोपरमणीः तत्याज मुमोच। किं कृत्वा? राधां हृदये आधाय धृत्वा। अत्र कंसारिपदोपन्यासेन सुरताभिसूचनेनोत्तमनायकता सूचिता। सुन्दरीपदेन वहुवचनेन च राधायां माधवस्याधिकानुबन्धो बोधितः। कीदृशीं राधाम्? संसारे वासना विषयस्पृहा सैव बन्धो बन्धनं तत्र शृंखलामिव। तदाह 'शृंखले स्यात् कटीरन्ध्रे बन्धे च निगडेऽपि च' इति॥

२। ततः किं कृतवानित्याक। क्षायामाह—कलिन्दनन्दिनी यमुना तस्यास्तटान्त-कुञ्जे निकटकुञ्जे सद्गुणविशिष्टो माधवो विषसाद विषादं लेभे। अत्र मा लक्ष्मीः तस्या धवो माधव इति प्रकृते माधवपदेन कृष्णस्योपन्यासेन तस्य च राधाया अलाभेन विषादप्रतिपादनेन तस्याधिक्यं दर्शितम्। किं कृत्वा? इतस्ततः सर्वत्र तामनिवर्चनीयरूपां राधिकामनुसृत्यान्विष्य। किम्भूतः? अनङ्गबाणेन कामशरेण यो व्रणः तेन खिन्नं मानसं यस्य तथाभूतः। अत्र अनङ्गपदेन अङ्गहीनतया अविदिताङ्गक्षतवेदनावत्त्वेन कामस्य निर्दयप्रहारशालिता दर्शिता। पुनः कीदृशः? कृतोऽनुतापः पश्चात्तापो येन, अर्थात् कथं तस्यां मया साधारणप्रणयव्यवहारो विहित इत्याकार इति॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गुर्ज्जरीरागेण यतितालेन च गीयते।

मामियं चलिता विलोक्य वृतं वधूनिचयेन।
सापराधतया मयापि न निवारितातिभयेन।
हरिहरि हतादरतया गता सा कुपितेव ॥ध्रुवम् ॥३॥
किं करिष्यति किं वदिष्यति सा चिरं विरहेण।
किं धनेन किं जनेन किं मम सुखेन गृहेण (हरिहरि) ॥४॥
चिन्तयामि तदाननं कुटीलभ्रु कोपभरेण।
शोणपद्ममिवोपरि भ्रमताकुलं भ्रमरेण (हरिहरि) ॥५॥
तामहं हृदि सङ्गतामनिशं भृश रमयामि।
किं वनेऽनुसरामि तामिह किं वृथा विलपामि (हरिहरि) ॥६॥

३। न केवलं विषादं लेभे अपितु राधाविहारविकलो वहुतरं विलापे इति गीतेनाह। गीतस्यास्य गुर्जरीरागः, प्रतिमठतालः। रागलक्षणमुक्तमेव। वधूनिचयेन नारीसमूहेन वृतं वेष्टितं मां विलोक्य इयं राधा चलिता गन्तुं प्रवृत्तेत्यर्थः। अत्रेयमिति-भावनोपस्थितया अन्यस्त्रीसाधारणविहारेण सापराधतया स्वयमेव तथाविधं दृष्टवती-त्यभिनयेन मयापि न निवारिता न गमने निषिद्धा हरि हरीति खेदं सा राधा हतादरतया नष्टवहुमानत्वेन कुपितेव गता क्रुध्देव गता। अत्र गमनक्रियाकर्मणोः विशेषतोऽ-ज्ञानतया नोद्देशः। अत्रेवशब्द एवार्थः; यद्वा तस्याः मयि कथं कोपः स्यादिति निर्भरप्रणयानुवन्धात् कुपितेवेत्युक्तम्। सा इत्यनुस्मृतिमादाय उक्तमित्यवधेयम् ॥

४। पुनरनुचिन्तनपूर्वकं विलपति – सा राधा चिरं चिरकालं व्याप्य यो विरहः विश्लेषः तेन लक्षिता तद्युक्ता किं करिष्यति किमाचरिष्यति किम्वा वदिष्यत्यर्थात् मयि वितर्कोऽत्र व्यभिचारो भावः। अतः किं जनेन किमन्येन किं धनेन त्रिभुवनेन करात्मभूतया तया विना हिरण्यादिवित्तेनेत्यर्थः। मम जीवितेन सुखेन किम्, मम जीवितरूपेण सुखेनापि न किमपीत्यर्थः। तथा च ताम्विना न किमपि सुखजनकमिति भावः ॥

५। प्रकारान्तरमालोच्यातिसन्धत्ते—तदाननं चिन्तयामि। कीदृशम्? कोपभरेण क्रोधातिशयेन कुटिलभ्रु कुटिले वक्रे भ्रुवौ यत्र तथा। किमिव? उपरि भ्रमता भ्रमरेणाकुलं व्याप्तं शोणपद्ममिव। अत्रोपमा नामालंकारः। तथाह—'यथा कथञ्चित्सादृश्यं यत्रोद्भूतं प्रतीयते। उपमा नाम सा तस्याः प्रपञ्चोऽयं निदर्श्यत' इति ॥

६। अथ सद्यः समुत्पन्नधृतिव्यभिचारिभावेनाह—अहं तां राधाम् अनिशं वारं वारं भृशम् अत्यर्थेन रमयामि क्रीडयामि। सा राधा क्व लब्धा इत्यत आह—मनसि हृदये सङ्गतां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तन्वि खिन्नमसूयया हृदयं तवाकलयामि।
तन्न वेद्मि कुतो गतासि न तेन तेऽनुनयामि (हरिहरि) ॥७॥
दृश्यसे पुरतो गतागतमेव मे विदधासि।
किं पुरेव ससंभ्रमं परिरम्भणं न ददासि (हरिहरि) ॥८॥
क्षम्यतामपरं कदापि तवेदृशं न करोमि।
देहि सुन्दरि दर्शनं मम मन्मथेन दुनोमि (हरिहरि) ॥९॥

स्थितामित्यर्थः। तामिह वने किम् अनु सरामि किमन्वेषयामीत्यर्थः। वृथा निरर्थकं किम्विलपामि ॥

७ पुनर्भावनोपस्थितां राधां सम्बोध्य विलपति—हे तन्वि कृशाङ्गि! तव हृदयम् असूयया क्रोधेन परगुणासहिष्णुतया वा खिन्नं दुःखितमाकलयामि। कथं तर्हि प्राणभूताया मम विनयो भगवता न क्रियत इत्यत आह – कुत्र गतासि न वेद्मि न जानामि, तेन हेतुना न त्वामनुनयामि चरणप्रणिपातादिना अनुनयं न करोमीत्यर्थः। मनसा पुनः करोम्येवेति भावः। अत्र चाज्ञातावस्थितिः सा कथमेवं सम्बोध्यातिशंका प्रलापावस्था या समाधेया तदाह – 'अनक्षरवाक् प्रलापः स्यात् चेतसो भ्रमनाद्दशमि'ति। यद्वा न तेन इत्यत्र भावे क्तः, तथा च कुतो गतासि तन्न वेद्मि न जानामि। अतः पदपतनादिकं विहाय नमनेन तेनाहं नयामि अनुनयं करोमीत्यर्थः। अत्र क्रियाग्रहणमपि कर्त्तव्यमिति चतुर्थी। यद्वा ते तव कृतंप्रति षष्ठी, येन प्रकारेण पूर्वमनुभूता राधा तेनैवाभिनिवेशावशेन तां पश्य ह्युपलोभात् येनैवानुभवन्ति प्राक् जनानिष्टान् समागमे तथा संस्कारयोगेन वीक्षन्ते तान् वियोगिन इति ॥

८। मे मम पुरत एव अग्रत एव गतागतं यातायतं विदधासि करोषीति दृश्यसे विलोक्यसे। पूर्वैव प्रागेव ससंभ्रमं सादरं यथा स्याद् एवं परिरम्भणम् आश्लेषं किं कथं न ददासि अर्पयसि ससभ्रमं सत्वरम्वा? तदाह--'सम्भ्रमन्त्वादरे भीतौ त्वरायामपि वर्तत' इति विश्वः॥

९। अन्यसाधारणप्रणयव्यवहाररूपं सापराधं स्वयमेवाशंक्य पुनरेवं न करिष्यामीति भावनोपस्थितां राधां प्रत्याह—हे सुन्दरि क्षम्यतां क्षमस्व अर्थात् पूर्वकृतमपराधम् अपरमीदृशमपराधं कदापि न करोमि न करिष्यामीत्यर्थः। वर्त्तमानसामीप्ये वर्त्तमानत्वेति लोट्प्रयोगः। मम कृते दर्शनं देहि, मन्मथेन मदनेन दुनोमि तप्तो भवामीत्यर्थः। अत्र मां मथ्नातीति व्युत्पत्ति मनसि कृत्वाह। न तामपि मथ्नातीति सूचयितुं मन्मथपदेन उपन्यास कृत इति दर्शितम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वर्णितं जयदेवकेन हरेरिदं प्रवणेन।
केन्दु-विल्व-समुद्रसम्भवरोहिणीरमणेन (हरिहरि) ॥१०॥

हृदि बिसलताहारो नायं भुजङ्गमनायकः
कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः।
मलयजरजो नेदं भस्म प्रियारहिते मयि
प्रहर न हरभ्रान्त्यानङ्ग क्रुधा किमु धावसि ॥११॥

१०। कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं गीतमुपसंहरति—हरेः प्रवणेन श्रीकृष्णस्यायत्तेन जयदेवकेन जयदेवनाम्ना प्रशस्तेन इदं कृष्णचरितं वर्णितं प्रकृते गीते निबद्धमित्यर्थः। तदाह—'प्रवणं क्रमनिम्नोर्व्यां प्रह्वे ना तु चतुष्पथे' इत्यमरः। कीदृशेन ? केन्दुविल्वनाम तत्कुलं तदेव तत्कुलीयनानागुणनानापुरुषरूपरत्नाकरत्वात् समुद्रः, तत्सम्भवेन तदुत्पन्नेन कुमुदानन्दकरत्वात्, रोहिणीरमणेन चन्द्रेण, यद्वा रोहिणीनाम तत्पत्नी भद्रमनेन तद्वल्लभेन। अत्र यद्यपि महन्तं स्वप्रशंसयानुचितत्वेन प्रशस्ते नति वक्तुं न युक्तं तथापि हरेः प्रवणः यतो वा तथाभूतकुलसम्भूतः ततः पशस्त इति हेतुहेतुमद्भावनया जनयतोरुत्कर्षः पर्यवस्यतीति हृदयम्। यद्वा स्वार्थे स्वल्पार्थे वाक्प्रत्यय इति॥

११। अथ स्मरं सम्बोध्य विलपति—हे अनङ्ग स्मर हरभ्रान्त्या त्रिनयनभ्रमेण मयि न प्रहर प्रहारं न कुरु। भ्रमरोयसादृश्यं सन्दर्श्य तन्नाशकविशेषदर्शनाय भेदमावेदयति हृदीति। अयं पुरोवर्ती धर्मी हृदि हृदये बिसलताहारो मृणाललताहारः न तु भुजंगमनायकः सर्पश्रेष्ठो वासुकिरित्यर्थः। अत्रायतत्वस्य भुजङ्गराजसादृश्यदर्शनाय लतापदोपन्यासः, स च रूपकनामालंकारः। कण्ठे गले कुवलयदलश्रेणी श्यामलपत्रावली सा गरलस्य कालकूटस्य द्युतिः प्रभा न, इदञ्च मयि मलयजस्य चन्दनस्य रजो रेणुः न भस्म न भूतिः। अत्र च अङ्गरागीकृतसरसचन्दनस्य रजःपदोपन्यासेन नीरसताकथनेन सन्तापाधिक्यं सूचितमिति दर्शितम्। तदाह—'रजः परागे वेणौ च योषिताञ्च ऋतावपि।' अत्र सकलशरीरावास्तदेनैव मलयरजःसत्त्वान्न विशेषतोऽत्र अधिकरणोपादानं मयीत्येव च तत्राधिकरणतया वियोजितम्, अतो न रीतिभङ्गः। प्रियया रहितेत्युक्ते क्रुधा किमर्थं धारयसि। अनङ्गपदेन हरकृतानङ्गत्वस्याकरणेन धारणनिवृत्तौ हेतुरुक्तः। यद्वा नकारः सर्वत्र शिरश्चालने। तद्यथा अयं हृदि बिसलताहारो भुजङ्गनायको नेति अपितु भुजङ्गमनायक एव, एवं कुवलयदलश्रेणी नेति न अपितु कालद्युतिरेव, इदं मलयरजो नेति न अपितु भस्मैव, अतः हे अनङ्ग समानधर्मदर्शनेन हरभ्रान्त्या मयि न प्रहर, क्रुधा किमु धारयसि ? हरभ्रान्त्या व्युदासेनाप्रहरणे हेतुमाह मयि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पाणौ मा कुरु चूतसायकममुं मा चापमारोपय
क्रीडानिर्जितविश्व मूर्च्छितजनाघातेन किं पौरुषम् ।
तस्या एव मृगीदृशो मनसिज-प्रेङ्खत्कटाक्षाशुग—
श्रेणीजर्जरितं मनागपि मनो नाद्यापि सन्धुक्षते ॥१२॥

भ्रूपल्लवं धनुरपाङ्गतरङ्गितानि
बाणा गुणः श्रवणपालिरिति स्मरेण
तस्यामनङ्गजयजङ्गमदेवताया —
मस्त्राणि निर्जितजगन्ति किमर्पितानि ॥१३॥

किम्भूते ? प्रियारहिते प्रियया दयितया त्यक्त इत्यर्थः। एतेन कृष्णस्य बिसलतादौ सर्पादिनिर्णयेन तापातिरेको दर्शितः ॥

१२। हरभ्रान्त्या नाहं प्रहरामि किन्तु दुर्जयपौरुषाकांक्षयैवेत्याकांक्षायामाह हे क्रीडानिर्जितविश्व लीलाविजितभुवन मूर्च्छितजनाघातेन किं पौरुषं कः पुरुषकारः अपितु न किमपीत्यर्थः। तस्माद् अमुं चूतसायकं सहकारप्रसूनं शरं पाणौ करे मा कुरु मा चापमारोपय धनुः संघटय अर्थात्तत्रैव। आत्मनो मूर्च्छितत्वे हेतुमाह तस्या इति। तस्या एव राधाया एव मृगीदृशो हरिणीनयनायाः मनसिजेन कामेन प्रेङ्खतां चलतां कटाक्षाशुगानां कटाक्षबाणानां श्रेण्या जर्जरितं खण्ड-खण्डीभूतं मम मनः चित्तं नाद्यापि सन्धुक्षते अद्य पर्यन्तमपि न स्वस्थमित्यर्थः। तथास्माकं मारणे हतमारणं भवतां न पौरुषमिति भावः ॥

१३। स्मृतिविषयप्रियतमातदङ्गपातितो वितर्कयति। किमुत्प्रेक्षायाम्। स्मरेण कामेन इति शस्त्राणि तस्य ! राधायां किमर्पितानि न्यासीकृतानि ! कथम्भूतायां राधायाम् ? अनङ्गस्य कामस्य जये त्रैलोक्यविजये जङ्गमदेवतायाम्। अस्त्राणि कीदृशानि ? निर्जितानि निःशेषेण जितानि जगन्ति यैस्तानि। अन्योऽपि विजयानन्तरं निजास्त्रम् इष्टदेवतायै अर्पयतीति अनुभवोऽपि। कानि तदस्त्राणि ? भ्रुवावेव पल्लवे तदेव धनुरिति रूपकरूपकम्। तथा च दण्डी-'मुखपङ्कजरङ्गेऽस्मिन् भ्रूलतानर्तकी तव। लीलानृत्यं करोतीति रम्यं रूपकरूपकम् ॥' अपाङ्गितरङ्गितानि कटाक्षानि वीक्षणानि बाणा हृदयभेदकत्वात् ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्मव्यथां
श्यामात्मा कुटिलः करोतु कवरीभारोऽपि मारोद्यमम्।
मोहन्तावदयञ्च तन्वि तनुतां विम्बाधरो रागवान्
सद्वृत्तस्तनमण्डलस्तव कथं प्राणैर्मम क्रीडति ॥१४।

तानि स्पर्शसुखानि ते च तरलाः स्निग्धा दृशोर्विभ्रमास्
तद्वक्राम्बुजसौरभं स च सुधास्यन्दी गिरां वक्रिमा।
सा विम्बाधरमाधुरीति विषयासङ्गेऽपि चेन्मानसं
तस्यां लग्नसमाधि हन्त विरहव्याधिः कथं वर्धते ॥१५॥

सारवती

१४। ध्यानलब्धाया राधायाः पुरः सञ्जातविस्मयः पुनर्विलपति—हे तन्वि कृशाङ्गि! भ्रूचापे भ्रूधनुषि निहित आरोपितः कटाक्षो दृगन्तवीक्षणं तदेव विशिखः बाणो मर्मव्यथां मर्मपीडां निर्मातु करोतु। तथा च चापनिहितबाणस्य मर्मपीडनं योग्यमेव। यद्वा विगता शिखा मर्यादा यस्य इति विशिखो निर्मर्यादः। यदाह—मर्यादाया-मर्धवृद्धौ शिखा स्यात्केशवेऽपि च। तथा च निमर्यादस्य मर्मपीडनमुचितमेव। कवरी-भारोऽपि केशचयोऽपि मारोद्यमं कन्दर्पोद्योगं करोतु। यद्वा मारः मरणम्, भावे घञ्। तदुद्यमं करोतु। कीदृशः? श्यामात्मा नीलस्वभावः। पुनः किम्भूत? कुटिलः कुञ्चितः। अन्योऽपि श्यामात्मा निन्दितः कुटिलो वक्राशयः परेषां मारणङ्करोतीत्युचितमेव। अयञ्च विम्बाधरो विम्बप्रायोऽधरः मोहं चित्तक्षोभं तनुतां विस्तारयतु। कीदृशः? रागवान् लौहित्ययुक्तः। अन्योऽपि रागवान् द्वेषशीलः सम्मोहं परेषां तनुत इत्युचितमेव। सद्वृत्तः सुवर्तुलः तव स्तनमण्डलः मम प्राणैः कथं क्रीडति कथं जीवितापहो भवतीत्यर्थः। न हि सद्वृत्तः उत्तमचरितः परपीडां करोतीति भावः। स्तनमण्डल इत्येकवचनं सामान्या-भिप्रायेण। 'चरिते वर्तुले वृत्तमि'ति शाश्वतः॥

१५। ममायं हृदयखेदो न दृष्टचरः तदन्यदेव किञ्चिदत्र बीजमिति मनसि कृत्वाह—तस्यां राधायां मानसम् अर्थात् मम लग्नसमाधि प्राप्तध्यानञ्चेत्यादि। अतएव तानि स्पर्शसुखानि इत्यादि स्मरणे क्रमेण विषयासङ्गे सत्यपि। हन्त खेदे। विरहव्याधिः कथं वर्तते कथं तिष्ठतीत्यर्थः। तथा च विषयसान्निध्यनिबन्धनो यदि विशेषः खेदः स्यात् तदा तत्सान्निध्यशमित एव स्यादित्यन्यदेवात्र बीजमिति भावः। यद्वा तानि पूर्वभूतान्येव स्पर्शशुखानि तरलाः चञ्चलाः स्निग्धाः ते पूर्वानुभूताःदृशश्चक्षषोः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तिर्यक्कण्ठविलोलमौलितरलोत्तंसस्य वंशोच्चरद्-
गीतिस्थानकृतावधानललनालक्षैर्न संलक्षिताः।
संमुग्धमधुसूदनस्य मधुरे राधामुखेन्दौ मृदु-
स्पन्दं कन्दलिता[T]श्चिरं ददतु वः क्षेमं कटाक्षोर्मयः ॥१६॥

इति श्रीगीतगोविन्दे महाकाव्ये मुग्धमधुसूदनो नाम तृतीयः सर्गः ॥

सारवती

विभ्रमाः पूर्वानुभूतं वक्त्राम्बुजसौरभम्। स च पुर्वान्दनंनुभूत एव सुधायाः पीयूषस्य स्यन्दनं क्षरणं यत्र एतादृशः गिरां वक्रिमा वचनभङ्गिः सा। पूर्वानुभूता बिम्बाधरमाधुरी बिम्बवदधरस्य मधुरता इत्यनेन रमणप्रकारेण स्पर्शरूपगन्धशब्दरसादिरूपाणां पञ्चविषयाणामसङ्गेऽपि निरन्तराननुभवेऽपि चेन्मानसम् अर्थान्मम तस्यां राधायां लग्नसमाधिः प्राप्तध्यानं हन्त कान्तविरहव्याधिः विश्लेषरूपव्याधिः तदा कथं वर्तते तिष्टतीत्यर्थः। न हि यस्य ध्यानेन विषयासङ्गोऽपि न बाधकः तं व्याधिर्बाधत इत्यभिप्रायः ॥

१६। ग्रन्थप्रक्रमं त्यक्त्वा सर्गान्ते जनानामाशिषमाह। मधुसूदनस्य कटाक्षोर्मयः कटाक्षतरङ्गा वो युष्माकं क्षेमं कल्याणं ददतु प्रयच्छन्तु। कथम्भूताः? मधुरे मनोहरे राधामुखेन्दौ राधिकावदनचन्द्रे संमुग्धं यथा स्यादेवं मृदुस्पन्दम् ईषत्सञ्चरणं यथा स्यादेवं पल्लविताः प्रसृताः। पुनः किम्भूता? वंशे वेणौ उच्चरन्त्याः उद्गच्छन्त्या गीतेर्गानस्य स्थानेषु गानपदेषु कृतावधानानां दत्तमनसां ललनानां रम्यस्त्रीणां लक्षैः समूहैः न संलक्षिता आकलिताः। कीदृशस्य मधुसूदनस्य? वंशीवादनेन तिर्यक् वक्रः कण्ठो यस्य, विलोलः चञ्चलः मौलिः किरीटो यस्य, तरलः चञ्चलः उत्तंसः कर्णपूरो यस्य स तथा। पश्चात्कर्मधारयः। 'उत्तंसः कर्णपूरेऽपि सुन्दरे नायकेऽपि चे'ति धरणिः। 'विशेषास्त्वङ्गना भीरुः कामिनी वामलोचना। प्रमदा भाविनी' कान्ता ललना च नितम्बिनी'त्यमरः॥ 'कुशलं क्षेममस्त्रियामि'त्यमरः। मुग्धमधुसूदनो मोहयुक्तो मधुसूदनो यत्रे'ति व्युत्पत्त्या मुग्धमधुसूदनो नाम सर्गः ॥

इति समस्तप्रक्रियाविराजमानमहाराजशुक्लध्वजविरचितायां सारवत्यां गीतगोविन्दटीकायां तृतीयः सर्गः ॥

[T] टीकानुसारं 'पल्लविताः' इति पाठः स्यात्।
* 'मानिनी' इति पाठान्तरम्।

—:—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सटीक-गीतगोविन्दम्

चतुर्थसर्गः

॥ स्निग्धमधुसूदनः ॥

यमुनातीरवानीरनिकुञ्जे मन्दमास्थितम् ।
प्राह प्रेमभरोद्भ्रान्तं माधवं राधिकासखी ॥ १ ॥

॥ कर्णाटरागेण गीयते ॥

निन्दति चन्दनमिन्दुकिरणमनुविन्दति खेदमधीरं ।
व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरम् ॥
सा विरहे तव दीना
माधव मनसिजविशिख भयादिव भावनया त्वयि लीना ॥ ध्रुवम् ॥२॥

माधवी

१। अथ राधाविरहवर्णनाय प्रसङ्गमवतारयति। उत्कण्ठिताया राधायाः सखी माधवं गीतेन वक्ष्यमाणं प्राह। यदाह—'अनेककार्यसंयुक्तो यस्य नागच्छति प्रियः। तदानागमदुःखार्त्ता समेतोत्कण्ठिता यथा ॥' सखी चात्र निसृष्टार्था दूती बोद्धव्या। तल्लक्षणं साहित्यदर्पणे—उभयोर्भावमुन्नीय स्वयम्वदति चोत्तरम। सुश्लिष्टं कुरुते कार्यं निसृष्टार्था तु सा मता ॥* माधवं कीदृशम्? यमुनातीरवानीरकुञ्जे कालिन्दीकुले वेतसोपरिलक्षितलतागृहे मन्दं मधुरं जडतायुक्तमिति यावत्, एवं यथा स्यात्तथा आस्थितमुपरिस्थम्। पुनः किम्भूतम्? प्रेमभरेण स्नेहातिशयेनार्थाद्राधायाः उद्भ्रान्तं चञ्चलचित्तमित्यर्थः। 'मन्दं स्वैरे विलम्बे च अलसेऽपि च कीर्तितमि'ति विश्वः ॥

२। गीतस्य कर्णाटरागः। एकतालीतालः। रागलक्षणं यथा—कृपाणपाणिर्गजदन्तपत्रमेकं वहन् दक्षिणकर्णपूरे। संस्तूयमानः सुरचारणौघैः कर्णाटरागः शिखिकण्ठलीलः ॥ माधवं सखी प्राहेति यदुक्तं तदाह—हे माधव सा राधा तव विरहे सति दीना दुःखिता भावनया तदेकात्मचिन्तनेन त्वयि लीना संगुप्ता भवतीत्यर्थः। किमर्थम् अत्रोत्प्रेक्षते—मनसिजः कामः तस्य विशिखो बाणः तस्य भयादित्यर्थः। अन्योऽपि शरपतनभयेन कस्मिंश्चिदप्याश्रये निह्नुत्य तिष्ठतीति युक्तम्। तदनेन त्वयि लीनायां तस्यां शरपातेन भवानपि बिद्धः स्यादिति सूचितम्। अपि किं करोति? चन्दनं मलयजं निन्दति। निदि कुत्सायां धातुः। इन्दुकिरणमनु लक्षीकृत्य खेदमन्तस्तापम् अधीरं चाञ्चल्यसहितं यथा स्यादेवं विन्दति लभते। मलयसमीरं गरलमिव कलयत्यवधारयति। अत्रोत्प्रेक्षते—व्याल्याः सर्पाः

---

* लक्ष्मीटीकाविराजिते साहित्यदर्पणे 'निसृष्टार्था तु सा मता' इत्यस्य स्थाने 'निसृष्टार्थस्तु स स्मृतः' इति पाठः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अविरलनिपतितमदनशरादिव भवदवनाय विशालम् ।
स्वहृदयमर्मणि वर्म करोति सजलनलिनीदलजालम् ॥ (सा विरहे०) ॥३॥
कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयम् ।
व्रतमिव तव परिरम्भसुखाय करोति कुसुमशयनीयम् ॥ (सा विरहे०) ॥४॥

सारवती

तेषां निलयः आश्रयः चन्दनद्रुमः तस्मिन् मिलनेन सम्बन्धेन वेत्यर्थः ननु । व्यालनिलयमिलनेनेत्यनेन एकत्रैव हेतूपन्यासः कृत इति वैषम्यं स्यादिति चेन्न, सर्वत्रैव विरहस्य हेतुत्वात् व्यालनिलयमिलनेनेत्युत्प्रेक्षामात्रम् । तस्यास्तु स्वेच्छाधीनतया सर्वत्राकरणेऽपिदोषाभावादिति गरलमिवा कलयतीति मलयसमीरस्य दुःखविशेषजनकत्वाभिधानत्वात् तथोत्प्रेक्षितमित्यवधेयम् । सन्तापकत्वात् विशेषेणऽपि कविसम्प्रदायेन कस्यचिदुत्कर्षवर्णने दोषाभावः । तथा च कर्पूरमञ्जरी—चिरं+जोण्हा उण्हा गरलसरिस इत्यादि । जगद्धरादयस्तु व्यालनिलयो मलयगिरिः तत्र चन्दनस्य मिलनेन जन्मना चन्दनं निन्दति । व्यालनिलयः सर्पाश्रयः महेशः तत्र मिलनेन चन्द्रकिरणमनु लक्षीकृत्य खेदमधीरञ्चेति यथा स्यादेवं विन्दति । मलयपवनपक्षे तु सुगममेवेति व्याचक्षते । तत्र व्यवस्थितानुसङ्गे प्रमाणाभावः पूर्णचन्द्रस्य महेशगिरः सम्बन्धाभावेन सन्तापकत्वालाभश्चेत्यादि दूषणमवधारणीयम् ॥

३। राधायाः कृष्णमात्रप्रियत्वं दर्शयति । स्वस्यं हृदस्यं स्वहृदयं तदेव मर्मस्थानमिति विग्रहः । सा राधा स्वहृदयमर्मणि सजलनलिनीदलजालं पानीयसहितपद्मपत्रसमूहं वर्मसम्वाहं करोति । अतिशैत्यप्रतिपादनार्थं सजलेति विशेषणम् । किम्भूतम् ? विशालं महत्तरं क्षुद्रेण स्तनपरिनाहस्यावधारणासम्भवेन हृदयाच्छादनाभावात् विशालेत्युक्तमिति भावः । किमर्थं वर्म करोतीत्यत आह—भवदवनाय भवतो रक्षणाय, न तु निज रक्षणार्थमित्यन्यत्रौदास्यं दर्शितमिति भावः । अव रक्षणे धातुः । कुतः सकाशाद् वक्ष्यमाणमित्यत आह—अविरलं निपतितं निपतनं यस्य भावे क्तः, तथा अविरलः निपतितश्चासौ मदनशरश्चेति अविरलनिपतितमदनशरस्तस्माद् अविरलं निरन्तरं निपतितो यो मदनशरः कामबाणस्तस्मादिति जगद्धरः । तन्मते निपतितबाणाद्रक्षार्थं वर्मकरणमुचितमिति ध्येयम् । राधाहृदयस्थ एव चेत् कृष्णः तदा कथं तस्या विरह इति न वाच्यं विरहोपशमहेतुसङ्गमालाभात् । 'जाले नीपद्रुमे जाली कोषातक्यामुदाहृतम् । गवाक्षे च तथानाये क्षारके कुम्भवृन्दयो*रि'ति ॥

४। अपि किङ्करोतीत्यत आह । कुसुमानि तच्छयनीयं शयनोपहितञ्चेति कुसुमशयनीयम् । सा राधा कुसुमशयनीयं कुसुमशय्यां करोति । किमिव ? कुसुमविशिख

\+ 'परमि'ति पाठान्तरम् ।

* 'दन्तवृन्दयोरि'ति मेदिनी।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वहति च वलितविलोचनजलभरमाननकमलमुदारम् ।
विधुमिव विकटविधुन्तुददन्तदलन*गलितामृतधारम् ॥ ('सा विरहे॰) ॥ ५ ॥
विलिखति रहसि कुरङ्गमदेन भवन्तमसमशरभूतम् ।
प्रणमति मकरमधो विनिधाय करे च शरं नवचूतम् ॥ (सा विरहे॰) ॥ ६ ॥

सारवती

शरतल्पं व्रतमिव। किमर्थं व्रतं करोतीत्यत आह तव परिरम्भसुखाय तवालिङ्गनसुखार्थम्। अत्र परिरम्भपदस्य नित्यसाकाक्षत्वाद् असमस्तेनापि तवेतिपदेनान्वयानुभावकत्वम्, यथा तस्याः सान्द्र-विलेपनस्तनतटप्रश्लेषमुद्राङ्कितं किम्वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यत इत्यादौ अतिवीरेण भीष्मेनापि प्राणनिरपेक्षेण शरतल्पव्रतमाचरितमिति तदाचरणं सूचितमेवेति भावः। कीदृशं शयनीयम्? अनल्पविलासकलाभिर्बहुतरक्रीडाशिल्पैः कमनीयं मनोहरमित्यर्थः। यद्वा पुष्पशयनीयमतिसुखदमिति सकललोकप्रसिद्धमेवेति सा किं दुष्करं करोतीत्याशंक्याह-कीदृशं शयनीयम? अनल्पा अतिशयिता सुविमलकला शृङ्गारचेष्टा सुकमनीयं वाञ्छनीयं न तु विरहावस्थायामिति भावः। तथा तापशान्त्यभिप्रायेन कुसुमशयनीयं कृतं तदेव शरतल्पव्रमिव जातमित्युत्प्रेक्षालंकारः। तल्पं शय्याट्टदारेष्विति मेदिनीकारः॥

५। अपि किङ्करोतीत्याशंक्याह। चशब्दः समुच्चये। सा राधा आननकमलं मुखपद्मं वहति पाणिनेत्यर्थाल्लभ्यते। कीदृशम्? वलितः संलग्नो विलोचनयोर्जलभरो जलपूरो यत्र एतादृशम्? वलितविलोचनजलधरमिति बहुषु पाठः। तत्पक्षे वलितः सम्भक्तः, विलोचने चक्षुषी एव जलधरो वर्षकमेघो यत्रेति उत्प्रेक्षा। एतादृशं तथा चाविरतं रोदितीति वाक्यार्थः। उदारं महान्तम्। किमिव? पूर्णत्वात् विधुमिव चन्द्रमिव। कीदृशम्? विकटाः करालाः ये विधुन्तुददन्ताः तैर्दलितः विकटविधुन्तुददन्तदलितः अत, एव गलितामृतधारा यस्य स भवति गलितामृतधारः। विकटविधुन्तुददन्तदलितश्चासौ गलितामृतधारश्चेति स तथा तम् दन्तदलनगलितामृतधारमिति बहुषु पाठः। तत्पक्षे विकटानां विधुन्तुददन्तानां दलनैर्गलिता अमृतधारा यस्य एतादृशमित्यर्थः। अत्रोभयपक्षेऽपि दन्तपदोपादानंस्वरूपकथनाय दलनस्याव्यक्तत्वलाभार्थमेवेत्यवधेयम्। इयञ्चाद्भूतोपमा बोद्धव्या, बाहुदन्तदलनगलिताभृतधारात्वस्य चन्द्रस्याप्रसिद्धेः। न च कमलेनोपमितस्य चन्द्रेणोपमायां विरोधः, सादृश्यविशेषलाभार्थं तत्सम्भवात्। 'धारा सन्याग्रिमस्कन्धे सन्ततौ पत्तनान्तरे। द्रवद्रव्यप्रपाते तु तुरङ्गगतिपञ्चके। खड्गादीनाञ्च निशितमुखाग्रे परिकीर्तिता' इति॥

६। अपि किङ्करोतीत्यत आह। सा राधिका रहसि निभृतस्थाने कुरङ्गमदेन कस्तूरिकया असमशरभूतं कामदेवरूपं भवन्तं विलिखति। अधः पादतले मकरं विनिधाय

---

* टीकानुसारं 'दलन' इत्यस्य स्थाने 'दलित' इति पाठः स्यात्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रतिपदमिदमपि निगदति माधव तव चरणे पतिताहम् ।
त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहम् ।। (सा विरहे०) ।।७।।
ध्यानलयेन पुरः परिकल्प्य भवन्तमतीव दुरापम् ।
विलपति हसति विषीदति रोदिति चञ्चति मुञ्चति तापम् ॥ (सा विरहे०) ।।८।।

माधवती

च पुनः करे नवचूतं नूतनचूतांङ्कुरं शरं विनिधाय अतएवासमशरभूतं कामस्वरूपं निजरक्षार्थं प्रणमति । अनेन कान्तप्रतिकृतिलिखनेन देवताराधनादिविरहिनीव्यापारो राधायाः दर्शितः । तदुक्तं भारते 'देवतानमनं कुर्याद्दद्याद्बलिभुजो बलिम् । लिखेत्कान्तप्रतिकृतिं पाठयेत् शुकसारिकाः ।। गणयेच्चावधिदिनं गीतं गायेत्तदङ्कितः । एवम्विधनिनादेन नयेत्कालं वियोगिनो ।।' इति । तथा च पुष्पशरमकरवाहनमतः सकाशात् कृष्णस्य भेद इति दर्शयता तस्य सौन्दर्यातिशयो राधाया उत्कण्ठितातिशयश्च दर्शितः । 'मृगनाभिमृगमदौ गन्धशेखर' इति हारावली ।।

७। अपि किङ्करोतीत्यह आह । हे माधव तव चरणेऽहं पतिता सा राधा इति प्रतिपदमपि प्रतिस्थानमपि निगदति वदति । मा लक्ष्मीः तस्याः धवः माधवः स्वामीति माधवपदोपन्यासेन कृष्णस्यौदास्ययोग्यता दर्शिता । यद्यहमुदासीनस्तदा कथमेवमस्माकमनुनयङ्करोतीत्याशंक्याह—त्वयि विमुखे पराङ्मुखे सति सपदि तत्क्षणमेव सुधाश्रयोऽपि चन्द्रः तनुदाहं शरीरदाहं तनोति विस्तारयति । अत्र स्वभावसन्तोषकसुधानिधिश्चेद्दहत्यन्येषां का वार्ता इत्यपिना द्योत्यते, तथा त्वयि विप्रतीपे सर्वमेवास्माकं सहसैव विप्रतीपं भवतीति अनयेत्येव भवदनुनयः क्रियत* इति भाव: । तदुक्तम्—येन विना न जीविज्जि अनुनिज्जि अशोकआ ववाहोपि । पत्तिरिरेण सुवडा हेतु नकसुनवन्महे अग्नी ।।
पदं व्यवसिति त्राणस्थान लक्ष्म्याङ्घिवस्तुष्विति ।।

८। अपि किङ्करोतीत्यत आह । सा राधा भवन्तमतीव दुरापं अतीव दुर्लभम् अतएव ध्यानसंश्लेषेण ध्यानेन या एकचित्तता तया इत्यर्थः, पुरोऽग्रे परिकल्प्य उपस्थितं कृत्वा विलपति कथं त्वमप्यस्माकमेवंजात इत्यादिप्रकारेण विलापङ्करोतीत्यर्थः । तदनन्तरं हसति स एवायं कृष्णः सर्वगोपीर्विहाय मम पुरतः तुष्णीं तिष्ठतीति मद्भीत्या न किञ्चिदभिवत्त इति हासं करोतीत्यर्थः । तदनन्तरं विषीदति कथमेतावत्कालं मम सम्मुखे स्थित्वापि मदीयालिङ्गनचुम्बनार्थं न यतत इनि विषादं करोतीत्यर्थः । तदनन्तरं रोदिति आलिङ्गनचुम्बनाद्यर्थं यत्नं मा करोतु सम्भाषणमपि न करोतीति रोदनं करोति । तदनन्तरं चञ्चति दूरस्थितास्मीति यथोचितव्यवहारं न करोतीत्यभिप्रेत्य

---

* 'अनाय इत्येव भवदनुनय इति क्रियत' इति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयम् ।
हरिविरहाकुलवल्लवयुवतिसखीवचनं पठनीयम् ॥ (सा विरहे०) ॥९॥

आवासो विपिनायते प्रियसखीमालापि जालायते
तापोऽपि श्वसितेन दाववहनज्वालाकलापायते ।
सापि त्वद्विरहेण हन्त हरिणीरूपायते हा कथं
कन्दर्पोऽपि यमायते विचरयञ्शार्दूलविक्रीडितम् ॥१०॥

सारवती

त्वदत्यन्तसमीपं गच्छतीत्यर्थः। तदनन्तरं तापं मुञ्चति मया चिरकालमियं विरह-दुःखानुभावितेति लज्जितः साम्प्रति सम्भाषणादिकं न करोति कालान्तरेषु गतलज्ज सकलं ममाभिलाषं पूरयिष्यतीति सन्तापं त्यजतीत्यर्थः। वस्तुतस्तु निकटङ्गताविशेषदर्शनेन मोहमापन्ना पूर्वोत्पन्नं सन्तापं त्यजतीत्येवार्थः। अत्र विलपति हसतीत्यादिना किञ्चिद्भावो दर्शितः॥

९। कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं गीतमुपसंहरति। हे सामाजिकाः! श्रीजयदेवभणितं गीतं मनसा चित्तेन अधिकं यथा स्यादेवं नटनीयं नर्त्तनीयम् आदरणीयम्वा। तदाह हरिविरहेनाकुलाया वल्लवयुवत्या राधायाः सखीवचनमिदं पठनीयं भवद्भिरिति शेषः। तथा च यदि जयदेवभणनेन मनसा कुत्रापि नर्त्तनाभिलाष आदरो वा तदा प्रकृतगीतमनुसरणीयमित्येतद् गीतस्तुतिरिति भावः। 'नटनं स्यादादरेऽपि नृत्ये लास्ये च सम्मुख' इति शाखतः॥

१०। भवत्वेवं विलम्बेन तस्याः समीहितं सम्पादयिष्यामीति कृष्णवचनमाशंक्य राधायाः कालक्षेपमुपदर्शयति। हन्त खेदे। हे कृष्ण त्वद्विरहेण भवद्विश्लेषेण तस्याः राधाया आवासो विपिनायते भवन्तम्विना शून्यतया अरण्यमिवाचरति। प्रियसखीमां-लापि स्निग्धसखीश्रेण्यपि स्वच्छन्देत ततो गमनविधातकतया जालायते जालवदाचरति। तापोऽपि देहदाहोऽपि श्वसितेन दाववहनज्वालासमूहवदाचरति। अन्योऽपि वह्निः वायुना भवतीति युक्तैवोत्प्रेक्षा। साऽपि राधाऽपि अस्मिन्नवसरे हरिणीरूपायते मृगीरूपवदाचरति, यथा वने जलेन दावानलेन च वेष्टिता मृगी व्याकुला भवतीति तद्वदित्यर्थः। हा कष्टे। कथं सम्भ्रमे। कन्दर्पोऽपि कामोऽपि शार्दूलविक्रीडितं व्याघ्रचेष्टितं विरचयन् यमायते मृत्युरिवाचरति ताम्प्रतीत्यर्थात्। तथा च यदि तदनुकूलमाचरति तदा सा जीवति न परञ्चेति भावः। अत्रैवम्विधे कठिने त्वयि तथाविधस्नेहवती राधेति हरिणीरूपायत

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ देशाख्यराग-एकतालीतालाभ्यां गीयते ॥

स्तनविनिहितमपि हारमुदारम् ।
सा मनुते कृशतनुरतिभारम् ।
राधिका विरहे तव केशव ॥ ध्रुवम् ॥११॥
सरसमसृणमपि मलयजपङ्कम् ।
पश्यति विषमिव वपुषि सशङ्कम् ॥ (राधिका०) ॥१२॥
श्वसितपवनमनुपमपरिणाहम् ।
मदनदहनमिव वहति सदाहम् ॥ राधिका० ॥१३॥

सारवती

इत्यनेन तस्याः पशुत्वमुपदर्शितम् । शार्दूलविक्रीडितमेव छन्दो नाम इत्यपि छलेनोपदर्शितम् । राधाया व्याध्यवस्था च दर्शिता । तथा च भावलतायाम्—'सन्तापवेदनाप्रायो दीर्घश्वास-समाकुलः । तनूकृततनुर्व्याधिरष्टमो जायते ध्रुवमि'ति । 'जालमाल्यवृन्दयोरि'त्यमरः ॥

११। अस्मिन् गीतस्य देशाख्यरागः । एकताली तालः । रागलक्षणम्—'आस्फोटनाविष्कृतलोमहर्षो विषाणसन्नद्धविशालबाहुः । पाण्डुः कपोतद्युतिहेमगौडो देशाख्यरागः किल मन्दराजः ।' एकतालीतालः । भूयोऽपि गीतेन राधायाः स्वरूपमाह सखी—हे केशव ! सा राधा तव विरहे विश्लेषे स्तनविनिहितमपि पयोधरार्पितमपि हारम् उदारम् अतिशयितं भारं मनुते मन्यते । मनुरवबोधने । तथा चान्यत्र काचित् प्राग्धृततयाऽनभ्यासेन हारस्य भारवृद्धिर्भवितुमर्हतीति स्तनयोर्निरन्तरंधारणेऽपि तथा बुद्ध्या अत्यन्तविह्वलता दर्शिता । कीदृशी ? अतिकृशतनुः त्वद्विरहेण तनुतरशरीरेत्यर्थः । जगद्धरादयस्तु सा कृशतनुः विरहक्षीणदेहा स्तनविनिहितं कुचयोरर्पितमुदारं महान्तं हारमपि अतिभारं मनुते जानातीति व्याचक्षते । तत्पक्षे हारस्योदारत्वविशेषणो प्रकृतानुपयोग इत्यवधेयम् ॥

१२। अपि किङ्करोतीत्यत आह—सा राधा सरसः सजलो मसृणः स्निग्धश्चेति सरसमसृणः । एवम्भूतमपि मलयजपङ्कं चन्दनरूपकर्दमं । शीतलत्वसुस्पृष्टत्वादिभिश्चन्दनं पंकत्वेन निरूपितमित्यवधेयम् । वपुषि शरीरे विषमिव गरलमिव सशङ्कं यथा स्यादेवं पश्यति प्रेक्षते । 'पङ्कः पापे च कर्दम' इत्यमरः । 'शङ्का भीतौ च संशय' इति धरणिः ॥

१३। अपि किङ्करोत्य आह—अनुपमपरिणाहम् अतिशयिताभोगं सदाहं दाहसहितं श्वसितपवनं निःश्वासवातं सा वहति । कमिव ? मदनदहनमिव कामसम्बन्ध्यग्निमिव अतएवो-पमानोपमेयाभावान्न सदाहमित्यत्रार्थ पुनरुक्तिः । 'आभोगे परिणाहः स्यादि'ति शाश्वतः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दिशि दिशि किरति सजलकणजालम् ।
नयननलिनमिव विगलितनालम् ॥ राधिका० ॥ १४ ॥

त्यजति न पाणितलेन कपोलम् ।
बालशशिनमिव सायमलोलम् ॥ राधिका० ॥ १५ ॥

नयनविषयमपि किशलयतल्पम् ।
पश्यति विहितहुताशविकल्पम् ॥ राधिका० ॥ १६ ॥

हरिरिति हरिरिति जपति सकामम् ।
विरहविहितमरणेव निकामम् ॥ राधिका० ॥ १७ ॥

सारवती

१४। अपि किङ्करोतीत्यत आह—सा राधिका दिशि दिशि सर्वासु दिक्षु नयननलिनं नेत्रकमलं किरति क्षिपति । कीदृशम् ? सजलकणजालं जलकणजालेन अश्रुविन्दुनिकरेण सह वर्तमानं तथा चाविरलाश्रुधाराया विरामे तव दर्शनवाञ्छया सर्वतः पश्यतीति वाक्यार्थः। अतएवानुरूपमुत्प्रेक्षते—किमिव ? नयननलिनं विगलितनालमिव । अन्यस्मादपि भ्रूकुटिलनालपद्माज्जलकणजालं गलतीति अश्रुधारारूपनालेन वर्द्धितजलकणजालान्वितं नयननलिनं विगलितनालत्वेन युक्तमुत्प्रेक्षितमित्यवधेयम् ॥

१५। अपि किङ्करोतीत्यत आह—सा पाणितलेन कपोलं गण्डस्थलं न त्यजति न मुञ्चति । कीदृशम् ? अलोलं निश्चलम् । तेन चिन्ताकुलता दर्शिता । कमिव ? सायं सन्ध्यासमये बालशशिनमिव द्वितीयाचन्द्रमिव । द्वितीयाचन्द्रास्येन क्षीणत्वं मृगमदतिलकादिराहित्यञ्च कपोलस्य दर्शितम् । सायंकालीनत्वप्रतिपादनेन पाणितलस्य लोहितत्वं दर्शितमित्यवधेयम् ॥

१६। अपि किङ्करोत्यत आह -नयनविषयमपि लोचनगोचरमपि किशलयतल्पं नवदलशयनं विहितहुताशविकल्पं विहितो हुताशस्य दहनस्य विकल्पो यत्र इत्येवम्भूतं गणयति विकारयतीत्यर्थः। सर्वस्य विचारस्य संशयपूर्वत्वादिति भावः । प्रकृते तु वह्नित्वसाधकहेतूपन्यास एव विचार इत्यवधेयम् । गणसंख्याने धातुः । 'संख्या विचारणा चर्चे'त्यमरः ॥

१७। अपि किङ्करोतीत्यत आह—सकामं साभिलाषं यथा स्यादेवं निकामम् अत्यर्थेन हरिरिति हरिरिति जपति ब्रूते । केव ? विरहेण विश्लेषेण अर्थात्तव, विहितमरणेव निष्पादितमृत्युरिव । अन्योऽप्यासन्नमृत्युर्हरिरिति हरिरिति जपत्येवेति ध्वनिः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीजयदेवभणितहरिगीतम् ।
सुखयतु केशवपदमुपनीतम् ॥ राधिका० ॥१८॥

सा रोमाञ्चति शीत्करोति विलपत्युत्कम्पते ताम्यति
ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मूर्च्छत्यपि ।
एतावत्यतनुज्वरे वरतनुर्जीवेन्न किन्ते रसात्
स्ववैद्यप्रतिम प्रसीदसि यदि त्यक्तोऽन्यथाऽन्तकः ॥१९॥

सारवती

१८। कोर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं गीतमुपसंहरति। श्रीजयदेवभणितहरिगीतं श्रीयुक्तजयदेवकृतहरिविषयकगीतं कर्तृ सुखयतु श्रोतृजनानामित्यर्थः। कीदृशम्? केशवपदमुपनीतं कृष्णचरणयोः समीपं प्रापितमित्यर्थः। तथा च ध्यानवशाज्जयदेवेन कृष्णचरणे समर्पितमित्यर्थः। यद्वा केशवे पदं ध्यानादिर्व्यवसायो यस्य स वैष्णवः, तमुपनीतं तं प्रापितमित्यर्थः। 'पदं स्थाने च वाक्ये च सन्निधिव्यवसाययोरि'ति विश्वः॥

१९। त्वदङ्गसङ्गमादवश्यं सा जीविष्यतीति श्रीकृष्णं बोधयति—हे स्ववैद्यप्रतिम अश्विनीकुमारसदृश! यदि प्रसीदसि प्रसन्नो भवसि तदा सा राधा एतावति ईदृशे। सर्वनामपदोपन्यासेन विशिष्टानिवर्चनीयत्वं दर्शितम्। अतनुज्वरेऽनङ्गतापे ते तव रसात् अनुरागात् किन्न जीवेत् अपितु जीवेदेव। अश्विनीकुमारसादृश्यं कृष्णसौन्दर्येण। अतनुपदेन कन्दर्पस्योपन्यासेनाशरीरतया अदृश्यत्वेन तज्जनितसन्तापस्याशक्यनिवारणीयत्वं सूचितम्। तथा चान्योऽपि कदाचित् स्ववैद्यप्रतिमस्य आयुर्वेदविशारदस्य रसादौषधविशेषाज्जीवतीति सकलप्रसिद्धमेव। किन्तज्जीवनेन हितमित्याशंक्याह—कीदृशी? वरतनुः। वरा श्रेष्ठा तनुः शरीरं यस्याः सा वरतनुः। श्रेष्ठत्वस्य सावधित्वेनावधेश्चाकथनेन व्युत्पत्तिबलेन जगत एव श्रेष्ठत्वं लभ्यते। तथा च तन्मरणेन जगदेवासारं स्यादिति भावः। अन्यथा त्वद्रसाभावे हस्तको वाद्योपचारो नलिनीपत्रदानादिः त्यक्त उपेक्षितः। तेन न कोऽपि उपकारः स्यादिति तात्पर्यम्। त्यक्तो नान्यथा नान्तक इति बहुषु पाठः। तत्पक्षे अन्यथा यदि न प्रसीदसि तदा अन्तको यमः न त्यक्तः तया भविष्यतीत्यर्थात्। तथा च नायिकान्तरं तामपहाय तय्यनुसृते सापि भवन्तं विहाय यमानुसरणं करिष्यतीति वाक्यार्थः। कामज्वरस्य लक्षणमाह—सा राधिका रोमाञ्चति रोमाञ्चं करोतीत्यर्थः। सर्वधातुभ्यः क्विब्वा वक्तव्य इति क्विप्। किबन्ता धातुत्वं न जहतीति धात्वर्थेन भादयः। तथा च प्रकृते रोमाञ्चं करोतीत्यर्थः। शीदिति अनुकरणशब्दः, तं करोति विदधातीत्यर्थः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कन्दर्पज्वरसंज्वरातुरतनोराश्चर्यमस्याश्चिरं
चेतश्चन्दनचन्द्रमः कमलिनीचिन्तासु संताम्यति ।
किन्तु क्षान्तिरसेन* शीतलतनुं त्वामेकमेव प्रियं
ध्यायन्ती रहसि स्थिता कथमपि क्षीणा क्षणं प्राणिति ॥२०॥
क्षणमपि विरहः पुरा न सेहे
नयननिमीलनखिन्नया यया ते ।
श्वसिति कथमसौ रसालशाखां
चिरविरहेण विलोक्य पुष्पिताग्राम् ॥२१॥

मारवती

भावेनोपनीतभवत्कृताधरखण्डनादिखेदेनेति भावः । विलपति भवन्तमासाद्य विलापं करोतीत्यर्थः, तन्द्रामुपैतीति यावत् । पतति निपतिता भवतीत्यर्थः । उद्याति ऊर्द्ध्वं याति उत्थिता भवतीति यावत् । मूर्च्छति मोहं प्राप्नोतीति यावत् । महाज्वरेऽप्येतत् सर्वं भवतीति तस्यापि लक्षणमुक्तम् । तदनेन यथासम्भवं स्थायिभावाः सात्त्विकभावाश्च दर्शिताः । तदुक्तम्—'रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयन्तथा । जगुप्साविस्मयशमाः स्थायिभावाः प्रकीर्तिताः ॥ स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभेदोऽथ वेपथुः । वैवर्ण्यमश्रु प्रलयावित्यष्टौ सात्त्विका मताः ॥'

२०। यदीदृशं सन्तापं सापन्ना तदा चन्द्रादिशीतलद्रव्ये सत्यपि मत्सान्निध्यादेवास्याः कथं स्वास्थ्यं भविष्यतीत्याशंक्याह—अस्याः राधायाश्चेतः कर्तृ चन्दनचन्द्रमः कमलिनीचिन्तासु श्रीखण्डशीतलभानुनलिनीचर्चासु चिरं बहुकालम्व्याप्य संताम्यति सम्यक्-प्रकारेण म्लानं भवतीत्यर्थः । किम्भूतायाः ? कन्दर्पज्वरेण कामज्वरजनितसन्तापेन आतुरा पीडिता तनुः शरीरं यस्याः सा तथा, तस्याः । 'सन्तापः संज्वरः समावि'त्यमरः । किन्तु रहसि एकान्ते क्षान्तिरसेन क्षमारूपरसेन शीतलतनुंत्वामेव प्रियं क्षणं ध्यायन्ती चिन्तयन्ती कृशाङ्गी कथमपि कष्टसृष्ट्या प्राणिति जीवति । अन प्राणने धातुः । तथा च चन्द्रादिशीतलपदार्थानाञ्च त्वमपि दुःखिता भवति, अक्षमाशीलस्यापि भवतश्चिन्तनेनैपि विगतसन्तापो भवतीत्यतो भवत्समागमादेव तस्या जीवनं भविष्यतीत्यवगम्यत इति भावः । अत्र क्षान्तिरसशीतलत्वेन सजातीयव्यतिरेकालङ्कारः ॥

२१। पूर्वानुरागस्मरणपूर्वकं राधायाः कष्टजीवनमुपदर्शयति—हे कृष्ण यया राधिकया पुरा पूर्वं ते तव विरहः क्षणमपि न सेहे। कथम्भूतया ? नयननिमीलनेन चक्षुर्निमिषेणापि खिन्नया

* क्वचित् 'कान्तिवशेन' इति पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्मरातुरां दैवतवैद्यहृद्य
तदङ्गसङ्गामृतमात्रसाध्याम्।
विमुक्तबाधां कुरुषे न राधा-
मुपेन्द्र वज्रादपि दारुणोऽसि ॥२२॥

वृष्टिव्याकुलगोकुलवलवशादुद्धृत्य गोवर्धनं
बिभ्रद्वल्लववल्लभाभिरधिकानन्दाच्चिरं चुम्बितः।
दर्पेणैव तदर्पिताधरतटी सिन्दुरमुद्राङ्कितो
बाहुर्गोपतनोस्तनोतु भवतः श्रेयांसि कंसद्विषः॥ २३ ॥

इति श्रीगीतगोविन्दे स्निग्धमधुसूदनो
नाम चतुर्थः सर्गः।

सारवती

दुःखितया तावत्कालदर्शनविघातदर्शनेनेति भावः। असौ सा सखी राधा चिरविरहेण चिरकालीनभवद्विश्लेषेण पुष्पिताग्रां रसालशाखां दृष्ट्वा कथं केन प्रकारेण श्वसिति जीविष्यति। श्वस प्राणने धातुः, वर्तमानसामीप्ये लट्। छन्दोऽपि पुष्पिताग्रा नामेति छलेनोपदर्शितम्॥

२२। एतादृगवस्थामापन्नामपि राधामुपेक्षसे इति कृष्णं निन्दति—हे उपेन्द्र श्रीकृष्ण राधां विमुक्तबाधां त्यक्तपीड़ां न कुरुषे, अतस्त्वं वज्रादपि दारुणोऽसि कठिनोऽसि। न हि सचेताः चिकित्सको बाधामनवधार्य तदुपशमाय प्रवर्तत इति तद्वत्स्वरूपमाह। राधां कीदृशीम्? स्मरातुरां कामेन हेतुना आतुरां व्याधितामित्यर्थः। मत्तः कथं प्रकृतव्याधिशमनं स्यादित्यतो हेतुगर्भम्विशेषणमाह—कीदृश? देवतायाः असौ दैवतः, दैवतश्चासौ वैद्यश्चेति दैवतवैद्योऽश्विनीकुमारः, तस्मादपि हृद्य प्रिय। अश्विनोकुमारादधिकं प्रियत्वं सौन्दर्येण प्रकृतव्याधिचिकित्सकत्वेन चेत्यवधेयम्। औषधाद्यन्वेषणव्यावृत्तिरपि भवतो न भविष्यतीति प्रवृत्त्यौपायिकरूपमाह—कीदृशी? त्वदीयं यदङ्गं तस्य सङ्गो मिलनं तदेवामृतमिव तन्मात्रेण साध्यां प्रतिकार्यामित्यर्थः। अतएव भवदीयानायासेनैव त्रैलोक्यकमनीयराधा विगतबाधा भविष्यतीति तत्रौदास्ये भवान्निन्दितः व्रजाधिककठिन इति वाक्यार्थः। 'पीडा बाधा व्यथा दुःखमि'त्यमरः। उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुज इति च वृत्तम् उपेन्द्रवज्रा नाम एव इति छलेनोपदर्शितम्॥

२३। ग्रन्थप्रक्रमं त्यक्त्वा सर्गान्ते सभासदामाशिषमाह—कंसद्विषः कृष्णस्य बाहुर्भवतः सामाजिकानां श्रेयांसि कल्याणानि वितनोतु विस्तारयतु। कीदृशस्य कंसद्विषः? गोपतनोः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मारवती

गोपत्वविशिष्टा तनुः शरीरं यस्य स गोपतनुः, तस्य। अत्र कंसमहासुरद्वेष्टत्वस्य गोपशरीरत्वस्य च प्रतिपादनेन हरेर्माहात्म्यविशेषो दर्शितः। बाहुः कथम्भुतः? वृष्ट्या जलवर्षेण व्याकुलस्य दुःखितस्य गोकुलस्य गोसङ्घस्य वलवशाद्रक्षणेच्छया गोवर्धनमुद्धृत्य उत्ताल्य चिरं चिरकालं व्याप्य विभ्रद्दधानः। अवनरसादिति क्वचित् पाठः। तत्पक्षे अवणं रक्षणं ततो यो रसः अनुरागः तेनेत्यर्थः। अव रक्षणे धातुः। पुनः किम्भूतः? अतएव वल्लववल्लभाभिर्गोपवधूभिरधिकानन्दादतिहर्षाच्चुम्बितः। कीदृश इव? दर्पेण बलातिरेकेन हेतुना ताभिरर्पितास्तदर्पितायाः अवरतश्च ता एव लोहितत्वात् सिन्दुरमुद्रास्ताभिरङ्कित इव चिह्नित इव गोपीभिरित्यर्थात्। तथा चायंसकलापेक्षया दर्पिष्ठ इत्यवधार्य गोपीभिर्निजाधरतटीनामर्पणव्याजेन सिन्दूरमुद्राभिर्मुद्रित इत्युत्प्रेक्षालंकारः। 'वश आयत्ततायां स्याद्वश इच्छाप्रभुत्वयोरि'ति विश्वः। स्निग्धः सखीकृतानुनयेन स्नेहवान् मधुसूदनो वर्णनीयतया यत्रेति व्युत्पत्या स्निग्धमधुसूदनेति प्रकृतसर्गनाम॥

इति समस्तप्रक्रियाविराजमानमहाराजशुक्लध्वजविरचितायां मारवत्यां गीतगोविन्दटीकायां चतुर्थः सर्गः॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सटीक-गीतगोविन्दम् ।

पञ्चम : सर्गः ।

साकांक्षपुण्डरीकाक्षः ।

अहमिह निवसामि याहि राधा–
मनुनय मद्वचनेन चानयेथाः ।
इति मधुरिपुणा सखी नियुक्ता
स्वयमिदमेत्य पुनर्जगाद राधाम् ॥ १ ॥

सारवती

१। कृष्णप्रेरिता सखी राधां यत् प्राह तद् वर्णयितुं प्रसङ्गमवतारयति। सैव सखी पुनरेत्य पुनरागत्य इदं वक्ष्यमाणवचनं राधां जगाद। कीदृशी ? अहम् इह यमुनातीरे निकुञ्जे निवसामि तिष्ठामि त्वं याहि गच्छ मद् वचनेन राधामनुनय प्रबोधय पुनरनुनयानन्तरम् आनयेथाः तामित्यर्थात् इत्यनेन प्रकारेण मधुरिपुणा स्वयमात्मनैव नियुक्ता आज्ञप्ता। तदनेन त्वरातिशयेन राधायां कृष्णस्य रागातिशयो दर्शितः। अस्मिन् सर्गे अभिसारिका नायिका। तस्या लक्षणम्—'लज्जां कृत्वा समाकृष्टा यौवनेन मदेन वा। याभिसारयते कान्तं कीर्तिता साभिसारिका ॥'

गीतस्यास्य देशिवराडिरागः। रूपकतालः। रागलक्षणं—विनोदयन्ती दयितं सुकेशी सुकङ्कणा चामरचालनेन। स्कन्धे दधाना सुरपुष्पगुच्छं, वराङ्गनेयं कथिता वराडी ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

देशिवराडिरागेण रूपकतालेन गीयते।

वहति मलयसमीरे मदनमुपनिधाय।
स्फुटति कुसुमनिकरे विरहिहृदयदलनाय॥
तव विरहे वनमाली सखि सीदति। ध्रुवम्॥ २।
दहति शिशिरमयूखे मरणमनुकरोति।
मदनविशिखे* विलपति विकलतरोऽति॥ तव वि०॥ ३॥
ध्वनति मधुपसमूहे श्रवणमपिदधाति।
मनसि वलितविरहे निशि निशि रुजमुपयाति॥ तव वि०॥ ४॥

सारवती

२। सखीवचनमेव गीतेन दर्शयति। हे सखि राधिके! वनमाली कृष्णः तव विरहे सति सीदति व्यथते। कस्मिन् सति? मदनं कामदेवमुप समीपे निधाय धृत्वा मलयसमीरे दक्षिणवायौ वहति सति। एतेन मदनस्यापि वायोरायतत्वं दर्शयता मलयानिलस्य उत्कर्षो दर्शितः। पुनःकस्मिन् सति? विरहिहृदयलनाय विरहिहृदयविदारणार्थं कुसुमनिकरे पुष्पसमूहे स्फुटति सति। अत्र स्वकीयस्फुटनेन विरहिहृदयस्फुटनमुपदिशत्येवेत्युत्प्रेक्षालंकारः॥

३। अपि किङ्करोत्यत आह—शिषिरमयूखे चन्द्रे दहति सति मरणमनुकरोति। अस्माकं मरणमेव वरमिति मरणं स्वीकरोतीत्यर्थः। यद्वा मरणमनुकरोति मरणावस्थां सदृशीकरोति मृतप्रायो भवतीत्यर्थः। अपि किङ्करोति? विलपति परिदेवनं करोति। कस्मिन् सति? मदनविशिखे कामवाणे पतति सतीव। कीदृशः? अति अत्यर्थेन विकलतरः। तदुक्तम्—'अपिशब्दः प्रशंसायां प्रकर्षे लङ्घनेऽप्यति।'

४। अपि किं करोत्यत आह—मधुपसमूहे भ्रमरनिकरे ध्वनति सति श्रवणमपिदधाति आच्छादयति। श्रवणमिति सामान्याश्रयादेकवचनम्। 'अपिधानतिरोधानपिधानाच्छादनानि चे'त्यमरः॥ अपि किं करोतीत्यत आह—निशि निशि रात्रौ रात्रौ मनसि वलितविरहे चिन्तितविरहे सति रुजमुपयाति पीडाङ्गच्छतीत्यर्थः। तथा च ध्यानेन त्वया अविरहीव तिष्ठति, यदा कदाचिद्विरहं भावयति पीडामुपगच्छतीति वाक्यार्थः। यथाश्च तेर्विरहः सम्बन्धविच्छेदः सर्वत्र गच्छतौ मनसस्तदाभावात्॥

---

* 'पतति मदनविशिखे' इत्यादि पाठान्तरम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वसति विपिनविताने त्यजति ललितधाम।
लुठति धरणिशयने बहु विलपति तव नाम॥ तव वि०॥ ५॥
भणति कविजयदेवे विरहविलसितेन+।
मनसि रभसविभवे हरिरुदयतु सुकृतेन॥ तव वि०॥ ६॥
पूर्वं यत्र समं त्वया रतिपतेरासादितासिद्धयस्
तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे पुनर्माधवः।
ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमन्त्राक्षरं*
भूयस्त्वत्कुचकुम्भनिर्भरपरिरम्भामृतं वाञ्छति॥ ७॥

सारवती

५। अपि किं करोतीत्यत आह—ललितधाम शोभनगृहं त्यजति। विपिनविताने अरण्यविस्तारे वसति। अत्रारण्यविताने वसतीत्यनेन वनेऽप्येकत्र न तिष्ठतीति दर्शितम्। त्यजति ललितधामेत्यत्र सामान्यत एव वर्तमानायां लट् न तु गृहत्यागवनवासयोरेककालत्वमित्यवधेयम्। वसतिर्निवासस्थानम्, वसतिश्चासौ विपिनवितानश्चेति स तथा। तथा च वसति विपिनविताने तन्निमितं शोभनगृहं त्यजति। निमित्तात्कर्मयोगे सप्तमीति केचिदाचक्षते। 'धाम गेहे च देहे च तथा रश्मौ प्रकीर्तितमि'ति॥

६। कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं प्रकृतगीतमुपसंहरति। जयदेवके भणति सति सुकृतेन प्रकृतगीतगानश्रवणादिजन्यपुण्येण मनस्यर्थात् गायतां शृण्वताञ्च हरिरुदयतु व्यक्तीभवतु। मनसि कथम्भूते? रभसविभवे रभसस्य हर्षस्य विभवो यत्र। हरिः कीदृक्? विरहविलसितेन लक्षितः। इत्थम्भूतलक्षणे तृतीया। 'उत्साहे सहिते वेगे प्रवाहे रभसोऽर्थवदि'ति कोषः॥

७। एवं सति हरिः कुत्र किङ्कुर्वन् तिष्ठतीत्यत आह—हे राधे तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे निकुञ्जमेव मन्मथस्य महातीर्थम्। तत्र पुनः माधवः त्वत्कुचकुम्भयोर्निभरोऽतिगाढो यः परिरम्भः स एवामृतम्, अमृतमिव निःशेषतापशमकत्वात्। तद्वाञ्छति। कस्मिन्? यस्मिन् स्थाने पूर्वं त्वया रतिपतेः सिद्धयः कामसम्बन्धिन्यो मनोरथनिष्पत्तयः आसादिताः प्राप्ताः, तेनेत्यर्थात्। किं कुर्वन्? त्वामनिशं वारम्वारं ध्यायन् तवैवालापमन्त्राक्षरं जपन्। तवैवालापः सम्भाषणं मन्त्राक्षरमिव, तदपि जपन्। तथा च ध्वनिरन्योऽपि—यत्राणिमादिसिद्धिं लभते तत्रैव महातीर्थे किञ्चिद्ध्यायन् किञ्चिदपि जपन् अमृतं मोक्षं वाञ्छतीत्युचितमेव। 'अयाचितं स्यादमृतं पीयूषमोक्षयोरपि। भोजने यज्ञशेषे च मरणाभावतोययोरपी'ति॥

+ 'विरहिविलसितेन' इति पाठान्तरम्।
* 'तवैवालापमन्त्रवलीमि'ति पाठान्तरम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गुर्जरीरागेण एकतालीतालेन गीयते ।

रतिसुखसारे गतमभिसारे मदनमनोहरवेशम ।
न कुरु नितम्बिनि गमनविलम्बनमनुसर तं हृदयेशम् ॥
धीरसमीरे यमुनातीरे वसति वने वनमाली ॥ ध्रुवम् ॥ ८ ।
नामसमेतं कृतसङ्केतं वादयते मृदुवेणुम् ।
बहु मनुते ननु ते तनुसङ्गतपवनचलितमपि रेणुम् ॥ धीर० ॥ ९ ॥

मारवती

८। गीतस्यास्य गुर्जरो रागः। एकताली तालः। रागलक्षणन्तूक्तमेव। सम्प्रति सखी कृष्णसङ्गमाय राधां त्वरयति। वनमाली श्रीकृष्णः वने वसति तिष्ठति। कीदृशे वने? यमुनातीरे यमुनासमीपस्थे। पुनः कीदृशे? धीरसमीरे। धीरो मन्दः समीरो यत्र एवम्भूते। वनमालीत्यनेन नागरवेशधारणेन शृङ्गारित्वं दर्शितम्। यमुनातीरधीरसमीर इति विशेषणद्वयेन सन्तप्तायास्तव तापशान्त्यर्थमपि तत्र गमनमुचितमिति दर्शितम्। तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे इत्यनेन कृष्णस्यावस्थितिस्थानकथनेऽपि यमुनातीरे वने वनमाली वसतीत्यनेन यत्पुनस्तदभिधानं तत्तु नानास्थाने पूर्वं कृष्णेन राधया समं रतिपतेः सिद्धय आसादिता इति तदवस्थितिस्थानानियमेन तन्नियमार्थमुक्तमित्यवधेयम्। 'गोपीपीनपयोधरमर्दनचञ्चलकरयुगशाली'ति क्वचित् पाठः। स तु प्रामादिकः, तथा सति पदसाम्येन ध्रुवत्वव्याघातः। अन्यथा गोपीपीनपयोधरमर्दनशालित्वस्मरणेनेर्ष्योत्पादनेन प्रकृतानुपयोगश्च। हे नितम्बिनि! प्रशस्तश्रोणीयुक्ते। प्रशंसायामिनिः। गमनविलम्बनं न कुरु। प्रशस्तनितम्बगौरवादेव गमनं विलम्बेन भविष्यतीति किमर्थं विलम्बनमिति वाक्यार्थः। तं कृष्णमनु लक्षीकृत्य सर गच्छ। किम्भूतम्? हृदयेशं हृदयस्य मनसः तवेत्यर्थात्, ईशं नियन्तारम्। तथा च तदधीनहृदया त्वमवश्यं यास्यसि। संप्रत्यगमने सनैरपेक्ष्यमात्रमिति ध्वनितम्। पुनः किम्भूतम्? मदनमनोहरवेशं मदनवन्मनोहरः कमनीयो वेशः शरीरसन्तानं यस्य। पुनः कीदृशम्? अभिसारोक्तम् अभिसरत्यत्रेति व्युत्पत्या अभिसारः संकेतस्थानं तत्र गतम्। कीदृशे अभिसारे? रतिसुखसारे रतिजनितसुखं रतिसुखं तदेव सारमुत्कृष्टं यत्र एवम्भूते। एतेन तत्र गतस्य कृष्णस्य रतिव्यतिरिक्तं नान्यदुद्देश्यमिति ध्वनितम्॥

९। तत्र गतः कृष्णः किं करोतीत्यत आह। नामसमेतं तव संज्ञाक्षरसहितम् अतएव कृतसंकेतं यथा स्यात्तथा। मृदु कोमलं यथा भवति तथा वेणुं वादयते शब्दायते। अहमिह

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पतति पतत्रे विचलति पत्रे शङ्कितभवदुपयानम् ।
रचयति शयनं सचकितनयनं पश्यति तव पन्थानम् ॥ धीर० ॥ १० ॥

मुखरमधीरं त्यज मञ्जीरं रिपुमिव केलिसुलोलम् ।
चल सखि कुञ्जं सतिमिरपुञ्जं शीलय नीलनिचोलम् ॥ धीर० ॥ ११ ॥

सारवती

निवसामि राधिके त्वरितमिहागम्यतामिति कृत्वा कृतसंकेतमित्यर्थः । ननु हे राधे ते तव तनुसङ्गतं शरीरसम्पृक्तं रेणुमपि धूलिमपि पवनचलितं वातेन नीतं बहु मनुते आद्रियते । पूर्वं निकुञ्जे युवयोः केलिरभूत्, तत्रत्यं भवदीयतनुसम्बन्धिरेणुं पवनेन चलितं बहु मनुत इति वाक्यार्थः । यद्वा ते तव तनुसङ्गतपवनचलितं रेणुमपि बहु मनुते किम्पुनस्त्वामित्यर्थः । एतेन राधायामनुरागातिशयो दर्शितः ॥

१०। अपि किङ्करोतीत्यत आह । शङ्कितभवदुपयानं यथा स्यात्, शंकितं तर्कितं भवत्या उपयानं समीपागमनं यथा स्यादेवं शयनं शय्यां रचयति निर्माति । सचकितनयनं यथा स्यात्तथा तव पन्थानं पश्यति । कदेत्याह—पतत्रे पक्षे अर्थात् पक्षिणां पतति सति, पत्रे अर्थात् वृक्षस्य विचलति सति । शङ्कितभवदुपयानं पन्थानमित्यस्य विशेषणमिति भगीरथादयः ॥

११। पुनरभिसारानुरूपदेशोपदेशपूर्वकं त्वरयति—हे सखि मञ्जीरं नुपूरं त्यज । कीदृशम् ? मुखरं वाचालम् । अधीरं चञ्चलं गमनक्रियायामित्यर्थात् । पुनः कीदृशम् ? केलौ क्रियायां बन्धविशेषेण सुलोलम् अतिचञ्चलम् । एतेन गुह्यकार्यं लोकेषु विज्ञापयतीति रिपुमिव शत्रुमिव अन्योऽपि यो मुखरोऽधीरः स तु त्यजत इत्युचितमेवेति नीलनिचोलं श्यामप्रच्छदपटं शीलय परिधेहि । नीलत्वप्रच्छदकत्वाभ्यां अभिसारोपयोगित्वं दर्शितम् । तथा च रिपुपरिहारेणोपकारिस्वीकरणमुचितमेवेति भावः । कुञ्जं लतागृहं गच्छ । किम्भूतं कुञ्जम् ? सतिमिरपुञ्जम् अन्धकारसमूहसहितम् । एतेन संकेतोपयुक्तगाढान्धकारो दर्शितः । तदनेन कुलजाभिसारसामग्री दर्शिता । तदुक्तम्—'विलीना स्वेषु गात्रेषु मूकीकृतविभूषणा । अवगुण्ठनसम्वीता कुलजाभिसरेत्प्रियमि'ति ॥*

---

* 'संलीना स्वेषु गात्रेषु मूकीकृतविभूषणा ।
अवगुण्ठनसम्वीता कुलजाभिसरेद्यदि ॥' इति लक्ष्मीविराजिते साहित्यदर्पणे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उरसि मुरारेरुपहितहारे घन इव तरलबलाके।
तडिदिव पीते रतिविपरीते राजसि सुकृतविपाके॥ धीर०॥ १२॥
विगलितवसनं परिहृतरसनं घटय जघनमपिधानम्।
किसलयशयने पङ्कजनयने निधिमिव हर्षनिधानम्॥ धीर०॥ १३॥

सारवती

१२। सुरतकर्मस्मारणेनोत्कण्ठां वर्धयति। हे पीते गौरि त्वं मुरारेरुरसि वक्षसि राजसि शोभां करिष्यसि। वर्तमानसामीप्ये वर्तमानत्वेति लट्प्रत्ययः। कदेत्याकांक्षायामाह—रतिविपरीते विपरीतसुरतकाले। कस्मिन् सति? सुकृतविपाके पुण्यपरिणामे सति। उरसि कथम्भूते? उपहितहारे। उपहितः सम्बद्धः हारो यत्र, राधाया इत्यर्थात्। कुत्र केव? घने मेघे तडिदिव विद्युदिव। घने कीदृशे? तरलबलाके। तरला चञ्चला बलाका बकपंक्तिर्यत्र एतादृशे। तरला बलाका कामुकी यत्र एतादृश इति हृदयविशेषणतयाऽपि योज्यम्। अत्र विद्युत्पीतवर्णा, चञ्चला राधाऽपि गौराङ्गी विपरीतरत्या। चञ्चलकृष्णहृदयोपहितहारस्य रतिकर्मणा चाञ्चल्यं स्वभावतः। इत्थञ्च बलाकाया अपि तदुभयं कृष्णहृदयस्य श्यामत्वं मेघस्यापि तथात्वमिति युक्तं सर्वत्र साम्यम्। अत्र कृष्णहृदयोपहितहारस्य रतिचाञ्चल्येनावस्थितबलाकसाम्यसम्भवेऽपि राधा कृष्णोरसि स्थिता तडित् घनावस्थितेति तत्र दृष्टान्तदार्ष्टान्तिकवैषम्यं स्यादेवेति वदन्ति तत्र सम्बन्धमात्रे दृष्टान्त इति बहवः। वस्तुतस्तु अभूतोपमेयम्, यथा मालतीमाधवे—'राहोश्चन्द्रकलामिवाननचरीमि'त्यादिः। यथा च चण्डिकायाम्, यथा मेरुगिरेः शृङ्गं तोयवर्षणेन तोयद इति। यद्वा रतिविपरीते रतिविरोधिनि राधिके त्वं मुरारेरुरसि राजसि शोभां करिष्यसीत्यर्थः। तथा च मुरारेर्हृदयस्य शोभाधिकरणत्वं प्रकृते द्रष्टव्यम्। न राधाधिकरणत्वमिति प्रकृतरतवर्णनमेवेदं न तु विपरीतरतवर्णनम्। अतएव न रतिविपरीत इत्यत्राविमृष्टविधेयांशकता, न वा रतिमात्रविमुखतायां विपरीतरत्यर्थमत्यर्थेन विरोध इत्याभाति। 'बलाका बकपंक्तौ स्याद् बलाका बिसकण्ठिका। बलाकाङ्कामुकीमाहुर्बलाकस्तु बको मत' इति शाश्वतः॥

१३। उत्कण्ठावृद्ध्यर्थमवस्थाविशेषस्मारणं कुर्वन्त्येव सखी राधामभ्यर्थयति—हे पङ्कजनयने पद्मलोचने राधे! किसलयस्य शयनं शय्यां यस्य स किसलयशयनः श्रीकृष्णः। तस्मिन् जघनं घटय सङ्गमय। किसलयशयनपदेन कृष्णस्योपन्यासेन कृष्णसन्तापातिशयो दर्शितः। किम्भूतं जघनम्? प्रियदर्शनजनितभावोदयात् विगलितं वसनं यत्र तत्तथा। अतएव वस्त्रपतनात् परिहृता रसना काञ्ची येन तत्तथा, तम्। अपिधानमाच्छादनरहितम्। अतएव

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हरिरभिमानी रजनिरिदानीमियमपि याति विरामम्।
कुरु मम वचनं सत्वररचनं पूरय मधुरिपुकामम् ॥ धीर० ॥ १४ ॥
श्रीजयदेवे कृतहरिसेवे भणति परमरमणीयम्।
प्रमुदितहृदयं हरिमतिसदयं नमत सुकृतकमनीयम्। धीर० ॥ १५ ॥
विकिरति मुहुः श्वासानाशाः पुरो मुहुरीक्षते
प्रविशति मुहुः कुञ्जं गुञ्जन्मुहुर्बहु ताम्यति।
रचयति मुहुः शय्यां पर्याकुलं मुहुरीक्षते
मदनकदनक्लान्तः कान्ते प्रियस्तव वर्तते ॥ १६ ॥

मारवती

निधिमिव हर्षनिधानम् आनन्दाश्रयम्। अन्योऽपि शंखादिनिधिराच्छादनरहितः प्राप्तो हर्षमुत्पादयतीत्युचितमेव। 'क्षुद्रघण्टा तु रसना रसना रसजिह्वयोरि'ति धरणिः। 'अपिधानतिरोधानपिधानाच्छादनानि च' 'निधिर्ना शेवधिरि'ति चामरः। 'निधानं त्वाश्रये निधावि'ति विश्वः ॥

१४। इदानीं गमनविलम्बेन गमनमपि विफलमिति दर्शयन्ती त्वरयति। हरिः कृष्णः अभिमानी मनस्वी तथा च तत्कृतापमानभिया नात्र स्वयमागमिष्यतीति भावः। भवतु विलम्बेनाहमेव यास्यामीत्याशंक्याह—अन्याः सर्वाः रजन्यो विरामं गता। इदानीमियमपि विद्यमाना रजनिर्विरामं याति। तत् तस्मात् मम वचनं कुरु मम वचनविषयीभूतार्थं निष्पादयेत्यर्थः। किन्तद्वचनं तदाह—सत्वरा त्वरया सहिता रचना कर्त्तव्यता यत्र एवं यथा स्यात्तथा मधुरिपोः कृष्णस्य काममभिलाषं पूरय पूर्णतां नय। अत्र मधुरिपुपदेनोपन्यासः प्रायो वीररता स्त्रिय इति राधायाःकृष्णेऽनुरागदढायार्थम्।

१५। कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं प्रकृतगीतमुपसंहरति। कृतहरिसेवे विहितकृष्णाराधने श्रीजयदेवे परमरमणीयमिति मनोहरमर्थाङ्कितं भणति सति प्रमुदितहृदयं अतितुष्टहृदयम् अर्थात् गीतेनैव। हरिं कृष्णं नमत सज्जना इत्यर्थात्। हरिं पुनः किम्भूतम्? अतिसदयम् अतिकृपालुमित्यर्थः। अथवा सन् विशिष्टोऽयः शुभावहो विधिर्यस्मादेतादृशम्। पुनः किम्भूतम्। सुकृतेन पुण्येन कमनीयं वाञ्छनीयमित्यर्थः। अथवा सु उत्कृष्टं कृतं कार्यं येषां ते सुकृताः पुण्याः, तेषां कमनीयं वाञ्छनीयमित्यर्थः। 'अयः शुभावहो विधिरि'त्यमरः ॥

१६। पुनरपि सखी राधां त्वरयितुं कृष्णावस्थामाह। हे कान्ते सुन्दरि राधिके! तव प्रियः कृष्णः मदनात् कामात् कदनं पीडा तया क्लान्तः सन् वर्तते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तद्वाम्येन समं समग्रमधुना तिग्मांशुरस्तं गतो
गोविन्दस्य मनोरथेन च समं प्राप्तं तमः सान्द्रताम् ।
कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना
तन्मुग्धे विफलं विलम्बनमसौ रम्योऽभिसारक्षणः ॥ १७ ॥

सात्वती

एतादृशः सन् किं कुरुत इत्याह—बहुशो वारं वारं श्वासान् विकिरति त्यजति । कथं राधा समागच्छतीति प्रत्याशया पुरो या आशाः दिशः मुहुः वारम्वारम ईक्षते विलोकयति । एकवारप्रवेशेऽपि कदाचित्तिरोहिता राधा नोपलब्धेति शङ्कया मुहुर्वारम्वारमेव कुञ्जं प्रविशति । मुहुर्वारम्वारं गुञ्जन् वास्पाकुलकण्ठतया अव्यक्तप्रियतमाभिधानरूपशब्द-प्रयोगं कुर्वन् प्रतिवचनालाभेन बहु यथा स्यादेवं ताम्यति ग्लानिं प्राप्नोति । पुनरपि दृढवासनावशेन राधामालोक्य मुहुर्वारम्वारं शय्यां रचयति विस्तारयति । अत्र मुहुरिति पदेन राधामालोक्य शय्यां रचयति । पुनर्विशेषादर्शनेन प्रद्वेषेण शय्याम् उत्थापयति पुनस्तथैव रचयति चेति दर्शितम् । सर्वथा मयि दृढा मयि दृढानुबन्धा राधा समागत्य क्वचित लीना तिष्ठतीति विचिन्त्य पर्याकुलं यथा भवति तथा मुहुर्वारम्वारं सर्वत्रेक्षते । तदनेन कृष्णस्य उन्मादावस्था दर्शिता । तथा च भावलता—'श्वासप्ररोदनोत्कम्पवसुधालेखनैरपि । व्यापारो जायते यत्र स उन्माद स्मृतो यथा ॥'

१७। अनुनयेन प्रसादमुपलभ्य पुनरपि त्वरयति—हे मुग्धे विवेकशून्ये तस्माद्धेतोः विलम्बनं विफलम् असावभिसारक्षणः । अभिसरणम् अभिसारः, सङ्केतस्थानगमनम् । तस्य क्षणोऽवसरः रम्यो योग्य इत्यर्थः । कस्मात् ? तद्वाम्येन त्वद्वामतया समं तिग्मांशुः सूर्यः समग्रमस्तं गतः । तदनेनानुनयकृतमानापगमनप्रदर्शनेन राधाया उत्तमनायिकात्वं सूचितम् । तथा चोक्तम्—'दोषानुरूपकोपा या अनुनीता च तुष्यति । वमते च भृशं कान्ते गुणहार्योत्त-मेति सा ॥' गोविन्दस्य मनोरथेन समं तमः सान्द्रतां निविडतां प्राप्तम् । तथा च दूती-वचनादिदानीं राधा समागच्छतीति । तथा च कृष्णस्य सम्बन्धो मनोरथः । तथा च तमःसम्बन्धत्वमित्यनेन गमने त्वराबीजमुक्तम् । कोकानां चक्रवाकानां करुणस्वनेन सदृशी तुल्या दीर्घा महती मदभ्यर्थना तत्र त्वरया गच्छेति मम प्रार्थनेत्यर्थः । तदनेन कोकस्वन-स्मारणरूपमुद्दीपनविभावं दर्शयन्त्या मदीयाभ्यर्थना तव न लङ्घनीयेति दर्शितम् । 'कोकश्चक्रश्चक्रवाक' इत्यमरः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आश्लेषादनु चुम्बनादनु नखोल्लेखादनु स्वान्तज-
प्रोद्बोधादनु सम्भ्रमादनु रतरम्भादनु प्रीतयोः ।
अन्यार्थं गतयोर्भ्रमान्मिलितयोः सम्भाषणैर्जानतो-
र्दम्पत्योरिह को न को न तमसि व्रीडाविमिश्रो रसः ॥ १८ ॥
सभयचकितं विन्यस्यन्तीं दृशौ* तिमिरे पथि
प्रतितरु मुहुः स्थित्वा मन्दं पदानि वितन्वतीम् ।
कथमपि रहः प्राप्तामङ्गैरनङ्गतरङ्गिभिः
सुमुखि सुभगः पश्यन्स त्वामुपैतु कृतार्थताम् ॥ १९ ॥

सात्वती

१८। पुनरप्यभिसारानुरूपान्धकारवर्णनमभिसारोत्कण्ठामुत्पदयति । इह समये तमसि दम्पत्योः जायापत्योः को न को न रसो व्रीडाविमिश्रोऽपितु सर्व एव रसो लज्जासहितो भवतीत्यर्थः। दम्पत्योः कथम्भूतयोः ? अन्यार्थं परस्त्रीपुरुषार्थं गतयोः। भ्रमात् भ्रान्ते मिलितयोः। ततः कथम्भूतयोः ? आश्लेषादाङ्गिनादनु पश्चात्, चुम्बनादनु ततः पश्चात्, नखोल्लेखादनु ततः पश्चात्, स्वान्तजप्रोद्बोधात् कामोद्रेगादनु ततः पश्चात्, सम्भ्रमात् त्वराविशेषाद् अनु पश्चात्, रतारम्भात् सुरतारम्भात् प्रीतयोः तुष्टयोः। पुनः किम्भूतयोः ? तदनन्तरं त्वराविरामात् सम्भाषणैः प्रत्येकालापैः जानतोः ममेयं जाया ममायं पतिरित्येव-गच्छतोः। अत्र यद्यपि आलिङ्गनोऽपि प्रत्येकप्रत्येकानन्तरमपि प्रीतिरुत्पद्यत एवेत्याश्लेषादनु-प्रीतयोरित्येवंक्रमेण व्याख्यातुमुचितं तथाप्येवंक्रमेण या प्रीतिरुत्पद्यते सा परमा प्रीतिरिति सैवात्र विवक्षितेत्यवधेयम्। तथा च कामशास्त्रे, 'आश्लेषचुम्बननखक्षतकामबोधशीघ्रत्व मैथुनमनन्तसुखप्रबोधम्। प्रीतिस्ततो विवशभावनमेव कार्यमेवं नितान्तचतुराः सुचिरं रमन्ती'तिᵀ। अतएव प्रकृते प्रथमोत्पन्नालिङ्गनादिजनिता एव रसाभाव्यमानलज्जया विमिश्री-भूता भवन्तीति वर्णितम्। न तु परिचयेजाते लज्जायाः तिरोधानात् रसाः प्रवृत्ता इत्यवधेयम्। एतस्मिन् काले सर्व एवाभिवसन्तीति तवापी दानीमभिसारोऽतिसमुचित इति दर्शितम् ॥

१९। त्वमेव तावदेवमावेदयसि न तु कृष्णस्यापि मयि तादृशः अनुबन्ध इति राधा-वचनमाशंक्य तल्लाभेनैव तस्य कृतार्थता स्यादिति दर्शयति—हे सखि राधे सुभगः सुन्दरः कृष्णस्त्वां पश्यन् कृतार्थतामुपैतु। त्वां किम्भूताम् ? तिमिरे तिमिरयुक्ते पथि। तिमि-रमस्यास्ति इत्यर्थे अर्शाद्यच्प्रत्ययः मत्वर्थीयः। सभयं सत्रासम्, अतएव सचकितञ्चेति तत्-सभयचकितम्, एवं, यथा स्यात्तथा दृशौ विनस्यन्तीम् अर्पयन्तीम्। पुनः किम्भूताम् ? वृक्षतल-

* 'दृशम्' इति पाठान्तरम्।
ᵀ 'वसती'ति पाठान्तरम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राधामुग्धमुखारविन्दमधुपस्त्रैलोक्यमौलिस्थली—
नेपथ्योचितनीलरत्नमवनीभारावतारान्तकः ।
स्वच्छन्दं व्रजसुन्दरीजनमनस्तोषप्रदोषश्चिरं
कंसध्वंसनधूमकेतुरवतु त्वां देवकीनन्दनः ॥२०॥

सारवती

स्थितनिविडान्धकारे कृष्णाभ्रमेण प्रतितरु वृक्षे वृक्षे मुहुर्वारम्वारं स्थित्वा लज्जया चिन्तया वा मन्दरं मन्थरं यथास्या देवं पत्तिः पदमिति भावव्युत्पत्त्या पदानि गमनानि वितन्वतीं विस्तारयन्तीम् । पुनः किम्भूताम् ? कथमपि कष्टसृष्ट्या रहःप्राप्तां निभृतस्थानमागताम् अत एव प्रियदर्शनादनङ्गेन कामेन तरङ्गिभिरुल्लसितैरङ्गैर्लक्षिताम् । इत्थम्भूतलक्षणे तृतीया । यद्वा कथमपि तमोनैविद्यात् केनापि प्रकारेणानङ्गतरङ्गिभिः कामकल्लोलशालिभिरङ्गैरवयवैर्हेतुभूतैः रहःप्राप्तां तथा च निभृते तवाङ्गस्पर्शने लब्धां न तु प्रथमतो दृष्टामिति वाक्यार्थः । तथा च तदर्थमुपागतां भवतीमालोक्यैव कृष्णस्य कृतार्थतेति दर्शितम् ॥

२०। ग्रन्थप्रक्रममपहाय सर्गान्ते श्रोतुराशिषमाह—देवकीनन्दनः त्वां श्रोतारं स्वच्छन्दं यथा स्यादेवमवतु रक्षतु । अव रक्षणे धातोर्लोट् । किम्भूतो देवकीनन्दनः ? त्रैलोक्यमौलिस्थलीनां चूडाप्रदेशानां नेपथ्योचितं प्रसाधनयोग्यं नीलरत्नमिव । कान्तिविशेषत्वात् सकलाबाध्यत्वाच्च त्रैलोक्यमौलिस्थितेन्द्रनीलेन रूपणमित्यवधेयम् । पुनः कीदृशः ? अवनी पृथिवी, तस्या विविधदुष्टदैतादिकृतो यो भारस्तस्यावतारोऽवतरणं तत्र क्षमः समर्थ इत्यर्थः । पुनः कीदृशः ? व्रजसुन्दरीजननां मनस्तोषे चित्तप्रमोदे सन्ध्यासमय इव । प्रदोषसमये कामिनीनां प्रियजनसङ्गमाशया प्रमोदो भवतीति सकलसिद्धमेवेति प्रीतिजनकत्वात् सानुरागत्वात् कृष्णवर्णत्वाच्च देवकीनन्दनस्य प्रदोषसाम्यम् । पुनः किम्भूतः ? कंसध्वंसने कंसासुरविनाशने धुमकेतुरूपः तत्सूचकग्रहविशेष इव । रूपकमत्रालंकारः । 'आकल्पवेशो नेपथ्यं प्रतिकर्मप्रसाधनमि'त्यमरः । राधानयनार्थं सखीं प्रस्थाप्य साकांक्षः पुण्डरीकाक्षः कृष्णो यत्रेति व्युत्पत्त्या साकांक्षपुण्डरीकाक्षेति सर्गनाम ॥

इति श्रीगीतगोविन्दे अभिसारिकावर्णने
साकांक्षपुण्डरीकाक्षो नाम पञ्चमः सर्गः ॥

इति समस्तप्रक्रियाविराजमानमहाराजशुक्लध्वजविरचितायां सारवत्यां गीतगोविन्टीकायां पञ्चमः सर्गः ॥

—:—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सटीक-गीतगोविन्दम्

षष्ठः सर्गः।

कुण्ठवैकुण्ठः।

अथ तां गन्तुमशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा
तच्चरितं गोविन्दे मनसिजमन्दे सखी प्राह ॥१॥

गुर्ज्जरीरागेण रूपकतालेन* गीयते।

पश्यति दिशि दिशि रहसि भवन्तम्।
तदधरमधुरमधूनि पिबन्तम् ॥
नाथ हरे सीदति राधा वासगृहे ॥ नाथ हरे० ॥२॥

सारवती

१। अथ सखी तामनुनीय क्वचिल्लतागृहे कुञ्जे धृत्वा तच्चरितं कृष्णाय कथितवतीति तद्वर्णनाय प्रसङ्गमवतारयति। अथानन्तरं गोविन्दे राधायाः सखी तच्चरितं राधाव्यापारं प्राह कथयाम्बभूव। गोविन्दे कथम्भूते ? मनसिजेन कामेन मन्दे ग्लाने चैतन्यरहिते वा। तदुक्तं भावलतायाम् 'ग्लानो मुक्ताश्रुरुद्विग्नः स्रस्ताङ्गो नष्टचेतनः। अचिन्त्यो दैन्यभागस्मिन्नेवंप्रायो जनो भवेत् ॥ किं कृत्वा ? तां राधां स्तम्भाल्लज्जया वा गन्तुमशक्ताम् अर्थात् मुकुन्दे, लतागृहे लतोपलक्षिते गृहे धृत्वा। त्वमत्र तिष्ठ, अहमेव कृष्णमानयामीत्युदीर्य स्थापयित्वेत्यर्थः। अत्र सर्गे वासकसज्जानाम नायिका। तल्लक्षणम् 'सैव वासकसज्जा स्यात् स्वयं वासगृहङ्गता। आर्ता मृगयते कान्तं मदनेन मदेन वा ॥'

२। गीतस्यास्य गुर्ज्जरी रागः। यतीतालः। लक्षणन्तूक्तमेव। गोविन्दे यदुक्तं तद्दर्शयति—हे नाथ प्रभो हरे ! राधा वासगृहे भग्नदेवालये गर्भागार इति प्रसिद्धे सीदत्यवसन्ना भवति। अतएवाभिसंस्थानकथनप्रकरणे 'क्षेत्रं वाटी भग्नदेवालयो दूतीगृहं वनम्। आलयश्च श्मशानञ्च नदीनाञ्च तटन्तथा ॥' इति साहित्यदर्पणः। 'गर्भागारम्वासगृहमि'त्यमरः। किं करोतीत्याशंकायामाह —दिशि दिशि भवन्तं पश्यति। ध्यानेन सर्वासु दिक्षु भवन्तमवलोकत इत्यर्थः। कीदृशम् ? तस्या अनन्यनायिकाया अधरं मधुरं मधु, तत् पिबन्तम्। अत्र मधुत्वेनैव

---

* 'यतीताल' इति पाठान्तरम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्वदभिसरणरभसेन वलन्ती।
पतति पदानि कियन्ति चलन्ति ॥ नाथ हरे० ॥ ३ ॥
विहितविशदबिसकिसलयवलया।
जोवति परमिह तव रतिकलया ॥ नाथ हरे० ॥ ४ ॥
मुहुरविलोकितमण्डनलीला।
मधुरिपुरहमिति भावनशीला ॥ नाथ हरे० ॥ ५ ॥
त्वरितमुपैति न कथमभिसारम्।
हरिरिति वदति सखीमनुवारम् ॥ नाथ हरे० ॥ ६ ॥

सारवती

माधुर्यप्राप्तौ मधुरपदोपादानं तदाधिवाद्योतनार्थम्। त्वदधरेति क्वचित् पाठः। तत्रापि तच्छब्दस्य सर्वादिगणपठित्वात् प्रकृतेऽन्यगोपीवाचकत्वमिति योजयन्ति। वस्तुतस्तु तदधरमधूनि राति गृह्णाति। राला दाने धातुः। त्वदधरमधुरोऽन्यनायिकाधरः। स एव मधु, तानि पिबन्तम्। अनेन परस्परकर्तृकाधरपानावस्था दर्शिता ॥

३। पुनः किं करोत्यत आह—त्वदभिसरणरभसेन त्वदभिसारोत्साहेन वलन्ती भजमाना कियन्ति पदानि चलन्ती गच्छन्ती पतति। पदानीत्यनेन पद्भ्यां गन्तव्यानि स्थानानि अभिप्रेतानि। अन्यथा चरणस्य वाच्यत्वे बहुत्वानुपपत्तेः, क्रियाया वाच्यत्वे पुनरुक्तिः स्यादिति।

४। पुनः कीदृशी तत्राह—विहिताः कृता विशदाः शुभ्राः बिसकिसलया मृणालाङ्कुरा एव वलया यया एतादृशी। तव रतिचिन्तनेन परं जीवति। परञ्च तत्कालपर्यन्तं तस्या जोवनमेव न स्यादित्यर्थः॥

५। पुनः कीदृशी तत्राह—मुहुः वारम्वारम् अवलोकिता मण्डनस्य लीला यया एतादृशी, अतएवालङ्कारसादृश्यादहं मधुरिपुः कृष्ण इति भावनं स्वभावो यस्या एतादृशी। एतेनाभिमानिकविलासो दर्शितः। तथा च भावलतायाम्—लीलेष्टजनचेष्टानुकरणं स्वस्वभाषया। विशेषालापनं किञ्चिद्विलासः सद्भिरुच्यत' इति विपरीतसुरताभिलाषो दर्शित इत्यवधेयम् ॥

६। पुनः किं करोति तत्राह—हरिः त्वरितमभिसारं संकेतस्थानं कथं नोपैति अनुवारं वारम्वारं सखीं वदति ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लिष्यति चुम्बति जलधरकल्पम् ।
हरिरुपगत इति तिमिरमनल्पम् ॥ नाथ हरे० ॥ ७ ॥
भवति विलम्बिनि विगलितलज्जा ।
विलपति रोदिति वासकसज्जा ॥ नाथ हरे० ॥ ८ ॥
श्रीजयदेवकवेरिदमुदितम् ।
रसिकजनं तनुतामति मुदितम् ॥ नाथ हरे० ॥ ९ ॥
विपुलपुलकपालिः स्फीतशीत्कारमन्त-
र्जनितजडिमकाकुव्याकुलं व्याहरन्ती ।
तव कितव विधायामन्दकन्दर्पचिन्तां
रसजलधिनिमग्ना ध्यानलग्ना मृगाक्षी ॥१०॥

भागवती

७। हरिरुपगत इति मत्वा अनल्पम् अधिकं यथा स्यादेवं तिमिरं श्लिष्यति चुम्बति। कीदृशम् ? निविडत्वाज्जलधरकल्पं मेघसदृशमित्यर्थः। अत्रोपमानोत्था रतिः। तथा च भावलतायाम्—'चित्तसाम्यञ्च यत्किञ्चित् तस्यावयवतुल्यकम्। तदेव सुखदन्तस्या उपमानोत्थेति कीर्त्यत' इति ॥

८। पुनः किं करोति तत्राह--भवति त्वयि विलम्बिनि विलम्बकाले वासकसज्जा राधा विलपति रोदितीति। कीदृशी ? विगलिता प्रच्युता अत्यन्तार्तनादादिना लज्जा यस्या एतादृशी। वासकसज्जालक्षणन्तु भारते—'वासवेश्मनि स्वकल्पिततल्पे या समागमविधिम्विदधाना। पश्यति प्रियसमागमसज्जा तामिहाकलय वासकसज्जामि'ति ॥

९। कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं गीतमुपसंहरति। श्रीजयदेवकवेरिदमुदितं भाषितं कर्तृ रसिकजनमतिमुदितं तनुताम् अतिहृष्टं करोत्वित्यर्थः ॥

१०। ध्यानेन सा त्वत्समागमनं लभत इति दर्शयति—हे कितव धूर्त्त कृष्ण तवामन्दकन्दर्पचिन्तां विधाय। तवेत्यत्र विषयत्वषष्ठ्यर्थः। तथाच भवद्विषयकातिशयितकामजनितचिन्तां कृत्वेत्यर्थः। मृगाक्षी राधा ध्यानलग्ना सती रसजलधिमग्ना शृङ्गाररसागरे लीना भवतीत्यर्थात्, सर्वं हि वाक्यं क्रियया समाप्यप इति न्यायात्। शृङ्गाररसस्य दुस्तरत्वेन जलधित्वेन निरूपितम्। निमज्जनचिह्नमाह—विपुला महती पुलकपालिः रोमाञ्चपंक्तिर्यस्या एतादृशी। पुनः कीदृशी ? स्फीतशीत्कारं प्रवृद्धशीत्कारं यथा स्यात् एवमन्तः अभ्यन्तरे जनिताभ्यां जडिमकाकुभ्यां जडध्वनिविकाराभ्यां जडध्वनिविकारविशेषाभ्यां व्याकुलं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अङ्गेष्वाभरणं करोति बहुशः पत्रेऽपि सञ्चारिणि
प्राप्तं त्वां परिशङ्कते वितनुते शय्यां चिरं ध्यायति।
इत्याकल्पविकल्पतल्परचनासंकल्पलीलाशत-
व्याशक्तापि विना त्वया वरतनुर्नैषा निशां नेष्यति ॥११॥

सारवती

यथा भवति तथा व्याहरन्ती वदन्ती। 'काकु स्त्रियां विकारोऽथ शोकभीत्यादिभिर्ध्वनेरि'त्यमरः। अन्योऽपि निमज्जनकाले शीतेन पुलकितदेहो भवति, जाड्येन स्वरभङ्गेन च व्याकुलः यथा स्यादेवं व्याहरन्तीत्युचितमेव तदत्र ध्यानेनैव शृङ्गारं। सा लभत इति तदेकरूपत्वं दर्शितम् ॥

११। अथैवं स्वस्थैव सा तर्हि किमस्माकं प्रयोजनमित्याशंक्य तत्साङ्गमसुखस्य विशेषादर्शानमूलकत्वेन परमार्थतो न भवन्तं विना स्वस्था भवतीति तदार्तिमावेदयति। एषा वरतनुः उत्तमशरीरा राधा त्वया विना निशां न नेष्यति। अत्र वरतनुपदोपन्यासेनौदासस्यानौचित्यमुक्तम्। यद्येतावत् कालं सुखेन प्राणिति तदा निशामपि नेष्यतीत्याशंक्याह—कीदृशी? इत्यनेन प्रकारेणाकल्पविकल्पतल्परचनासङ्कल्पलीलाशतव्याशक्तापि तथा चेभिर्व्याशक्तैः कथं कथमपि एकद्वित्रियामयापनेऽपि यामिनीयापने भवन्तः प्रमाणामिति दर्शितम्। आकल्पविकल्पादिकं स्वयमेव दर्शयति—बहुशो वारम्वारम् अङ्गेषु-करचरणादिष्वाभरणमाकल्पं करोति, अहमेव सज्जीभूय माधवसन्निधिं गच्छामीत्याशया। तथा च 'आकल्पवेशौ नेपथ्यमि'त्यमरः। पत्रेऽपि सञ्चारिणि चलति सति त्वां प्राप्तमागतं परिशंकते विकल्पयति। तदुक्तम्—'विकल्पः संशये पक्ष' इति। ततो भवदागमनबुद्ध्यैव शय्यां वितनुते तल्परचनां करोतीत्यर्थः। तदुक्तम्—'तल्पं शय्याट्टदारेष्वि'ति। अतो भवदागमनेन चिरं चिरकालं व्याप्य ध्यायति अर्थात् भवन्तम्। तदनेन सङ्कल्पकथनम्। तदुक्तं—'सकल्पः कर्ममानसमि'ति। प्रियानुकृतिर्लीला, तस्याः शतं लीलाशतम्। तदुक्तम् 'अङ्गैर्वेशैरलंकारैः प्रेमभिर्वचनैरपि। प्रीतिप्रयोजितैर्लीलां प्रियस्यानुकृतं विदुरि'ति॥ एतदपि मुहुरवलोकितमण्डनलीलामधुरिपुरहमिति भावनशीलेत्यनेनोपदर्शितम् ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किं विश्राम्यसि कृष्णभोगिभवने भाण्डीरभूमिरुहि
भ्रातर्याहि न दृष्टिगोचरमितः सानन्दनन्दास्पदम् ।
राधाया वचनं तदध्वगमुखान्नन्दान्तिके गोपतो
गोविन्दस्य जयन्ति सायमतिथिप्राशस्त्यगर्भा गिरः ॥१२॥

इति श्रीगीतगोविन्दे वामकमञ्जावर्णने सोत्कण्ठवैकुण्ठो नाम षष्ठः सर्गः ॥

सारवती

१२। एकोऽतिथिर्नन्दगोपगृहं गच्छन् पथि भाण्डीरनामकवटवृक्षतटे विश्रामं कुर्वन् सङ्केतस्थानमागतया राधया किमप्युक्तः तद्वचनं नन्दान्तिके कथयन् लज्जापरवशेन कृष्णेन वारित इति वर्णयन् कविः ग्रन्थप्रक्रमं विहाय सर्गशेषे जनानामाशिषमाह। सायं सन्ध्यासमये गोविन्दस्य गिरः वचनानि जयन्ति वैष्णवानां विघ्ननिवारणं कुर्वन्त्वित्यर्थः। किम्भूता गिरः ? अतिथेः प्राशस्त्यमेव गर्भे यासां ताः। केचिद् गोविन्दस्य गिरो वाचो जयन्ति उत्कर्षेण वर्धन्ताम् किम्भूताः ? सायमतिथिप्राशस्त्यगर्भाः। सायं सन्ध्यासमये यदतिथीनां प्राशस्त्यं प्रशंसा, तद् गर्भे आशये यासां तास्तथा। 'दिनातिथौ तु विमुखे गते यत् पातकं नृणाम्। तदेवाष्टगुणं पुंसां प्रदोषे विमुखे गते ॥' इति स्मृतौ यत् प्राशस्त्यं सन्धातिथीनामुक्तं तदन्विता भारतीति भावः इति व्याचक्षते। गोविन्दस्य कथम्भूतस्य ? राधायाः तद्वचनम् अध्वगस्य तस्यैवातिथेर्मुखात् नन्दान्तिके नन्दसमीपे गोपतः प्रकृतार्थस्तव व्याजेन प्रच्छादयत इत्यर्थः। राधायाः किं तद्वचनम् ? हे भ्रातः पथिक ! भाण्डीरभूमिरुहि भाण्डीरनामवटवृक्षप्रदेशे किं विश्राम्यसि विश्रामं करोषीत्यर्थः। कीदृशे ? कृष्णभोगिनः कालसर्पस्य भवने निवासस्थाने। तदनेनात्रावस्थाने भीतिरुत्पादिताच्छलतस्तु कृष्णस्य भोगिनः शृङ्गारादिभोगशालिनः भवने निवासस्थाने इत्यनेन संकेतस्थानत्वं दर्शितम्। इतो दृष्टिगोचरं सानन्दनन्दास्पदम् उत्साहसहितं नन्दावासं न यासि न गच्छसीति लोकोक्तौ। अत्र नन्दास्पदस्य सान्निकटत्वप्रतिपादनेना तत्र गमनेऽध्वगस्य उत्कण्ठा जनिता। भोगः स्यात्र सुखे अहेश्च फणकाययोरि'ति विश्वः। 'भोगी कामुकसर्पयोरि'त्यपि। सोत्कण्ठाराधाचरितज्ञानेन वैकुण्ठो यत्रे'ति व्युत्पत्त्या सोत्कण्ठवैकुण्ठेति सर्ग नाम।

इति समस्तप्रक्रियाविराजमानमहाराजशुक्लध्वजविरचितायां सारवत्यां गीतगोविन्दटीकायां सोत्ककण्ठवैकुण्ठो नाम षष्ठः सर्गः ॥

—:·

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सटोक-गीतगोविन्दम्

सप्तमः सर्गः ।

नागरनारायणः ।

अत्रान्तरे च कुलटाकुलवर्त्मघात*-
सञ्जातपातक इव स्फुटलाञ्छनश्रीः ।
वृन्दावनान्तरमदीपयदंशुजालै-
र्दिक्सुन्दरीवदनचन्दनबिन्दुरिन्दुः ॥१॥

प्रसरति शशधरबिम्बे विहितविलम्बे च माधवविधुरा ।
विरचितविविधविलापं सा परितापं चकारोच्चैः ॥२॥

सारवती

१। अथाभिसारिकाया विरहातिरेकवर्णनया चन्द्रोदयं वर्णयति । चकारः पुनरित्यर्थे । अस्मिन्नेवावसरे इन्दुः वृन्दावनान्तरं वृन्दावनमध्यम् अंशुजालैः किरणनिकरैरदीपयत् प्रकाशितवान् । किम्भूतः ? दिगेव सुन्दरी, तस्या वदने चन्दनबिन्दुः चन्दनकृतवर्तुलाकारतिलक इव, अतएव पूर्णमण्डलत्वेन स्फुटा प्रव्यक्ता लाञ्छनश्रीः कलङ्कशोभा यस्य एतादृशः अत्रोत्प्रेक्षते—कुलटानामसतीनां कुलं समूहः, तस्य वर्त्मघातो वर्त्मनिरोधः, तेन सञ्जातपातक इव । अन्योऽपि पातकी कलङ्कवान् भवतीत्युचितम् । 'श्रीर्वेशरचनाशोभाविभूतिरुदवेः सुते'ति । 'कलङ्कांकौ लाञ्छनमित्यमरः ॥

२। अधुना राधाविलापवर्णनाय प्रसङ्गमवतारयति । सा राधिका विरचितविविधविलापं यथा स्यात्तथा उच्चैरत्यर्थेन परितापं चकार । अत्र यद्यपि वह्न्यादिवद्राधायाः परितापं कर्त्तुं न शक्यते, तथापि परितापपदेन लक्षणया तदाविष्करणमुक्तमिति भगीरथः । तन्न, अन्यहेतुकस्यापि परितापस्य खेदविशेषकस्यावच्छेदकतया राधाजन्यत्वसम्भवात् । यद्वा सा राधिका परितापं विरचितो विविधो विलापो यत्र स विरचितविविधविलापः । एतादृशम् उच्चैरत्यर्थेन चकारेत्यन्वयः । कीदृशी ? विधुरा विकला विश्लिष्टा वा कृष्णेत्यर्थात्, कस्मिन् सति विलापं चकार ? शशधरबिम्बे चन्द्रमण्डले प्रसरति सति । अत्र बिम्बपदोपादानं चन्द्रस्य पूर्णत्वप्रतिपादनेन सन्तापाधिक्यसूचनार्थं माधवे कृष्णे विहितविलम्बे कृतकालातिपाते च सति । 'विधुरन्तु परिश्लेषे विधुरो विकलेऽन्यवदि'ति शाश्वतः । स्वभावोक्तिरलङ्कारः ।

---

* 'कुलवर्त्मपात' इति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गौडमालवरागेण गीयते।

कथितसमयेऽपि हरिरहह न ययौ वनम्।
मम विफलमिदममलरूपमपि यौवनम्॥
यामि हे कमिह शरणं सखीजनवचनवञ्चिता॥ ध्रुवम्॥३॥
यदनुगमनाय निशि गहनमपि शीलितम्।
तेन मम हृदयमिदमसमशरकीलितम्॥ यामि हे०॥४॥

सारवती

३। अत्र सर्गे विप्रलब्धा नायिका। तल्लक्षणम्—'प्रेष्य दूतीं स्वयं गत्वा सङ्केतं नागतः प्रियः। यस्यास्तेन विनाश्लिष्टा विप्रलब्धा तु सा स्मृते'ति॥ गीतस्यास्य गौडमालवरागः। प्रतिमटतालः। रागलक्षणमुक्तमेव। प्रदोषाभ्यन्तरेऽहमेव कृष्णमत्रानयामीति सख्या लतागृहे धृता राधा विलपति। हे इत्यदृष्टसम्बोधने। इहावस्थायां सखीवचनवञ्चिता कं जनं शरणमाश्रयं यामि। तथा चात्रावस्थायां सखीजन आश्रयो भवितुमर्हति। स एव यदि वञ्चकः तदान्यः क आश्रय इति भावः। सखीजनवञ्चितत्वमेव प्रकटयति—कथितसमयेऽपि सखीकथितप्रदोषकाले हरिर्वनं न ययौ। यद्यपि प्रदोषसमयः सन्ध्या क्वापि न पदार्थविधेया कथिता, तथापि पूर्वापरग्रन्थैकवाक्यतया लभ्यत इत्यवधेयम्। तेन ममेदं यौवनमनुरूपमपि योग्यमपि विफलं निरर्थकमित्यर्थः। नन्वत्र नाययाविति वक्तुमुचितमिति कथं न ययावित्युक्तमिति चेत्? न, अवस्थितिस्थानापरिज्ञानेन राधाया व्यग्रचित्तत्वप्रतिपादनार्थं तथाभिधानात्। यद्वा कथितः समयः सिद्धान्तो यया सा कथितसमया। अपिः निश्चये। हे कथितसमये दूति! निश्चितं हरिः श्रीकृष्णः वनं 'पूर्वं यत्र समं त्वया रतिपतेरासादिताः सिद्धय' इति श्लोकेनोक्तं निकुञ्जस्थानं न ययौ न गतः। अन्यथा तव गमनान्तरमेतावता कालेन सर्वथा समागमिष्यतीति भावः। इहावस्थायां कं जनं शरणं यामि? कीदृशी? सखीजनवचनेन त्वमत्र तिष्ठाहमेव कृष्णमानयामीति सिद्धान्तवाक्येन वञ्चिता प्रतारितेत्यर्थः। 'समयाः शपथाचारकालसिद्धान्तसम्विद' इत्यमरः॥

४। आविष्कारेण किञ्चिद्दुःखनिवृत्तिर्भवतीति प्रसिद्ध्या स्वकीयां दुरवस्थामाह—यदनुगमनाय यस्य कृष्णस्यानुगमनाय निशि रात्रौ गहनमपि वनं शीलितम् अनुभूतं तेन कृष्णेन मम हृदयमसमशरेण कामेन हेतुभूतेन कीलितं बिद्धम्। यदर्थमहमागता तेनैव मम हृदयं कीलितमिति कृष्णस्य दुरात्मता दर्शिता। यद्वा तेन कृष्णेनासमशरेण विषमबाणेन मम हृदयं कीलितमिति कृष्णस्य दौरात्म्यं कन्दर्पाभेदश्च दर्शितः। गहनं काननं कष्ट' इति॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मम मरणमेव वरमतिवितथकेतना।
किमिह विषहामि विरहानलमचेतना ॥ यामि हे० ॥ ५ ॥
मामहह विधुरयति मधुरमधुयामिनी।
कापि हरिमनुभवति कृतसुकृतकामिनी ॥ यामि हे० ॥ ६ ॥
अहह कलयामि वलयादिमणिविभूषणम्।
हरिविरहदहनवहनेन बहुदूषणम् ॥ यामि हे० ॥ ७ ॥
कुसुमसुकुमारतनुमतनुमतसरलीलया।
स्रगपि हृदि हन्ति मामतिविषमशीलया ॥ यामि हे० ॥ ८ ॥

सारवती

५। कृष्णसमागममलभमाना विरहवह्निनिर्वापनोपायमववाधरयति। इहावस्थायामचेतना ज्ञानशून्या विरहानलं किं विषहामि? सह मर्षणे धातुः अत्र। प्रकरणस्यानित्यत्वात् नात्मने पदम्। यदि न सोढव्यः तदा किं विधेयमित्यत आह—मम मरणमेव वरं श्रेष्ठकर्म, विरहाग्नि निर्वापकत्वात्। एवं सति त्रैलोक्यकमनोयदेहपरित्यागः कथं सोढव्यमित्यभिप्रेत्याह—अहं कीदृशी? अतिवितथमतिव्यर्थं कृष्णाङ्गपरिष्वङ्गाभावेन केतनं शरीरं यस्या एतादृशी। 'केतनं लाञ्छने गात्रे कार्ये चोपनिमन्त्रणे' इति विश्वः ॥

६। हृदयोत्पन्नासूयया व्यभिचारिभावमुद्भावयति। अहह इति खेदे। मधुरमधुयामिनी मनोहरवसन्तरात्रिः विधुरयति विकलयति। अत्र मधुरपदोपादानेन स्वभावमनोहराया अपि तापजनकत्वप्रतिपादनेनात्युद्वेगबीजमुपदर्शितम्। कृतं सुकृतं यया सा तथा कृतसुकृता। चासौ कामिनी चेति कृतसुकृतकामिनी हरिं कृष्णं काप्यनिवर्चनीयगुणा आलिङ्गनचुम्बनादिकर्मणाऽनुभवति। अतएव सुकृतकामिनी हरिमनु लक्षीकृत्य भवति विद्यत इत्यर्थ इति भगीरथः ॥

७। वलयादिभूषणोपद्रवेगमुद्भावयति। अहह खेदे। वलयादिमणिभूषणं वलयादिमणिप्रधानालङ्करणं हरिविरहदहनवहनेन हेतुना बहूनि द्रवीभावस्फुटनादीनि दूषणानि यस्य एतादृशं कलयामि अवधारयामि। वह्निसम्बन्धेन हिरण्यघटितवलयादिद्रवीभावोमणेश्च स्फुटनं भवतीत्युचितमेव। जगद्धरादयस्तु बहुभूषणमतिशयितापराधं कलयामि मन्ये, स्त्रीणां प्रियालोकनफलो हि वेश इति योजयन्ति। तत्पक्षे विरहस्य दहनत्वेन निरूपणमफलमित्यवधेयम् ॥

८। स्वहस्तनिर्मिता मदीयापि स्रक् माला विकलीकरोतीति विस्मयमापन्ना विलपति। इयं मदीया स्रगपि पुष्पमालापि मां हृदि हृदयदेशे हन्ति हन्तीव। मां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अहमिह निवसामि नगणितवनवेतसा ।
स्मरति मधुसूदनो मामपि न चेतसा ॥ यामि हे० ॥ ९ ॥
हरिचरणशरणजयदेवकविभारती ।
वसतु हृदि युवतिरिव कोमलकलावती ॥ १० ॥

सात्वती

कीदृशीम् ? कुसुमादपि सुकुमारा कोमला तनुः शरीरं यस्या एतादृशीम् । अत्र तनोः कुसुमादप्यधिकसुकुमारत्वप्रतिपादनेन कुसुमघटितमालाया ईर्ष्यासूचनेन हननयोग्यता दर्शिता, न तु सोत्कर्षप्रतिपादने तात्पर्यमित्यवधेयम् । केन प्रकारेण हन्तीत्यत आह — अतनुः कामदेवः । तस्य यः शरः तल्लीलया तद्विलासेनेत्यर्थः । कुसुमशरशीलया किम्भूतया ? अतिविषमशीलया । अतिविषमस्वभावात् विजातीयं शीलं स्वभावो यस्या एतादृश्या । अन्ये बाणा बहिः क्षतं* कुर्वन्ति, कामबाणा बहिःक्षतम्†अकुर्वाणा अपि परमात्मात्मकं चेतो विदारयन्तीति तल्लीलया विषमशीलत्वम् । यद्वा स्रक् कीदृशी ? अतनुशरशीलया लक्षिता । इत्थम्भूतलक्षणे तृतीयेति व्याख्येयम् । तथा मदीयैव स्रक् कामबाणविलासेन मामतिहन्तीति विस्मयनामा व्यभिचारिभावो दर्शितः । तदुक्तं भावलतायाम्—औत्सुक्यं विस्मयो हर्षो व्रीडोन्मादो मदस्तथा । विषादो जडता निद्राऽवहित्था चापलं मतिः । अमी भावाः प्रयोक्तव्याः शृङ्गारे व्यभिचारिणः ॥

९। कृष्णस्यौदास्यं भावयन्ती विलपति—अहमिह वने न गणितो न विचारितो वनवेतसो वनस्थकण्टको वृक्षविशेषो यया एतादृशी सती निवसामि तिष्ठामि । अत्र नपदस्य सर्वत्र क्रियोपस्थापकपदेनैवानुभावकत्वमिति नियमो नास्त्येव । तत्रैव मुद्राराक्षसेनैकवागस्फूरितमालक इत्यसदप्यपीत्यवधेयम् । भगीरथस्तु गणितवनवेतसा सती अहं न निवसाम्यपितु निवसाम्येवेति शिरश्चालने नकार इति योजयति । मधुसूदनो मां चेतसा मनसा तदीयानुभवस्य तदीयमननादिजन्यतया दृढानुग्रहसाध्यत्वेन मनसानुभवं न करोतु, स्मरणमपि न करोत्यपेरर्थः । अतएवास्मिन् पक्षे स्मरणं चेतसैवेति चेतसेति पदस्य मन्दप्रयोजनत्वम् अपेरवस्थानपतितत्वञ्चेति दूषणमपास्तमित्यवधेयम् ।

१०। कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं प्रकृतगीतमुपसंहरति । हरेश्चरणौ शरणमाश्रयौ यस्य स तथा । हरिचरणशरणश्चासौ जयदेवकविश्चेति स हरिचरणशरणजयदेवकविः तस्य भारतीयं काव्यरूपा वाणी हृदि वसत्वर्थात् विष्णुभक्तानाम् । कीदृशी ? कोमला चासौ कलावती कवित्वशिल्पयुक्ता चेति सा तथा । केव ? युवतिरिव

* 'बहिर्गतम्' इति पाठान्तरम् ।
† 'बहिष्कृतम्' इति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कान्तः क्लान्तमना मनागपि पथि प्रस्थातुमेवाक्षमः ।
सङ्केतीकृतमञ्जुवञ्जुललताकुञ्जेऽपि यन्नागतः ॥ ११ ॥

अथागतां माधवमन्तरेण सखीमियं वीक्ष्य विषादमूकाम् ।
विशङ्कमाना रमितं कयापि जनार्दनं दृष्टवदेतदाह ॥ १२ ।

सारवती

तरुणीव । यथा काचित्तरुणी कोमला मृद्वङ्गी कलावती चतुःषष्ठिकामकलायुक्ता हृदि विशति हृदयाङ्गमा भवतीति तद्वदित्यर्थः । 'शरणं गृहरक्षित्रोरि'त्यमरः ॥

११। निर्भरानुरागवती राधा कृष्णस्य विलम्बेन वितर्कयति । कान्तः कृष्णः संङ्केतीकृतमञ्जुवञ्जुललताकुञ्जेऽपि यस्मात् न आगतः तत् तस्माद्धेतोः कामपि मत्तोऽधिकगुणां कामिनीमभिसृतः ताम्प्रति प्रस्थित इत्यर्थः । कथं मामेवमनुगतां सङ्केतस्थामवेद्यान्यत्र गमिष्यतीति अत आह—बन्धुभिः कलाकेलिभिः शिल्पपरिहासैः किम्वा बद्धो नियमितः । सर्वथा मम समागमसुखात् कृष्णस्य बन्धुजनक्रीडारसो नाधिक इति कथं तेन निरुद्धः स्यादित्यभिप्रेत्याह—अन्धकारिणि तमोयुक्ते वनोपान्ते वनसीमनि पन्थानमप्राप्य किमुद्भ्राम्यति उच्चैर्भ्रान्तिमान् भवतीत्यर्थः । तथाविधनिविड़ान्धकारेऽपि मदीयाभिसरणरसेन हरिणा वारम्वारमत्र यातायातमाचरितमिरि कथं तस्य भ्रमः स्यादित्यभिप्रेत्याह—क्लान्तमनाः मदीयावधारणेन क्लिष्टचित्तः अत एव लज्जया मद्विश्लेषजनितान्तस्तापेन वा मनागपि अल्पकालमपि पथि प्रस्थातुमक्षमः सामर्थ्यरहित एव । एवकारो हेत्वन्तरव्यवच्छेदे । तथा च नान्यहेतुकोऽस्य विलम्बोऽपितु प्रकृतहेतुक एवेति वाक्यार्थः । अत एव कालिदासेनापि 'कामस्वतां पश्यती'त्युक्तम् । सङ्केतीकृतमञ्जुवञ्जुललताकुञ्जेऽपि इत्यत्रापिशब्देन इतस्ततोऽस्माकमन्वेषणक्रमेण वृन्दावनस्थितः तन्निकुञ्जं न यातु सङ्केतीकृतमञ्जुवनमपि नायात इत्यर्थो दर्शितः । आक्षेपश्चात्रालंकारः ॥

१२। पुनरपि राधायाः प्रलापवर्णनाय प्रसङ्गमवतारयति । अथानन्तरमियं राधा जनार्दनं कृष्णं कयापि रमितं विशङ्कमाना वितर्कयन्ती दृष्टवद् यथादृष्टमवधीयते तथैतदग्रेतनगीतेन वक्ष्यमाणं प्राह । किं कृत्वा ? माधवमन्तरेण कृष्णं विनाऽऽगताम् अत एव कार्यासिद्ध्या मूकां वक्तुमक्षमां सखीं वीक्ष्य दृष्ट्वेत्यर्थः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वसन्तरागेण गीयते ।

स्मरसमरोचितविरचितवेशा ।
दलितकुसुमदरविलुलितकेशा ॥
कापि मधुरिपुणा विलसति युवतिरधिकगुणा ॥ ध्रुवम् ॥ १३ ॥
हरिपरिरम्भणवलितविकारा ।
कुचकलसोपरि तरलितहारा ॥ कापि० ॥ १४ ॥
विचलदलककलितानचन्द्रा ।
तदधरपानरभसकृततन्द्रा ॥ कापि० ॥ १५ ॥
चञ्चलकुण्डलललितकपोला ।
मुखरितरसनजघनगतिलोला ॥ कापि० ॥ १६ ॥

सारवती

१३। गीतस्यास्य वसन्तरागः । एकतालीतालः । रागलक्षणमुक्तमेव । दृष्टवदेतदाहेत्यनेन यदुक्तं तद्दर्शयति—हे सखि । कापि युवतिः अधिकगुणा मत्तोऽधिकगुणा अत एव मधुरिपुणा कृष्णेन समं विहरति क्रीडति । कीदृशी ? स्मरसमरोचितः कामयुद्धयोग्यो विरचितः कृतो वेशः किङ्किणीदृढबन्धनादिर्यया सा तथा । एतेन पुंभावसाहसारम्भो दर्शितः । वक्ष्यमाणविशेषणैरपि तद्वर्णनमेव पर्यवसतीत्यवधेयम् । कीदृशी ? गलितकुसुमा स्रस्तपुष्पाश्च ते दरविलुलिता ईषद्स्तव्यस्ताश्च केशा यस्याः सा तथा ॥

१४। पुनः कीदृशी तत्राह—हरेः कृष्णस्य परिरम्भणेनालिङ्गनेन वलितः सम्भक्तो विकारो रोमाञ्चादिर्यस्याः । पुनः कीदृशी ? कुचकलसयोरुपरि विपरीतकर्मणा तरलितो दोलायितो हारो यस्याः सा तथा ॥

१५। पुनः कीदृशी तत्राह—विचलद्भिर्विपरीतरत्या कल्यमानैरलकैः चूर्णकुन्तलैः ललितो मनोहरः आननचन्द्रो मुखेन्दुर्यस्याः सा तथा । पुनः कीदृशी ? तेन कृष्णेनाधरपानं तस्य कृष्णस्याधरः, तस्य पानं तदधरपानमिति वा । तेन यो रभस आनन्दः तेन कृता तन्द्रा अलीकनिद्रा यया सा तथा । 'रभसो वेगहर्षयोरि'ति विश्वः ॥

१६। पुनः कीदृशी तत्राह—विपरीतरतिकर्मणा चञ्चलाभ्यां कुण्डलाभ्यां दलितौ संघर्षणेन खण्डखण्डीकृतौ कपोलौ यस्याः सा तथा । दलितकपोल इत्यनेन कुण्डलसंघर्षणजनितः दुःखापरिज्ञानेन सातिरेको दर्शितः । पुनः कीदृशी ? विपरीतरत्या मुखरिता रसना काञ्ची यत्र स भवति मुखरितरसनः । एवम्भूतो यो जघनस्तस्य गत्या लोला चञ्चला धृष्टा वा । 'लोलश्चञ्चलधृष्टयोरि'ति विश्वः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दयितविलोलितलज्जितहसिता ।
बहुविधकूजितरतिरसरसिता ॥ कापि० ॥ १७ ॥
विपुलपुलकपृथुवेपथुभङ्गा ।
श्वसितनिमीलितविकसदनङ्गा ॥ कापि० ॥ १८ ॥
श्रमजलकणभरसुभगशरीरा ।
परिपतितोरसि रतिरणधीरा ॥ कापि० ॥ १९ ॥

सात्वती

१७। पुनः कीदृशी तत्राह । विलोकितमिति भावे क्तः । दयितस्य कृष्णस्य विलोकनेन लज्जितं लज्जा पश्चाद् हसितं हासो यस्याः सा तथा । कथमवस्थितेन कृष्णेन एवं विधं धार्ष्ट्यं दृष्टमिति लज्जाक्षणं पश्चात् किं मया वञ्चितमित्यभिप्रेत्य हास इत्यवधेयम्। लज्जित-हसितेत्यनेन बालालक्षणं दर्शितम्। तदुक्तम्—'अस्तिभयमस्ति कौतुकमस्ति मन्दाक्षमस्ति चोत्कण्ठा। बालानां प्रणयिनि जने भावः कोऽप्येष अनेकरसः ॥' पुनः कीदृशी ? बहुविधमनेकप्रकारं कूजितम् अव्यक्तशब्दो यत्र एतादृशे रतिरसे शृङ्गाररसे रसिता हर्षिता रसो जातोऽस्या इति तारकादित्वादितच्। अतएव 'रसितः शब्दिते कृष्टे इति विश्वः ॥

१८। पुनः कीदृशी तत्राह । विपुलो महान् पुलको रोमाञ्चो यस्याः सा तथा । पृथुः अतिशयितो वेपथुभङ्गः कम्प एव ऊर्मिर्यस्याः सा तथा । तदनन्तरं विपुलपुलका चासौ पृथु-वेपथुभङ्गा चेति कर्मधारयः । तदनेन रसातिरेकात् सात्विकभावो दर्शितः । पुनः कीदृशी ? श्वसितं नासावायुः, निमीलितं नयनसङ्कोचः । श्वसितञ्च निमीलितञ्चेति तथा ताभ्यां श्वसितनिमीलिताभ्यां विकसदभिव्यक्तिं गच्छन् अनङ्गो यस्याः सा तथा । 'भङ्गस्तरङ्ग ऊर्मि वे'त्यमरः । श्वसितेत्यनेन सान्निध्यस्य लक्षणं दर्शितम् । तदुक्तं रसिकसर्वस्वे—'मुहुः स्वजघनश्लेषसीत्कारो वीतलज्जता । शृङ्गारश्वसितं नार्य्याः च्युतिसान्निध्यसूचकाः ।' इति । निमीलितेत्यनेन क्रमप्राप्तच्युतिकाललक्षणं सूचितम् । तदुक्तं भारते—'मूर्च्छना मीलनञ्चैवाक्ष्णोश्चुतिकालस्य लक्षणम् । सर्वमेतत् परिज्ञाय साधयेत्तत् सुखं ततः ॥' इति ।

१९। पुनः कीदृशी तत्राह । श्रमजलकणभरेण विपरीतरतायाः सजलितधर्मकणातिशयेन सुभगं मनोहरं शरीरं यस्याः सा तथा । पुनः कीदृशी ? उरसि अर्थात् कृष्णस्य, परिपतिता सर्वतोभावेन निःसहीभूय पतिता, न तु रतिविरतावपि प्रियाश्लेषमपहायान्यत्र गतेत्यर्थः । अतएव रतिरेव रणः संग्रामः, तत्र धीरा पण्डिता । अतएवार्वाचीनानामपि रत्यन्तवर्णनं नाधराद्विगलिताधरपाणिनो बभूव शिथिलो भुजबन्धः कुण्डलादपससारं न पाणिः कामकेलिविरतावपि यूनोः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गुर्ज्जरीरागेण गीयते ।

श्रीजयदेवभणितहरिरमितम् ।
कलिकलुषं जनयतु परिशमितम् । कापि० ॥ २० ॥
विरहपाण्डुमुरारिमुखाम्बुजद्युतिरयं तिरयन्नपि वेदनाम् ।
विधुरतीव तनोति मनोभुवः सुहृदये हृदये मदनव्यथाम् ॥ २१ ॥
समुदितमदने रमणीवदने चुम्बनवलिताधरे ।
मृगमदतिलकं लिखति सपुलकं मृगमिव रजनीकरे+ ॥
रमते यमुनापुलिनवने विजयी मुरारिरधुना ॥ ध्रुवम् ॥ २२ ॥

सारवती

२०। कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं प्रकृतगीतमुपसंहरति। श्रीजयदेवभणितं कर्तृ कलिकलुषं कलियुगोत्पन्नप्रत्यवायं परिशमितं जनयतु गायतां शृण्वताञ्चेत्यर्थात् । कीदृशम् ? अतिललितं तालगानशुद्धत्वेनात्यन्तमनोहरमित्यर्थः । 'कलहे च युगे कलिरि'ति धरणिः । 'कलुषं वृजिनैनोघमि'त्यमरः ॥

२१। चन्द्रकिरणमसहमानः निजान्तस्तापमावेदयति। अये इति विषादे सखीसम्बोधने वा। अयम्विधुश्चन्द्रः हृदयेऽर्थात् मम, अतीव मदनव्यथां मदनकर्त्तव्यतां तनोति विस्तारयति। अत्र हेतुगर्भविशेषणमाह— कीदृशः मनोभुवः ? कामस्य सुहृत् सखा। अन्योऽपि यस्य सखा स तत्कर्त्तव्यम्पल्लवयतीत्युचितमेव। पुनः कीदृशः ? विरहेण पाण्डोः धूसरस्य मुरारिमुखाब्जस्य द्युतिरिव द्युतिर्यस्य एतादृशः। अतएव मदीयां वेदनां पीडाम् तादृशमुरारिमुखाब्जस्मरणजनितसुखेन तिरयन्नाच्छादयन्नपि। अत्र स्थले कलावच्छेदेन वेदनातिरोधानजननयोरुपपत्तिरिति नोभयत्र समानकालत्वविरोधः। 'अये कोपे विषादे च सम्बुद्धौ स्मरणेऽपि चे'ति विश्वः। अत्र रूपकानामालङ्कारः, यमकोऽपि। तथा च दण्डी, 'एकद्वित्रिचतुष्पादैर्यमकानां विकल्पना।* आदिमध्यान्तमध्यान्तमध्याद्यन्तसर्वतः॥' इति ॥

२२। गीतस्यास्य गुर्ज्जरीरागः। एकतालीतालः। लक्षणन्तूक्तमेव। अत्रापि गीते वक्त्री राधा विप्रलब्धेव। वर्णनीया तु नायिका स्वाधीनभर्तृकेत्यवधेयम्। पुनरपि रतिसङ्गवेगोत्सारितविभूषणानां प्रसाधनङ्करोतीति भावनयोत्थाप्य राधिका प्रलपति—अधुना इदानीं मुरारिः श्रीकृष्णो रमते क्रीडति। कुत्रेत्याकांक्षायामाह—यमुनापुलिनवने यमुनापुलिन-

---

* 'रजनिकरे' इति पाठान्तरम् ।

+ 'चतुष्पादयमकानां विकल्पनाः' इति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घनचयरुचिरे रचयति चिकुरे तरलिततरुणानने।
कुरुवककुसुमं चपलासुषमं रतिपतिमृगकानने ॥ रमते० ॥ २३ ॥
घटयति सुघने कुचयुगगगने मृगमदरुचिरूषिते।
मणिसरममलं तारकपटलं नखपदशशिभूषिते ॥ रमते० ॥ २४ ॥

सारवती

समीपस्थविपिन इत्यर्थः। यद्वा यमुनापुलिने वने वनोपलक्षितप्रदेश इत्यर्थः। यथा श्रुते पुलिनस्य वृक्षसमूहात्मवनाभेदासम्भव इत्यवधेयम्। कीदृशो मुरारिः? विजयी रतिरणजयवान् इत्यर्थः। अत्र प्रायो वीररता स्त्रिय इति तदनुगुणपुरस्कारेण मुरारिपदोपन्यासः। कथं रमत इत्याह—रमणीवदने कान्तामुखे मृगमदतिलकं कस्तूरिकाचित्रं सपुलकं वदनस्पर्शजनितरोमाञ्चसहितं यथा स्यात्तथा लिखति। वदने कथम्भूते? समुदितो मदनो यस्यात् तत् तथा तस्मिन्। पुनः कथम्भूते? चुम्बनेन चुम्बनार्थं वा वलितः सम्भक्तः अधरो यत्र स तथा तस्मिन्। तथा च तिलकं दत्वा वदनमतिसुन्दरमिति कृष्णेन चुम्बितमिति वाक्यार्थः। कस्मिन् कमिव? रजनीकरे चन्द्रे मृगमिव। मुखस्याह्लादकत्वाच्चन्द्रसाम्यं कृष्णवर्णत्वान्मृगमदतिलकस्य मृगसाम्यमित्यवधेयम्। नायिका गोराङ्गी। तस्याः ललाटे मृगमदतिलकस्यातिरमणीयतया यथायोग्यं कृष्णेन क्रियत इति भावः। 'तिलकं चित्रके वृक्षे मुखेऽपि च मनोहर' इति धरणिः॥

२३। अपि किङ्करोत्यत आह—चिकुरे केशे कुरुवककुसुममरुणझीण्टीपुष्पं* रचयति यथास्थानं विस्तारयति। चिकुर इत्येकवचनं सम्वृत्तकेशाभिप्रायमित्यवधेयम्। कुरुवककुसुममित्यत्राप्येकवचनं समूदायाभिप्रायेणेत्यवधेयम्। कीदृशे चिकुरे? घनचयरुचिरे मेघसमूहवन्मनोहरे। कुसुमं कथम्भूतम्? चपलासुषमं चपलाया इव विद्युत इव सुषमा शोभा यस्य तत्तथा। चपलासुषमामिति क्वचित् पाठः। तत्पक्षे चपलाया विद्युतः सुषमामत्यन्तसदृशमित्यर्थः। पक्वतपुष्पानां लक्षालक्षत्वाल्लोहितत्वाच्च विद्युत्साम्यम्। अन्यस्मिन्नपि घनसमूहे विद्युद्वलतीत्युचितमेव। चिकुरे पुनः किम्भूते? वलितानि निजसौन्दर्यदर्शनकौतुकेन तरलिततरुणजनानामाननानि येन तत्तथा तस्मिन्। पुनः किम्भूते? रतिपतिमृगकानने। रतिपतिः कामः, स एव मृगः सकललोकचाञ्चल्यकारित्वात्। तस्य कानने निवासवन इति वेत्यर्थः। तथा च तत्केशपाशे सर्वात्मना निरन्तरं कामो वसतीति वाक्यार्थः। 'तडित् सौदामिनी विद्युच्चञ्चला चपला अपी'त्यमरः। 'सुषमा परमा शोभे'त्यमरः॥

२४। अपि किङ्करोत्यत आह। महत्वात् कुचयुगमेव गगनत्वेन निरूपितम्। स श्रीकृष्णः कुचयुगगगने तारकपटलं तारकसमूहरूपममलं निर्मलं मणिसरं मुक्ताहारं घटयत्यायोजयति। अन्यत्रापि गगने तारकपटलघटनमुचितमित्याशयः। कीदृशे कुचयुगगगने?

* 'झीण्टापुष्पम्' इति पाठान्तरम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जितबिसशकले मृदुभुजयुगले करतलनलिनीदले ।
मरकतवलयं मधुकरनिचयं वितरति हिमशीतले ॥ रमते० ॥ २५ ॥
रतिगृहजघने विपुलापघने मनसिजकनकासने ।
मणिसारसनं* तोरणहसनं विकिरति कृतवासने ॥ रमते० ॥ २६ ॥

सारवती

सुघनेऽत्यन्तनिविड इत्यर्थः । गगनमपि सूत्कृष्टा घना यत्रेति एतादृशमिति । पुनः कीदृशे कुचयुगगगने ? मृगमदः कस्तूरी, तस्या रुचिः दीप्तिस्तया रूषिते शोभमाने । गगनमपि मृगमद-प्राया रुचिस्तया शोभमानं स्वभावतो नीलवर्णत्वात् । पुनः कीदृशे ? कुचयुगगगने नखपदशशि-भूषिते । नखपदमेव शशी प्रतिपच्चन्द्रः, तेन भूषिते । गगनमपि प्रतिपच्चन्द्रेणालङ्कृतं भवतीति रूपकालङ्कारः । 'मृगनाभिमृगमदो गन्धशेखरमित्यपि 'इति हारावलिः । 'अभिस्वङ्गे स्पृहायाञ्च गभस्तौ च रुचिर्मते'ति विश्वः । 'मुक्ताहारे मणिसरः कटिसूत्रे परिच्छदे' इत्यपि । 'तारकः कर्णधारे च नक्षत्रे दिशि तारकमि'ति च । 'पदं स्थाने च वाक्ये च व्यवसायोपदेशयोरि'ति शाश्वतः ॥

१५। अपि किङ्करोत्यत आह— मृदुभुजयुगले कोमलबाहुयुगले मरकतवलयं मरकतघटित-कङ्कणं वितरति ददाति । विपूर्वस्तरतिर्दाने । दानपदार्थस्तु प्रकृते परिवापनमेवेत्यवधेयम् । यद्वा तदीयभुजपीडनशङ्कया मृदु लघु यथा स्यादेवं भुजयुगले मरकतवलयं वितरतीत्यन्वयः । कीदृशे भुजयुगले ? जितबिसशकले जितं बिसशकलं येन तस्मिन् । तथा च ततोऽप्य-धिककोमले इति वाक्यार्थः । पुनः किम्भूते ? करतलनलिनीदले करादेव नलिनीदले यत्र तस्मिन् । पुनः कीदृशे ? हिमशीतले हिमादपि शीतल इत्यर्थः, कामानलतप्तानां तापशान्ति-करत्वात् । कीदृशं वलयम् ? मधुकरनिचयमिव इति रूपकालङ्कारः । अन्यस्मिन्नपि बिसदन्ते पद्मिनीपत्रयुक्ते हिमशीतले कश्चिन्मधुकरनिचयं विक्षिपतीति ध्वनिः । 'मृणालं बिसमब्जादो'त्यमरः । 'भित्त' शकलखण्डे वे'ति च । 'युग्मन्तु युगलं युगमि'त्यपि । 'स्वरूपानु द्वयोस्तलमि'त्यपि । 'नलिनी पद्मिनी पद्म व्योमसिन्धुः सरोवर' इति विश्वः ॥ 'कङ्कणं वलयो मत' इति धरणिः ॥

१६। अपि किङ्करोत्यत आह । रतेः शृङ्गारस्य गृहम् आश्रयो यज्जघनं नितम्बप्रदेश-स्तस्मिन् मणिसारसनं मणिमयमेखलां विकिरति क्षिपतीत्यर्थः । कीदृशे ? विपुलो महान् अपघनोऽङ्गावयवो यस्य तस्मिन् । तेन नितम्बप्रदेशस्य गौरवातिशयो दर्शितः । पुनः कीदृशे ?

---

* 'मणिमयरसनम्' इति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चरणकिसलये कमलानिलये नखमणिगणपूजिते।
बहिरपवरणं यावकभरणं जनयहि हृदि योजिते ॥ रमते० ॥ २७ ॥
रमयति सुभृशं कामपि सुदृशं खलहलधरसोदरे।
किमफलमवसं चिरमिह विरसं वद सखि विटपोदरे ॥ रमते० ॥ २८ ॥

सारवती

मनसिजस्य कामस्य कनकासने कामपीठे इव विस्मृतत्वात् निरन्तरमधिष्ठितत्वाच्चेत्यवधेयम्। पुनः कथम्भूते? कृतवासने कृता वासना स्पृहा यत्र, कृष्णेनेत्यर्थात्। रसनापरिधापनसमये वस्त्राविगमनेन कृष्णेन सम्यक् प्रकारेण दर्शनात्तत्र स्पृहा कृतेति वाक्यार्थः। यद्वा कृतं वासनं धूपनं यत्र एतादृशे। सुरतार्थं जघनप्रदेशं वराङ्गना धूपयन्तीति प्रसिद्धिः। मणिसारसनं कीदृशम्? तोरणस्य हसनं निन्दकम्। तोरणं हसतीति नन्द्यादित्वात् कर्त्तरि न्युः। अन्यस्मिन्नपि राजगृहे विपुलशरीरे महाजनाधिष्ठिते तोरणं क्षिप्यत इति ध्वनिः। रूपकमात्रालङ्कारः। अपघनोऽङ्गमिति निपातने। 'स्त्रीकट्यां मेखला काञ्ची सप्तकी रसना तथा। क्लीबे सारसनञ्चाथ पुंस्कट्यां मेखला त्रिष्वि'त्यमरः॥ 'वासनं धूपने ज्ञाने इच्छायामपि वासनेति धरणिः॥

१७। अपि किङ्करोत्यत आह—चरणकिसलये पदपल्लवे यावकभरणमलक्तकरसेन स्वभावसिद्धकान्तेः भरणं पूरणं जनयत्युत्पादयति। अन्यत्रापि सजातीयेन पूरणमुचितमेव। कीदृशम्? बहिरपवरणं बहिर्बाह्ये अपवरणमाच्छादकमित्यर्थः। बहिरेव चरणे तरुणीभिरलक्तकरसासङ्गः क्रियत इत्याचारात्तथा वर्णितमित्यवधेयम्। किम्भूते चरणकिसलये? कमलानिलये कमलायाः लक्ष्म्याः निलये गृहे। अन्योऽपि किसलयः कमलाया निलय इति युक्तमुक्तम्। अन्यन्त्रापि लक्ष्मीगृहे बहिर्बाह्येऽपवरणं ओढाविति प्रसिद्धं तत् क्रियत इत्यवधेयम्। पुनः कीदृशे? नखा एव मणयः। तेषां गणः समूहः। तेन पूजिते अर्चिते प्रशस्ते वा। अन्यदपि लक्ष्मीगृहं मणिगणपूजितं क्रियत इत्याशयः। पुनः कीदृशे? हृदि वक्षसि योजिते अलक्तकरसादानार्थमर्थात् कृष्णेन, निवेशित इत्यर्थः। तदेभिः पदैर्निर्भरानन्दयुक्तः स भगवान् न मां स्मरत्यपीति ध्वनितम्॥

२८। अतएवान्तर्विमृश्य पुनरपि सखीं सम्बोधयति। खलश्चासौ हलधरसोदरश्चेति खलहलधरसोदरः कृष्णः। हे सखि! खलहलधरसोदरे कृष्णे कामपि भाग्यवती सुभृशमत्यर्थेन सुदृशं यदृच्छया कृष्णमुखावलोकनेनास्मदादिभ्यः सूत्कृष्टा दृक् यस्याः सा तथा, तां रमयति। उक्तप्रकारेण क्रीडति सति विरसं यथा स्यादेवं चिरं चिरकालं व्याप्य इह रात्रौ विटपोदरे वृक्षाभ्यन्तरे अहमफलं निष्फलं किमवसं किं स्थितास्मीति त्वं वद।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इह रसभणने कृतहरिगुणने मधुरिपुदसेवके।
कलियुगचरितं न वसतु दुरितं कविनृपजयदेवके ॥ रमते० ॥ २९ ॥
नायातः सखि निर्दयो यदि शठस्त्वं दूति किं दूयसे
स्वच्छन्दं बहुवल्लभः स रमते किं तत्र ते दूषणम्।
पश्याद्य प्रियसङ्गमाय दयितस्याकृष्यमाणं गुणैर।
उत्कण्ठार्त्तिभरादिव स्फुटदिदं चेतः स्वयं यास्यति ॥ ३० ॥

सात्वती

अतः परं न स्थास्याम्येवेत्यभिप्रेत्यातीतारम्भनशोचनमित्यवधेयम्। हलधरपदोपन्यासेन हालिकसोदरत्वं दर्शयता कृष्णस्याविज्ञत्वं सूचितम्। यद्वा हलधरो बलदेवः, स चोन्मत्तः इति तत्सोदरत्वदर्शनेन कृष्णस्याप्युन्मत्तत्वं सूचितमिति ॥

२९। कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं प्रकृतगीतमुपसंहरति। कविनृपजयदेवके कविराजजयदेवके। स्वार्थे कन्। इह रसभणने शृङ्गाररसभणने कलियुगचरितं कलियुगे चरितमाचरितं दुरितं दुष्कृतं न वसतु। तथा च सततं शृङ्गारवर्णनेन दूरितं भवति, तन्मयि कविराजे न भवत्विति वाक्यार्थः। तदत्र हेतुगर्भविशेषणमाह—कविनृपजयदेवके कथम्भूते ? कृतहरिगुणने कृतं हरेः कृतगीतेन चिन्तनं येन तस्मिन्। पुनः कथम्भूते ? मधुरिपुपदसेवके मधुरिपोः कृष्णस्य पदयोः सेवक इत्यर्थः। तथा च रसभणनमप्यस्माकं कृष्णचरितानुसङ्गीतयेत्यहं कविराजो निरन्तरं तच्चिन्तपरायणस्य कृष्णसेवकस्य मम शृङ्गारवर्णनाजनितदुःखकृतमपि न भविष्यतीत्यपि सूचितम् ॥

३०। सख्या कृष्णस्तथा नानुनीत इत्याशङ्क्यार्थीभर्त्सनपूर्वकनिजार्त्तिमावेदयदि—हे सखि हे दूति ! सखीति सप्रेमवचनम् ? दूतीति प्रकृतदौत्याभिप्रायेण। यदि शठो धूर्त्तः निर्दयो निष्करुणः नायातः नागतः तदा किं त्वं दूयसे किमर्थमुपतप्ता भवसि ? टुदूङ उपतापे। उपतापाभावे हेतुमाह—स बहुवल्लभः बह्व्यो वल्लभाः प्रेयस्यो यस्य एतादृक्। स्वस्य छन्दः स्वच्छन्दः। क्रियाविशेषणत्वेन नपुंसकम्। 'अभिप्रायश्छन्द आशय'इत्यमर। स्वच्छन्दं यथा स्यात्तथा रमते क्रीडति। तत्र विषये ते तव किं भूषणमपि तु न किमपीत्यर्थः। तथा च भवत्याः सद्दशपरित्यागमात्रमुद्देश्यं न तु रावाजीवितमित्याशयः। तदत्र किं दूयस इत्युक्त्वा स धूर्त्तो निर्दयो बलुवल्लभः स्वल्पान्वयेनानुनीतोऽपि पुनः पुनस्तथानुनयो भवति। तथा च तदुक्तम् 'येन विना न जिविज्जि अडा अनुनिज्जि असोक आववाहो विपत्ते विन अवता हे भन कस्मन वल्लहोग्नी'ति। भवत्या च स तथा नानुतीत इति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

देशाख्यरागेण गीयते।

अनिलतरलकुवलयनयनेन।
तपति न सा किसलयशयनेन॥
सखि या रमिता वनमालिना॥ ध्रुवम्॥ ३१॥

सारवती

तात्पर्यार्थः सूचितः। नास्माकं दोषो भवत्यास्तच्चित्तस्वास्थ्यं कथं स्यादिति प्रकृतार्थमभिप्रेत्याह—पश्य अद्य वर्तमानदिन एव इदं मदीयं चेतो मनः कर्तृ प्रियसङ्गमाय स्वयं यास्यतीत्यर्थः। गमनञ्च पूर्वदेशविभागोत्तरदेशसंयोगश्च। तथा च शरीररूपपूर्वदेशविभागेन मरणं सूचितम्। मरणान्तरमवश्यमेतादृशमग्नचेतसो मम तत्सङ्गमोऽपि भविष्यतीति प्रियसङ्गमयेत्युक्तम्। अत्र हेतुगर्भविशेषणमाह—किम्भूतम्? आकृष्यमाणम। पुनः किम्भूतम्? दयितस्य कृष्णस्य गुणैः सौन्दर्यादिभिः आकृष्यमाणम्। उत्कण्ठा पुनः किम्भूतम्? उत्सुकता। तया या आर्त्तिः तस्या भारो अतिशयः तस्मात् स्फुटदिव विदीर्यमाणमिव*। अन्यदपि किञ्चित्पदार्थानां भरेण स्फुटतीत्युचितम्। तथा च पाषाणादिद्रव्यं विदीयमाणं गुणैराकृष्यमाणं गच्छत्येव, तथेदमपि यास्यत्येवेति वाक्यार्थः। आह च—'उत्कण्ठोत्कलिके समे। अर्त्तिः पीडा धनुःकोट्योरि'त्यमरः॥

३१। तादृशस्यापि विश्लेषेण कथमीदृशी भवसीति सखीवचनमाशङ्क्य न केवलमहमेवैतादृशी किन्तु यायास्तेन रमितास्तासां सर्वासामेषैव रीतिरतो नाहमभियोज्य इत्यतः सकलसाधारण्यं दर्शयति। गीतस्यास्य देशाख्यरागः। रूपकतालः। रागलक्षणन्तूक्तमेव। विप्रलब्धोत्कण्ठिता चात्र नायिका। गीतार्थस्तु हे सखि! या वनमालिना कृष्णेन रमिता क्रीडिता। अत्र निष्ठया रमणस्यातीतत्वं दर्शितम्। तथा च यातीतरतिः सा किसलयशयनेन पल्लवशय्यया न तपति अपितु तपत्येवेत्यर्थः। वनमालिना किम्भूतेन? अनिलेन वायुना तरलं यत् कुवलयं नीलनलिनं तद्वन्नयनं यस्य स तथा तेन। एतेन नयनस्यातिचाञ्चल्यं दर्शितम्। अथ च या वनमालिना अरमिता न रमितेत्यर्थः सा किसलयस्य शयने न तपति अपितु तपत्येवेत्यर्थः। तथा च वनमालैव+ परं सुखिनीति भावः। जगद्धरादयस्तु या वनमालिना रमिता सा किसलयशयने न तपति नोत्तप्ता भवति। या वनमालिना अरमिता सा किसलयशयनेन न तपति अपि तु तपत्येवेत्यर्थः इति क्रमेण योजयन्ति। तन्न मनोरमम्। एवं सति कृष्णेन रमितैव। तथा च स्वस्मिन् रमितत्वसत्त्वात् सुखिनीत्वम् अरमितत्वव्यतिरेकाच्च दुःखिनीत्वं प्रसज्येत। तदुभयस्यावर्णनीयत्वादिदानीं सा राधा मनोदुःखमसहमानाऽन्यस्याश्च कृष्णरमितायाः सुखं कथयतीति स्वोक्तवत्राविरोधाच्चेति॥

---

* 'विदार्यमाणमि'ति पाठ०।
+ 'तथा च तेन मनसा नैव' इति पाठ०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विकसितसरसिजललितमुखेन ।
स्फुटति न सा मनसिजविशिखेन ॥ सखि या० ॥ ३२ ॥
अमृतमधुरमृदुतरवचनेन ।
ज्वलति न सा मलयजपवनेन ॥ सखि या० ॥ ३३ ॥
स्थलजलरुहरुचिकरचरणेन ।
लुठति न सा हिमकरकिरणेन ॥ सखि या० ॥ ३४ ॥
सजलजलसमुदयरुचिरेण ।
दलति न सा हृदि चिरविरहेण ॥ सखि या० ॥ ३५ ॥

सारवती

३२। एवमन्यदपि दर्शयति। विकसितं प्रफुल्लं यत् सरसिजं नलिनं तद्वल्ललितं सुन्दरं मुखं यस्य स तथा। तेन वनमालिना या रमिता अरमिता वा सा मनसिजः कामः तस्य विशिखेन बाणेन न स्फुटति न विदीर्णा भवत्यपितु भवत्येवेत्यर्थः। तथा च तेन रममानेव मनसिजविशिखेन न स्फुटतीति वाक्यार्थः ॥

३३। एवमन्यदपि दर्शयति। अमृतमिव मधुरं मृदुतरम् अतिकोमलं वचनं यस्य तेन वनमालिना या रमिता अरमिता वा सा मलयजपवनेन दक्षिणानिलेन न ज्वलति अपितु ज्वलत्येवेति। तथा च तेन रममानैव परं दक्षिणानिलेन न ज्वलतीति वाक्यार्थः ॥

३४। एवमन्यदपि दर्शयति। करौ च चरणौ च करचरणम्। प्राण्यङ्गत्वात् समाहारः। स्थलजलरुहस्य स्थलपद्मस्य रुचिरिव रुचिर्यस्य स तथा। एतादृशं करचरणं यस्य स तथा। तेनैव वनमालिना या रमिता अरमिता वा सा हिमकरकिरणेन चन्द्रकिरणेन न लुठति नाधःपतति अपितु पतत्येवेति। लुठ अधःपतने धातुः। तथा च तेन रममानैव परं चन्द्रकिरणेन न लुठतीति वाक्यार्थः ॥

३५। एवमन्यदपि दर्शयति। सजलो जलसहितो यो जलदो मेघः। समुदायोऽस्यास्तीति समुदायः। तस्यावयवः। अर्शादित्वादच्। तद्वत् रुचिरो यो मनोहरः। अत्रावयविनमपहायावयवरूपजलददृष्टान्तेन कान्तेर्निरन्तरोदितत्वं सूचितम्। तेन वनमालिना या रमिता अरमिता वा सा विरहभरेण हृदि न दलनि न विदीर्यते अपितु विदीर्यत एव। सन्तापस्य हृदय एव वर्णनीयत्वात् हृदीत्युक्तम्। तथा च तेन रममानेव *परं हृदि न विदीर्यत इति वाक्यार्थः। एवं व्याख्याने जलदसमुदायस्योत्स्रायरूपस्य रुच्यभावेन कथं जलदसमुदायं रुचिरेणत्युक्तम् इति सहृदयानां दूषणमपास्तमित्यवधेयम् ॥

---

* 'वनमालिनंव' इति पाठ०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कनकनिकषरुचिशुचिवसनेन ।
श्वसिति न सा परिजनहसनेन ॥ सखि या० ॥ ३६ ॥
सकलभुवनजनवरतरुणेन ।
वहति न सा रुजमतिकरुणेन ॥ सखि या० ॥ ३७ ॥
श्रीजयदेवभणितवचनेन
प्रविशतु हरिरपि हृदयमनेन । सखि या० ॥ ३८ ॥
मनोभवानन्दन चन्दनानिल प्रसीद रे दक्षिण मुञ्च वामताम् ॥
क्षणं जगत्प्राण विधाय माधवं पुरो मम प्राणहरो भविष्यसि ॥ ३९ ॥

सारवती

३६। एवमन्यदपि दर्शयति । कनकस्य निकषे पट्टिकायां या रुचिः तद्वत् शुचिवसनं यस्य तेन पीताम्बरेण वनमालिना या रमिता अरमिता वा सा परिजनानां हसनेन हास्येन न श्वसिति न दुःखं श्वासं न मुञ्चति अपितु मुञ्चत्येवेति । तथा च तेन रममानैव परं परिजनहसनेन न श्वसितीति वाक्यार्थः । अत्र कृष्णशरीरं नीलत्वात् निकषसदृशं वासश्च पीतत्वात् तत्र कनकसदृशमित्यवधेयम् । 'निकषः पट्टिके'ति हारावलिः ॥

३७। एवमन्यदपि दर्शयति । सकलभुवने समस्तस्वर्गादिलोके ये जनाः तेभ्योः वरतरुणेन श्रेष्ठतरुणेन वनमालिना या रमिता अरमिता वा सातिकरुणेन करुणरसेन रुजं पीडां न वहति अपितु वहत्येव । तथा च तेन रममानैव* परं करुणरसेन रुजं पीड़ा न वहतीति वाक्यार्थः ॥

३८। कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं प्रकृतगीतमुपसंहरति । श्रीयुक्तो जयदेवः श्रीजदेवः । अनेन श्रीजयदेवभणितवचनेन प्रकृतगीतेन इत्यर्थात्. हरिः कृष्णः हृदयमपि विशतु अर्थात् शृण्वतां गायताम् । तथा च तदुपस्थापकशब्दप्रवेशात् शब्दो कर्णे प्रविष्ट एव तदुत्तरं शब्दज्ञानोपनीतो मानसज्ञानविषयतां गच्छत्वित्यर्थः । क्वचित् 'भणितमिलनेने'ति पाठः । तत्पक्षे भणितं भणनम् । भावे क्तः । तेन यन्मिलनं प्राप्तिः शब्दोपस्थितिरिति यावत्, तया हृदयमपि विशतु तथा च शब्दज्ञानानन्तरं मानससाक्षात्कारविषयोऽपि भवत्त्विति वाक्यार्थः ॥

३९। प्राणनिरपेक्षा राधा दक्षिणानिलमभ्यर्थयति । प्राणापहरणादन्यत् किमस्माकं विधास्यतीति निर्भरतया रे इति संक्षेपसम्बोधनम् । रे दक्षिणमुञ्च प्रसीद प्रसन्नो भव । प्रसादस्तु प्रकृते प्राणहरणमेवेति भावः, वामतां प्रातिकूल्यं विमुञ्च । प्रातिकूल्य चन्दनानिल प्रकृते रक्षणमेवेत्यवधेयम् । अत्र मलयानिलत्वेनैवार्थात् दक्षिणत्वे प्राप्ते पुनर्दक्षिणपदोपादानं वामतां मुञ्च इत्यस्यानुरोधेन विरोधाभाससूचनार्थमित्यवधेयम् । कीदृश ? मनोभवानन्दन । मनोभवः कामः तमानन्दयतीति आनन्दनः । नन्द्यादित्वादः । तथा च कामेनापि मम प्राणहरणार्थं यत्नः क्रियत एवेति तवानुकूल्ये तस्यानन्दो भविष्यतीति सूचितम् । भवतु तवाभिमतं विलम्बेन

* 'वनमालिनैव' इति पाठ० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रिपुरिव सखीसम्वासोऽयं शिखीव हिमानिलो
विषमिव सुधारश्मिर्यस्मिन्दुनोति मनोगते।
हृदयमदये तस्मिन्नेवं पुनर्वलते बलात्
कुवलयदृशां वामः कामो निकामनिरङ्कुशः ॥ ४० ॥

राधां* विधेहि मलयानिल पञ्चबाण
प्राणान्गृहाण न गृहं पुनराश्रयिष्ये।
किं ते कृतान्तभगिनि क्षमया तरङ्गै—
रङ्गानि सिञ्च मम शाम्यतु देहदाहः ॥ ४१ ॥

सारवती

साधयामीत्याशंक्य त्वरयैवं विधेहीति दर्शयति। हे जगत्प्राण वायो ! धवं स्वामिनं क्षणं स्वल्पकालमपि पुरोऽग्रे निधाय प्राणहरो मा भविष्यसि। तथा चास्माकं स्वामी यदि कदाचित् भवता सन्तापितः समायाति तदा तत्समक्षं भवान् मम प्राणापहरणे क्षमो न भविष्यतीत्यवधेयम्। त्वरया विधेहीति वाक्यार्थः। जगत्प्राणपदेन प्राणप्रतिपक्षतां दर्शयता प्राणापहरणे बीजमुपदर्शितम्। अमानोनाः प्रतिषेधवाचकाः। भगीरथादयस्तु हे जगत्प्राण वायो ! माधवं कृष्णं क्षणं पुरो निधाय अग्रे कारयित्वा मम प्राणहरो भविष्यसि, तथा च प्राणवायुः प्राणान् द्रुह्यतीति मित्रद्रोही चाण्डालोऽसौ, तेन मरणकाले तस्य स्पर्शे कृष्णदर्शनेन प्रायश्चित्तं स्यादिति भाव इति व्याचक्षते। तत्पक्षे भविष्यसीति पदेनाशंसायामर्थोपस्थितिं विना प्रकृतार्थासङ्गतिरित्यवधेयम्। 'समीरमारुतमरुज्जगत्प्राण समीरणाः' इत्यमरः॥

४०। कन्दर्पस्य प्रातिकूल्यं दर्शयति। यस्मिन् कृष्णे स्मरणेन मनोगते सति चित्तस्थिते सति स्वयं सकलसिद्धसुखजनकः सखीसम्वासः सखीभिः सहावस्थितिः रिपुरिव स्वच्छन्दगमनादिक्रियारोधनात् शत्रुरिव दुनोति पीडयति अर्थान्माम्, हिमानिलो हिमसम्बन्धिवायुः शिखीव दुनोत्यर्थान्माम्, सुधारश्मिरमृतकिरणः विषमिव दुनोत्यर्थान्माम्। तथाच स्वभावतो मित्रं शत्रुरिव भवति, हिमशीतलो वायुः वह्निरिव भवति, सुधानिधिरपि विषमिव भवतीत्येवं सर्वेषां वैपरीत्यं भवतीति वाक्यार्थः। तस्मिन् निदये निष्करुणे एवं हृदयं मनः अर्थात् मम, पुनर्बलात् बलते भजते। तस्मात् कुवलयदृशां कृते कामः कन्दर्पः वामः कुटिलः निकामेनात्यर्थेन निरङ्कुशो न विद्यते अङ्कुशो निवारणहेतुर्यस्य एतादृक्। आरोप एवात्रालङ्कारः।

४१। पुनरपि प्राणनिरपेक्षा राधा मलयानिलादीनभ्यर्थयति—हे मलयानिल ! राधां विधेहि। यथेयं त्वरया गतजीविता भवति तथा पीडां विधेहीत्यर्थः। अत्र मलयानिलपदेन पाषाणमयपर्वतसम्बन्धित्वदर्शनेन वायोः काठिन्यसूचनेन पीडायोग्यता दर्शिता। हे पञ्चबाण कामदेव ! बाणान् शरान् गृहाण मम व्यापादनार्थमित्यर्थात्। एतदेव

* 'बाधाम्' इति पाठान्तरम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्तर्मोहनमौलिघूर्णनवलन्मन्दारविश्रंसन-
स्तब्धाकर्षणदृष्टिहर्षणमहामन्त्रकुरङ्गीदृशाम् ।
दृप्यद्दानवदूयमानादिविषदुर्वारदुःखापदां
भ्रंसः कंसरिपोर्व्यपोहतुरश्रेयांसि वंशीरवः ॥ ४२ ॥

इति श्रीगीतगोविन्दे विप्रलब्धावर्णने नागरनारायणो नाम सप्तमः सर्गः ॥

सारवती

दर्शयति—अहं पुनर्गृहं नाश्रयिष्ये न गमिष्यामि। एतेनात्मनो वीरत्वदर्शनेन कामस्य पञ्चबाणत्वदर्शनेन च प्रहारयोग्यता दर्शिता। हे कृतान्तभगिनि यमुने! ते तव क्षमया किम्? अपितु न किमपि। तरङ्गैरङ्गानि सिञ्च। परममदेकतरङ्गसेचनेन मम प्राणत्यागाद्देहदाहः शाम्यतु शमितो भवत्वित्यर्थः। अत्र यमभगिनिपदोपन्यासेन प्रकृतकर्मयोग्यता दर्शिता। अत्र व्याख्याने यमभगिनि तव क्षमया किमित्युक्त्वाऽङ्गानि सिञ्च, मम देहः शाम्यत्विति प्राणनिरपेक्षाया राधाया न वक्तुमुचितमिति दूषणमपास्तम्। 'कृतान्तो यमुनाभ्राते'त्यमरः॥

४२। ग्रन्थप्रक्रमं विहाय सर्गान्ते जनानामाशिषमाह। कंसरिपोः कृष्णस्य वंशीरवो वोऽस्माकम् अश्रेयांसि अमङ्गलानि व्यपोहतु दूरीकरोतु। तथा च दण्डी—'यो मे दर्पं व्यपोहतो'ति। किम्भूतो वंशीरवः? अन्तर्मोहनं मनोमोहः। मौलिघूर्णनं साधु साध्विति कृत्वा शिरस्कम्पनम्। अत एव वलन्मन्दारविश्रंसनं वलतः सम्भक्तस्य मन्दारस्य पारिजातस्य विश्रंसनम् अधःपतनम् स्तब्धाकर्षणं स्तब्धस्य निष्ठुरस्य चेतसः इत्यर्थात्, आकर्षणमाहरणम्, यद्वा स्तब्धं स्तब्धः सात्त्विको भावः, तस्याकर्षणम् आत्मसात्कारणम्। दृष्टिहर्षणं यस्यां दिशि वंशीरवः तत्रावलोकनेन नेत्रोत्साहः। एषु सर्वेषु कुरङ्गीदृशां महामन्त्रः सिद्धमन्त्र इव। तथा च वंशीरवाकर्णनमात्रेण सर्वा नायिकाः सकलभावापन्ना भवन्तीति वाक्यार्थः। पुनः कीदृशः? दृप्यद्भिः दर्पयुक्तैर्दानवैर्दूयमानानां दुःखिताना दिविषदां देवानां दुर्वारदुःखापदाम् अनिवार्यदुःखविपत्तीनां भ्रंशो विनाशकः इति भावः। तथा च भगवद्वंशीरवमाकर्ण्य देवा दुःखार्त्तिं त्यजन्तीति वाक्यार्थः। 'आदितेया दिविषदो लेखे'त्यमरः॥ नागरश्चतुरो नारायणो यत्रेति व्युत्पत्त्या नागरनारायणेति सर्गनाम। इति समस्तप्रक्रियाविराजमानशुक्लध्वजविरचितायां सारवत्यां नागरनारायणो नाम सप्तमः सर्गः॥

—x—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सटीक-गीतगोविन्दम्

अष्टमः सर्गः ।

विलक्षणलक्ष्मीपतिः ।

अथ कथमपि यामिनीं विनीय
स्मरशरजर्जरितापि सा प्रभाते ।
अनुनयवचनं वदन्तमग्रे ।
प्रणतमपि प्रियमाह साभ्यसूयम् ॥ १ ॥

भैरवीरागेण गीयते ।

रजनिजनितगुरुजागररागकषायितमलसनिमेषम्* ।
वहति नयनमनुरागमिव स्फुटमुदितरसाभिनिवेशम् ॥
हरिहरि याहि माधव याहि केशव मा वद कैतववादं
तामनुसर सरसीरुहलोचन या तव हरति विषादम् ॥ २ ॥ ध्रुवम् ॥

सारवती

१। खण्डितनायिकाया राधायाः प्रियोपलम्भवर्णनाय प्रसङ्गमवतारयति । अथान्तरं सा राधिका स्मरशरजर्जरितापि कामबाणखण्डखण्डीभूतापि यामिनीं रात्रिं कथमपि कष्टसृष्ट्या विनीय नीत्वा प्रभाते प्रातःकाले अग्रे अनुनयवचनं प्रीतिजनकवचनं वदन्तं प्रणतमपि प्रकर्षेण नतं पादपतितमिति यावत्, एवम्भूतमपि प्रियं साभ्यसूयं सक्रोधं यथा स्यादेवमाह उक्तवती । अत्र च सर्गे खण्डिता नाम नायिका वर्णनीया । तल्लक्षणम्—'निद्राकषाय मुकुलीकृतताम्रनेत्री नारी नखव्रणविशेषविचित्रिताङ्गी । यस्याः कृतेऽपि पतिरेति गृहं प्रभाते सा खण्डितेति गदिता कविभिः पुराणैः ॥'

२। अस्य गीतस्य भैरवीरागः । रूपकतालः । रागलक्षणम् श्यामा सुकेशी प्रियवादिनी च संलेपिता लोहितचन्दनेन । पीतस्रगध्यासितकेशपाशा प्रोक्ता कवीन्द्रैः किल भैरवीयम् ॥'

राधया यदुक्तं तदाह । हरि हरीति द्विरुक्तिः कोपजनितसम्भ्रमोक्तौ । हे माधव ! याहि गच्छ। मा लक्ष्मीः, तस्या धवः स्वामी । लक्ष्मीधवत्वेन चाञ्चल्यं तव युक्तमेवेति ध्वनिः ।

---

*'अलसनिवेशम्' इति पाठः । अतः सारवत्यामपि 'अलसा मन्दीभूताति निवेश विशनानि निपतनानि इति यावत्' इति पाठान्तरं वर्तते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कज्जलमलिनविलोचनचुम्बनविरचितनीलिमरूपम् ।
दशनवसनमरुणं तव कृष्ण तनोति तनोरनुरूपम् ॥ हरिहरि० ॥ ३ ॥

सारवती

हे केशव त्वं याहि गच्छ। के सुखे शव इवेति छलेन सुखानभिज्ञत्वदर्शनेन मांविहायाऽन्याङ्गनासङ्गित्वं तव युक्तमेवेति ध्वनितम्। अत्र याहीति द्विरुक्तिर्भर्त्सनोक्तौ, वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपभर्त्सनेष्विति पाणिनिसूत्रात्। कैतववादं कितवो धूर्त:, तस्य वादो वचनं त्वं मा वद मा ब्रूहि। वद धातोर्भावे घञिति वादः। हे सरसीरुहलोचन कमलोचन! तां गोपीमनुसर अनुगच्छ या तव विषादं कामजनितदुःखं हरति। अत्र निजमुखचन्द्रसविधे लज्जया नयननिमीलनदर्शनेन सरसीरुहलोचनेति सोपहासवचनमित्यवधेयम्। विषादं हरतीत्यनेनात्र कामजनितदुःखमात्रहरणं भवतो भविष्यतीति न तु कामकलाकुशलकामिनीसङ्गमसुखमपीति भावः। कैतवमेव दर्शयति रजनिजनितेति। नयनं कर्तृ अर्थात् तव, स्फुटं व्यक्तम् अनुरागमिव वहति। अनुरागो लौहित्यं तदेव हृदयानुरागत्वेनोत्प्रेक्षते। नयनमिति जात्युत्प्रेक्षया एकवचनम्। किम्भूतं नयनम्? रजन्यां रात्रौ जनितो रजनिजनितो। गुरुर्महान्। जागरः जागरणम्। भावे घञ्। तयोः कर्मधारयः। तेन यो रागः लौहित्यं तेन कषायितं लोहितीकृतम्। अत्र यद्यपि रागपदमधिकं जागरकषायितमित्येव वाच्यं तथापि सुवर्णेन धनेन धनीतिवत् समाधेयम्। यद्वा तादृशरागेण कषायितं विलिप्तमित्यर्थः। तथा च 'कषायो रागभेदे स्यादङ्गरागे विलेपने। क्वाथरसे कषायोऽस्त्री तथा कलियुगेऽपि चे'ति। पुनः किम्भूतम्? अलसानि मन्दीभूतानि निमेषाणि निमेषणानि निपतितानीति यावत् यस्य तत्तथा, अर्थादुन्निद्रया। पुनः किम्भूतम्? उदित उद्गतो रसाभिनिवेशः शृङ्गाराभिनिवेशो यत्र तत्तथा। तथा चैतादृशनयनवानपि भवानेवं वक्तीति कैतववादो व्यक्त एव॥

३। पुनरन्याङ्गनासङ्गचिह्नं दर्शयन्ती भर्त्सयति। हे कृष्ण अरुणं तव दशनवसनम् ओष्ठाधरं कर्तृ तनोः शरीरस्यार्थात्तव, अनुरूपं योग्यं कज्जलेन मलिनं यद्विलोचनं तत्र यच्चुम्बनं तेन विरचितं यन्नीलिमरूपं कृष्णवर्णं तत् तनोति विस्तारयति। तथा च कृष्णस्य भगवतः तद्योग्यं न त्वरुणाधरस्येति प्रकृतपापेनेदं वृत्तमिति दर्शितम्। यद्वा दशनवसनपदेनातिशुभ्रदशनद्युतिमतः कज्जलसम्बन्धदर्शनेन सितासितसम्बन्धः सूचितः। लोचने चुम्बनयोग्यता चक्षुः कपालफलकेत्यादिना कामशास्त्रदर्शितैव। 'ओष्ठाधरौ तु रदनच्छदौ दशनवाससी'त्यमरः। 'रूपं स्वभावसौन्दर्य' इति विश्वः॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वपुरनुहरति तव स्मरसङ्गरखरनखरक्षतरेखम् ।
मरकतशकलकलितकलधौतलिपेरिव रति जयलेखम् ।। हरिहरि० ॥ ४ ॥
चरणकमलगलदलक्तकसिक्तमिदं तव हृदयमुदारम् ।
दर्शयतीव बहिर्मदनद्रुमनवकिसलयपरिवारम् ।। हरिहरि० ।। ५ ॥
दशनपदं भवदधरगतं मम जनयति चेतसि खेदम् ।
कथयति कथमधुनापि मया सह तव वपुरेतदभेदम् ।। हरिहरि० ॥ ६ ॥

सारवती

४। अन्याङ्गनासङ्गमं दर्शयन्ती पुनर्भर्त्सयति। तव वपुः शरीरं मरकतस्य नीलप्रबालस्य शकले खण्डे कलिता अर्पिता या कनकधौतलिपिः सुवर्णरसलिपिः तस्या रतिजयलेखं सुरतजयपत्रमनुहरति। यद्वा अप्यर्थे इवशब्दः। तथा च वपुरपि रतिजयलेखमनुहरतीत्यर्थः। किम्भूतं वपुः ? स्मरसङ्गरे कामयुद्धे खरनखरेण क्षतरेखा क्षतरूपरेखा यत्र एतादृशम्। नखपदस्य क्षतद्विरेखाद्वयोपदर्शनेन स्मरसमरोचितत्वं लिप्यनुकूलत्वञ्च दर्शितम्। तथा च मरकतसदृशं तव वपुः नखरक्षतरेखमनुहरति। कमिव ? मरकतशकलकलितकलधौतलिपेः रतिजयलेखमिवेत्यर्थः। अत्र नखरपदेन एतादृशीं मां विहाय न्यूनमनुरक्तोऽसीति मन्दत्वं सूचितम्। इदं पुनरत्रावधेयम्—पूर्वपक्षे रतिजयो नायकस्य, अत्र तु नायिकाया इति। 'नखोऽस्त्री नखरो स्त्रियामि'त्यमरः। 'लिखिताक्षरसंस्थाने लिपिर्लिबिरुभे स्त्रियौ।' 'भित्तं शकलखण्डे वा' इति। 'कलधौतं हेमहाटकमि'ति च ॥

५। पुनरस्याङ्गनासङ्गमचिह्नदर्शनेन भर्त्सयति। इदं तव हृदयं बक्षः कर्तृ। बहिर्बाह्ये मदनः कामः स एव द्रुमः वृक्षः तस्य नवकिसलयपरिवारं नूतनपल्लवसमूहं दर्शयतीव। किसलयस्य नूतनत्वेनातिलौहित्यं दर्शितम। हृदयं कथम्भूतम् ? उदारम् असङ्गोपकत्वेन महत्तरमित्यर्थः। पुनः किम्भूतम् ? चरणावेव कमले, ताभ्यां गलताक्षरा अलक्तकेन यावकरसेन सिक्तम्? तथा च क्रौञ्चबन्धात् कामिनीचरणयोः अलक्तरयाः कृष्णस्य हृदि लग्नाः। त एव हृदयस्थमदनद्रुमस्य नवकिसलयत्वेन उत्प्रेक्षन्त इति किसलयपदेन च पुष्पफलाद्यपि भात्येवेति ध्वनितम्। क्रौञ्चबन्धलक्षणं भारते—'हस्तौ पश्चात् समानीयपदस्थाने शिरस्तथा। स्तियाः पादौ हृदि स्थाने क्रौञ्चबन्धः प्रकीर्तितः।।'

६। पूर्वानुरागं स्मारयन्ती भर्त्सनायान्यनायिकासङ्गमचिह्नमुपदर्शयति। भवदधरगतं दशनपदम् अर्थादन्यकामिनीदन्तक्षतं कर्तृ मम चेतसि चित्ते खेदं विषादं जनयति उत्पादयति। अधुनापि एतादृशि भेदे सिद्धेऽपि तवैतत् पराङ्गनादन्तेन क्षताधरं वपुः शरीरं मया सह अभेदं कथं कथयति? न ह्यस्मिन् दन्ताघातेनान्यस्य दुःखं भवतीत्यभेदकथनम् ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बहिरिव मलिनतरं तव कृष्ण मनोऽपि भविष्यति नूनम्।
कथमथ वञ्चयसे जनमनुगतमसमशरज्वरदूनम् ॥ हरिहरि॰ ॥ ७ ॥
भ्रमति भवानबलाकवलाय वनेषु किमत्र विचित्रम्।
प्रथयति पूतनिकैव वधूवधनिर्दयबालचरित्रम् ॥ हरिहरि॰ ॥ ८ ॥
श्रीजयदेवभणितरतिवञ्चितखण्डितयुवतिविलापम् ।
शृणुत सुधामधुरं विबुधा विबुधालयतोऽपि दुरापम् ॥ हरिहरि॰ ॥ ९ ॥
तवेदं पश्यन्त्याः प्रसरदनुरागं बहिरिव
प्रियपादालक्तस्फुरितमरुणच्छायहृदयम् ।*
ममाद्य प्रख्यातप्रणयभरभङ्गेन कितव
त्वदालोकः शोकादपि किमपि लज्जां जनयति ॥ १० ॥

सात्त्वती

७। एवं नैरापेक्षोक्तौ कृष्णस्य नैराश्यं स्यादित्याशङ्का उपालम्भप्रसङ्गेनैवात्मनस्तमायत्ततां दर्शयति। हे कृष्ण ! नूनं निश्चितं तव मनोऽपि चित्तमपि बहिरिव बाह्यमिव मलिनतरं अतिकृष्णवर्णं भविष्यति। नूनमत्र वितर्के। अत्रोपपादकमाह—अथान्यथेत्यर्थः। अव्ययानामनेकार्थत्वात्। जनं तथा च सामान्योक्त्याऽनपराधम् अनुगतमनुशायिनम् असमशरज्वरदूनं कामज्वरेण पीडितं कथं वञ्चयसे ? तथा चानपराधस्य एवम्वञ्चनमनुचितम्। ततोऽप्यनुयायिनः ततोऽप्यन्येनैव पीडितस्यैत्येवं कुवतस्तव मनो बाह्यमिव मलिनमिति वाक्यार्थः ॥

८। पुनरुपालम्भनपूर्वकं भर्त्सयति। भवान् अबलाकवलाय नारीभक्षणाय वने भ्रमति। अत्र किं विचित्रम् अपितु न किमपीति वाक्यार्थः। अत्रोपपादकमाह—वधूवधनिर्दयबालचरित्रम्, अर्थात्तव। पूतनिकैव। स्वार्थे कन्। पूतनैवेत्यर्थः। प्रथयति निवेदयति। कालसामान्ये लट्। यद्वा वधूवधनिर्दय इति सम्बोधनम्। ते बालचरित्रं बालकस्य नीलस्त्रीबधरूपवृत्तं पूतनिकैव प्रथयतीत्यर्थः। तथा च राक्षसी पूतना बालकेन भवता बालचरित्रेणैव व्रजमध्ये घातिता। सम्प्रति यूना त्वया अबला बनेषु ग्रस्यत इति अत्र किं विचित्रमिति वाक्यार्थः ॥

९। निजकीर्त्तेरनुवर्त्तनार्थं स्वनामनिबन्धनपूर्वकं प्रकृतगीतमाहात्म्यं दर्शयति। श्रीयुक्तो जयदेवः श्रीजयदेवः। विबुधाः पण्डिताः। श्रीजयदेवभणितश्चासौ रतिवञ्चितखण्डितयुवतिविलापश्चेति स तथा तं शृणु। किम्भूतम् ? सुधामधुरं सुधाया अपि मधुरं स्पृहणीयमित्यर्थः। पुनः किम्भूतम् ? विबुधालयतोऽपि स्वर्गेऽपि दुरापम्। विबुधालयत इति आद्यादिभ्यः सप्तम्यां तसिः। अत्र धृष्टनायकः प्रातरापद्य सुरतेन निजवधूं तोषयत्यत्र तदपि नास्तीत्यत्र रतिवञ्चितपदेन दर्शितम्। 'विबुधः पण्डिते देवे' इति विश्वः ॥

१०। न केवलमेवम्विधभवद्दर्शनेन दुःखमपितु लज्जापि भवतीति दर्शयति। हे कितव

---

* अत्र 'स्फुरितम्' इत्यस्य स्थाने 'छुरितम्' इति तथा 'छाय' इति स्थाने 'द्योति' इति पाठान्तरे स्तः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रातर्नीलनिचोलमच्युतमुरःसम्वीतपीतांशुकं-
राधायाश्चकितं विलोक्य हसति स्वैरं सखीमण्डले।
व्रीडाचञ्चलमञ्चलं नयनयोराधाय राधानने
स्मेरस्मेरमुखोऽयमस्तु जगदानन्दाय नन्दात्मजः ॥ ११ ॥

इति श्रीगीतगोविन्दे खण्डितावर्णने विलक्षणलक्ष्मीपतिर्नामाष्टमः सर्गः ॥

सारवती

धूर्त ! अद्य त्वदालोकः त्वत्सन्दर्शनम्, कर्तृ । प्रख्यातस्य प्रसिद्धस्य प्रणयभरस्य प्रेमातिशयस्य भङ्गेन विनाशेन शोकादपि दुःखादपि किमप्यनिवर्चनीयां लज्जां जनयति उत्पादयति । मम कथम्भूतायाः ? तव इदम् अरुणच्छायहृदयं लोहितकान्तिवक्षः पश्यन्त्याः । उक्तञ्च--'छाया सूर्यप्रिया कान्तिः प्रतिविम्बमनातप'इति । किम्भूतम् ? प्रियापादालक्तच्छुरितं सुरते क्रौञ्चबन्धे कान्ताचरणयावकरससम्बन्धमित्यर्थः। अतएव वहिर्वाह्ये प्रसरदनुरागमिव । अन्यदपि यद्रसादिपूर्णं भवति ततस्तद्बहिःप्रसरतीत्युचितमेव । उत्प्रेक्षालङ्कारः । तथा चैतादृशो भवान् यच्चरितेनान्यस्यापि लज्जा भवतीति भर्त्सनं कृतमित्यवधेयम् । 'लोहितेऽप्यरुणो मत' इति विश्वः । 'प्रणयप्रेम्णिः विश्वास'इति च । 'आलोकौ दर्शनद्योतावि'त्यमरः। अत्रारुणच्छायमित्यत्र वाच्यस्यारुणस्य गुणीभूतत्वादविमृष्टविधेयांशकतया दूषणमाहुः । तदनुरोधात् स्फुरितमिति भावे क्तः, छुरणमित्यर्थः । तथा चेदं तव प्रियापादालक्तच्छुरणं पशन्त्या इत्यन्वयः । कीदृशम् ? अरुणच्छायं हृदयं यस्याः तत्तथा । वहिः प्रसरश्चासौ अनुरागश्चेति तत्तथा तमिव, तथा च प्रसरणशीलमूर्त्तानुरागमिवेत्यर्थे इति व्याचक्षते ॥

११। ग्रन्थस्यावच्छिन्नसम्प्रदायतामीहमानो ग्रन्थप्रक्रममपहाय सर्गान्ते मङ्गलमाचरति । अयं नन्दात्मजः श्रीकृष्णः जगदानन्दाय समस्तप्राणिजनसुखाय अस्तु भवत्वित्यर्थः। किम्भूतः ? व्रीडया लज्जया चञ्चलं नयनयोरञ्चलं प्रान्तभागं राधानने आधाय अर्पयित्वा स्मेरस्मेरमुखः ईषद्धसिताननः । कस्मिन् सति ? प्रातः प्रभाते अच्युतं कृष्णं नीलनिचोलं श्यामप्रच्छदपटं राधाया उरो वक्षः सम्वीतपीतांशुकं उत्तरयिपीतवस्त्रं चकितं यथा स्यादेवं विलोक्य स्वैरं लघु लघु यथा स्यादेवं सखीमण्डले हसति सति । 'निचोलः प्रच्छदपट' इत्यमरः । विलक्षो लक्ष्मीपतिर्यत्रेति व्युत्पत्त्या विलक्षणलक्ष्मीपतिरित्येतत् सर्गनाम ।

इति समस्तप्रक्रियाबिभ्राजमानमहाराजशुकध्वजविरचितायां सारवत्यां गीतगोविन्द-टीकायामष्टमः सर्गः ।

-:०:-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सटीक-गीतगोविन्दम् ।

नवमः सर्गः ।

मन्दमुकुन्दः ।

तामथ मन्मथखिन्नां रतिरसभिन्नां विषादसम्पन्नाम् ।
अनुचिन्तितहरिचरितां कलहान्तरितामुवाच रहः सखी ॥ १ ॥

गुर्ज्जरीरागेण गीयते

हरिरभिसरति वहति मृदु पवने* ।
किमपरमधिकसुखं सखि भुवने ॥
माधवे मा कुरु मानिनि मानमये ॥ ध्रुवम् ॥ २ ॥

सारवती

१। गतमानापि राधिका निजमानभङ्गभीरुः न प्रियाभिलषितं करोतीति सखी राधामनुनयति । तद्वर्णनाय प्रसङ्गमवतारयति । रहः एकान्ते तां राधाम् अग्रेतनगीतप्रतिपाद्यां सखी उवाच उक्तवती । तां कथम्भूताम् ? कलहान्तरितां कलहेनान्तरितां व्यवहितां कृष्णसमीपादन्यत्र गतामिति यावत् । तथा च कलहेनान्तरिता न त्वनुरागेणेति दर्शितम् । अतएव अथ अनन्तरं मन्मथेन खिन्नां पीडिताम् । अतएव रतेः शृङ्गारक्रीडायाः रस इच्छा, तया भिन्नां सम्बद्धाम् । रसशब्दोऽत्र इच्छावाची, अमृतरसप्रस्यन्दसाध्वीकभूरित्यत्रामृतं मोक्षस्तस्य रस इच्छेति प्रामाणिकव्याख्यानात्तत्र शक्तेः । अत एव इच्छायाः सत्त्वेन इष्यमानस्य सिद्धत्वाद्विषादेन दुःखेन सम्पन्नां महतीम् अत एव अनु पश्चात् चिन्तितहरिचरितां न तूक्तहरिचरितां सखीसमक्षं स्वयमेतच्चरितकथनेन मानापगमो व्यक्त एव स्यादिति भावः । नायिका चात्र कलहान्तरितैव । तल्लक्षणम् —'प्राणेश्वरं प्रणयकोपविशेषभीतं या चाटुकारमवधार्य+ विकुप्य-जाता । सन्तप्यते मदनवह्निशिखासहस्रैर्वाष्पाकुला तु कलहान्तरिता च सा स्यादि'ति ॥

२। अत्र गीतस्य गुर्ज्जरीरागः, रूपकतालः । रागलक्षणन्तूक्तमेव । सखी यदुवाच तदाह। अयेपदं कोपोक्तौ । अये मानिनि ! माधवे मानं कोपं मा कुरु । अत्र मा लक्ष्मीस्तस्या धवपदोपन्यासेन तस्य लक्ष्मीर्जयिति भवत्या औदास्येन कृष्णस्य कापि न क्षतिभवत्येव परं

---

* 'मधुपवने' इति पाठः ।
+ 'चाटुकारमवधीर्य' इति पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तालफलादपि गुरुमतिसरसम् ।
किं विफलीकुरुषे कुचकलसम्* ॥ माध० ॥ ३ ॥
कति न कथितमिदमनुपदमचिरम् ।
मा परिहर हरिमतिशयरुचिरम् ॥ माध० ॥ ४ ॥
किमिति विषीदसि रोदिसि विकला ।
विहसति युवतिसभा तव सकला ॥ माध० ॥ ५ ॥

सारवती

शोच्यता भविष्यतीति ध्वनितम् । 'अये कोपे विषादे च सम्भ्रमे स्मरणेऽपि चे'ति । अनुनयेन केवला कोपोक्तिः समीचीनेति प्रियोक्तिपुरःसरमनुनयति— हरोति । हे सखि मृदुपवने मन्दवायौ वहति सति हरिरभिसरति । अभि सर्वतोभावेन सरति गतायातं करोति । भुवने अपरं किं सुखम् अपितु न किमपीत्यर्थः । क्वचित्तु भवने इति पाठः । तत्र भवनेऽर्थात्तव अभिसरति गतायातं करोतीत्यन्वयः । मृदुपवनस्यातिमादकत्वेन तव मानमङ्गो भविष्यत्येवेति मम वचनानादरो न सर्वथा विधेय इति सत्यं तेन ध्वनितम् ॥

३। पुनरुपदेशपुरःसरमनुनयति । हे सखि कुचकलसं विफलीकुरुषे किम् ? किमर्थं विफलीकरोषीत्यर्थः । कुचकलसमिति जात्यभिप्रायेणैकवचनम् । तथा चैतादृशोऽयं न वैफल्यमर्हतीति भावः । कीदृशम् ? तालफलादपि गुरुं महान्तम् । अन्यस्माद्बिल्वफलादेः किमिति अपेरर्थः । पुनः किम्भूतम् ? अतिसरसम् अतिशयितरससहितमित्यर्थः । अत्र कलसेन रूपितस्यापि तालफलेनौपमित्या यथा तत्र मार्दवेन रसातिरेकस्तथात्रापीति सूचितम् । यथा गुरूणामतिसरसानामपि तालफलानां परिणतौ पतनं भवतीति तथाऽयमपि पतिष्यतीति त्वरया कृष्णकरस्पर्शेन सफलं कुर्वित्यपि सूचितम् । तदुक्तम् -'न पुनरेति गतं चटुलं वय' इति ॥

४। ननु भवत्या च तदानीं किमपि नोक्तमिति भवत्येवाभियोज्य इत्याशङ्क्याह— हे सखि ! अचिरं साम्प्रतं मया अनुपदं प्रतिक्षणमेव इदं कति न कथितमपितु बहु कथितमित्यर्थः । 'पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' । अनुपदमिति पदे पदे । वीप्सायामव्ययीभावः । इदं किमित्याह—हरिं कृष्णं मा परिहर न त्यज । अत्याज्यताप्रयोजकविशेषणमाह— अतिशयरुचिरम् अतिशयेन रुचिरं मनोहरमित्यर्थः । तथा च नाहमप्रयोज्येति वाक्यार्थः ।

५। विपक्षवाक्कोपन्यासपुरःसरमनुनयति--इति अनेन प्रकारेण विकला सती किं विषीदसि किमर्थं विषादं करोषि ? किं रोदिषि किमर्थं क्रन्दनं करोषि ? सकला समस्ता युवतिसभा तव कृते विहसति हास्यं करोति । 'सभा स्यात्सदने गोष्ठ्यां समूहेऽपि सभा मता ।' तथा च

---

* '...कलशम्' इति पाठ.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सजलनलिनीदलशीलितशयने* ।
हरिमवलोकय सफलय नयने ॥ माध० ॥ ६ ।
जनयसि मनसि किमिति गुरुखेदम् ।
शृणु मम वचनमनीहितभेदम् ॥ माध० ॥ ७ ॥
हरिरुपयातु वदतु बहुमधुरम् ।
किमिति करोषि हृदयमतिविधुरम् ॥ माध० ॥ ८ ॥

सारवती

विपक्षहास्यभीत्यापि मद्वचनानादरो न विधेय इति वाक्यार्थः। अत्र सकलेति वचनाद्दासीसभं स्त्रीसभमितिवत् युवतिसभमिति स्यात्। तत्र युवति सम्बोध्यपरतया व्याख्येयम्। तथा च हे युवति ! तव कृते सकला सभा विहसतीत्यन्वय इत्यवधेयम् ॥

६। तथा सति किम्विधेयमित्याशंक्याह—सजलनलिनीदले जलसहितकमलपत्रे शीलितं कृतं शयनकर्म यया एतादृशि राधिके हरिं कृष्णम् अवलोकय पश्य। अतएव नयनेऽर्थात् स्वकीये सफलय फलसहिते कुरु। यद्वा नयने मम सफलय युवयोरनुरागावलोकितदर्शनेन सुखितं विधेहीत्यर्थः। तथा चैतादृशी त्वं स्वयं स्थितोऽयं हरिरेवमहमर्थयामीत्यत्रौदास्तं न युज्यत इति भावः। जगद्धरस्तु एवम्भूते शयने हरिमवलोकय इत्यन्वयमाह ॥

७। एतावत्कालं मया सन्तापित इति प्रथमं कथमहमेव प्रसन्ना स्यामिति राधाहृदयवैकल्यमाकलय्याह—इति अनेन प्रकारेण मनसि चित्ते गुरुखेदं महद्दुःखं किं जनयसि किमुत्पादयसि ? तथा सति किं कुर्य्यामित्याशंक्याह—मम वचनं शृणु, अर्थात् खेदशान्तये। कीदृशम् ? अनीहितोऽनभिप्रेतो भेदो युवयोर्यत्र तत्। यद्वा अनीहितभेदम् अनभिप्रेतभेदं यथा स्यादेवं मम वचनं शृण्विति क्रियाविशेषणतया योज्यम्। तथा च नाहं तव भिन्नेत्यवधार्य्य ममोपदेवचनमाकर्णय इति वाक्यार्थः॥

८। तदेवाभिधत्ते। हरिः कृष्णः उपयातु तव समीपमायातु। बहु अधिकं मधुरं मनोहरम् अनुनयवचनमित्यर्थात् वदतु। हृदयं चित्तमित्यनेन प्रकारेणातिविधुरमत्यन्तविकलं किङ्करोषि किमर्थङ्करोषीत्यर्थः। आह च—'विधुरन्तु परिश्लेषे विधुरो विकलेऽन्यवदि'ति। तवानुमतिमात्रमपेक्षणीयं स्वयमेव हरिस्तवानुनयं करिष्यतीति प्राथमिकस्वकीयप्रसादप्रकाशनमाशंक्य लज्जया हृदयं किं विकलं करोषीति वाक्यार्थः॥

---

*'शीतलशयने' इति पाठ०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीजयदेवभणितमतिललितम् ।
सुखयतु रसिकजनं हरिचरितम्* ॥ माध० ॥ ९ ॥

स्निग्धे यत्परुषासि यत्प्रणमति स्तब्धासि यद्रागिणि ।
द्वेषस्थासि यदुन्मुखे विमुखतां यातासि तस्मिन्प्रिये ।
तद्युक्तं विपरीतकारिणि* तव श्रीखण्डचर्चा विषम् ।
शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातनाः ॥ १० ॥

सारवती

९। कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं प्रकृतगीतमुपसंहरति। श्रीजयदेवभणितं गीतं कर्तृ रसिकजनम् । रस इच्छा, स यस्यास्तीति स भवति रसिकः । तेन सामान्यत एव ऐहिकामुष्मिकं वा सुखमिच्छन्तम्, अत एव जनपदोपादानमपि । सुखयतु प्रीणातु। किम्भूतम् ? हरिवलितं हरौ कृष्णे वलितं सम्बद्धम् । कलिवल्लिकाधेनु । तथा च हरिसम्बन्धादामुष्मिकसुखजनकत्वं दर्शितम् । पुनः किम्भूतम् ? अतिललितं शृङ्गारादिरसेनातिमनोज्ञम् । एतेन ऐहिकसुखहेतुत्वं दर्शितम् । रसिकजनं शृङ्गारिजनमित्यन्ये ॥

१०। एतावताप्यननुनीय तां राधां विपक्षबाधकमुखैरप्यनुनयति हे विपरीतकारिणि विपरीतं विरुद्धं कर्तुं शीलं यस्या एतादृशि हे सखि ! यत् यस्मात् स्निग्धे स्नेहवति तस्मिन् सकलकलादिकौशलमर्तिप्रिये कृष्णे पौरुषासि निष्ठुरासि । 'निष्ठुरं परुषमित्यमरः । यद् यस्मात् प्रणमति नम्रे त्वं स्तब्धासि अनम्रा भवसि । यद् यस्माद् रागिणि अनुरागभाजि प्रिये त्वं द्वेषस्थासि द्वेषवती भवसि । यद् यस्मादुन्मुखे सम्मुखे विमुखतां वैमुख्यं यातासि गतासि । तत्तस्मात्तव श्रीखण्डचर्चा चन्दनानुलेपो विषं तापकत्वात् । शीतांशुः शीतकिरणः तपनः उष्णकिरणः तापकत्वात् । एवं हिमं तुषारो हुतवहो वह्निः दाहकत्वात् । क्रीडामुदः केलिप्रमोदाः यातनाः तीव्रवेदनाः । एतत् सर्वं युक्तं योग्यम् । 'यातना तीव्रवेदना' इत्यमरः । तथा च पूर्वं यद् विपरीतमाचरितं भवत्या तदेवैतानि विपरीतानि, अतोऽग्रेऽपि विपरीताचरणं नोचितमिति भावः । तस्मिन्नित्यत्र न नियमतो यत्पदमपेक्षते, केवलं सुभगादिषु न्यायेन यदित्यत्र बौद्धाधिकारफक्किकायां तथा दर्शनादिति ॥

---

* टीकानुसारम् अत्र 'यरिवलितम्' इति पाठः स्यात् ।
* 'युक्तं तद्विपरीतकारिणि' इति पाठ०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सान्द्रानन्दपुरन्दरादिदिविषद्वृन्दैरमन्दादरा-
दानम्रैर्मुकुटेन्द्रनीलमणिभिः सन्दर्शितेन्दिन्दिरम् ।
स्वच्छन्दं मकरन्दसुन्दरगलन्मन्दाकिनीमेदुरं
श्रीगोविन्दपदारविन्दमशुभस्कन्दाय वन्दामहे ॥ ११ ॥

इति श्रीगीतगोविन्दे कलहान्तरितावर्णने मन्दमुकुन्दो नाम नवमः सर्गः ॥

सारवती

११। विघ्नाङ्कशया मध्येऽपि मङ्गलमाचरति। गां विन्दतीति गोविन्दः। तस्य पदारविन्दं पादपद्मम् अशुभस्कन्दाय अकल्याणशोषणाय वन्दामहे। स्कन्दिरगतिशोषणयोः। किम्भूतं पदारविन्दम्? स्वच्छन्दमप्रतिबन्धं यथा स्यादेवं मकरन्दसुन्दरगलन्मन्दाकिन्याः पुष्परसवत् शोभनया गलन्त्या गङ्गया मेदुरं स्निग्धम्। 'मेदुरः स्निग्धशान्तयोः। मकरन्दः पुष्परस' इत्यमरः। अन्यस्मिन्नपि पद्मे मकरन्दो वर्तते, विष्णुपादपद्मे गङ्गेव मकरन्द इत्यर्थः। 'विष्णुपादार्घ्यसम्भूते गङ्गे' इति श्रवणात्। अपि किम्भूतम्? सान्द्रानन्दैः पुरन्दरादिदिविषद्वृन्दैः इन्द्रादिदेवसमूहैः आदरात् आ समन्तात् भावेन नम्रैः मुकुटे कीरिटे ये इन्द्रनीलमणयः तैः सन्दर्शिता इन्दिन्दिरा भ्रमरा यत्र। 'इन्दिन्दिरस्तु रोलम्ब' इत्यमरः। अन्यस्मिन्नपि पद्मे भ्रमरा वर्तन्ते, अत्र इन्द्रनीलमणय एव भ्रमरा इत्यर्थः। मन्दो मुकुन्दो यत्रेति व्युत्पत्त्या मन्दमुकुन्देति सर्गनाम।

इति समस्तप्रक्रियाविराजमानमहाराजशुक्लध्वजविरचितायां सारवत्यां गीतगोविन्दटीकायां मन्दमुकुन्दो नाम नवमः सर्गः॥

—※—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सटीक-गीतगोविन्दम्

दशम : सर्गः ।

चतुरचतुर्भुजः ।

अत्रान्तरे मसृणरोषवशामसीम-
निःश्वासनिःसहमुखीं सुमुखीमुपेत्य ।
सव्रीडमीक्षितसखीवदनां प्रदोषे[T]
सानन्दगद्गदपदं हरिरित्युवाच ।। १ ।।

देशवराड़ीरागेण गीयते ।

वदसि यदि किञ्चिदपि दन्तरुचिकौमुदी हरति दरतिमिरमतिघोरम् ।
स्फुरदधरसीधवे तव वदनचन्द्रमा रोचयति* लोचनचकोरम् ।।
प्रिये चारुशीले मुञ्च मयि मानमनिदानं
सपदि मदनानलो दहति मम मानसं देहि मुखकमलमधुपानम् ।। ध्रुवम् ।। २ ।।

सारवती

१। अथ कृष्णकृतराधानुनयं वर्णयितुं प्रसङ्गमवतारयति—अत्रान्तरे हरिरुवाच अवदत् । बहुमधुरमित्यादिसखीवचनावसरे दिनान्ते सन्ध्यायामुपेत्यागत्य सानन्दगद्गदं यथा स्यादेवं हरिः कृष्णः सुमुखीमित्यग्रे वक्ष्यमाणमुवाच । पदस्य राधानुनयवचनत्वेन सानन्दत्वं भयाच्च गद्गदत्वमित्यववेयम् । कीदृशीम् ? तादृशसखीजनानुनयात् मसृणो मन्दीभूतो रोषवशः कोपावेशो यस्यास्ताम् । अतएवासीमनिःश्वासैः निःसहं नत्वनिःसहमानं मुखं यस्यास्ताम् । पुनः किम्भूताम् ? एतावत्कालं सखीवचनप्रतिक्षेपात् सव्रीडं सलज्ज यथा स्यात्तथा ईक्षितसखीवदनाम् । अत्र सुमुखीपदोपन्यासेन कोपमान्द्यस्यानुमेयत्वं दर्शितम् ।।

२। गीतस्यास्य देशवराडी रागः । आढतालः । हरिरित्युवाचेति यदुक्तं तद्दर्शयति—चारु शोभनं शीलं यस्या एवम्भूते प्रिये राधिके । अनिदानम् आदिकारणशून्यं मानं रोषं मयि मुञ्च त्यज । तथा च चारुशीलायास्तवावान्तरकारणादेव रोषोऽनुचित इति वाक्यार्थः । 'निदानन्त्वादिकारणमि'त्यमरः । मम कोपेनापि भवतः किमित्याशङ्क्याह —

T टीकानुसारं 'प्रदोषे' इत्यस्य स्थाने 'दिनान्ते' इत्येव पाठः स्यात् । ग्रन्थान्तरेऽपि 'दिनान्ते' इत्येव उपलभ्यते ।

* 'रोचयतु' इति पाठ० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सत्यमेवासि यदि सुदति मयि कोपिनी देहि खरनखरशरघातम्।
घटय भुजबन्धनं जनय रदखण्डनं येन वा भवति सुखजातम्॥ प्रिये०॥ ३॥
त्वमसि मम जीवनं त्वमसि मम भूषणं त्वमसि मम भवजलधिरत्नम्।
भवतु भवतीह मयि सततमनुरोधिनी तत्र मम हृदयमतियत्नम्॥ प्रिये०॥ ४॥

सारवती

सपदि तत्क्षणं मदनानलः कामाग्निः मम मानसं दहति। तर्हि मया किङ्कर्त्तव्यमित्याशंक्याह—मुखमेव यत्कमलं तस्य यत् मधुपानं देहि। तथा चान्तर्वर्त्तिनो दाहस्याधरमधुपानेन शान्ति विधेहीति वाक्यार्थः। यदि किञ्चिदपि स्वल्पमपि वदसि तदा दन्तरुचिरेव विकाशितत्वात् कौमुदी चन्द्रज्योत्स्ना साऽतिघोरमतिभयनाकं दरतिमिरं दरो भयमाच्छादकत्वेन ज्ञानवैपरीत्यादिजनकत्वेन। तदेव तिमिरं तद्धरति नाशयति। अन्ययाऽपि ज्योत्स्नया तिमिरमपनीयत एवेति ध्वनितम्। 'दरः स्याद् विवरे भये।' तव वदनमेव चन्द्रमा। लोचनमेव चकोरःतम्। स्फुरंश्चासौ अधरश्चेति स्फुरदधरः, स एव मादकत्वात् सीधुः। तस्यैव स्फुरदधरसीधवे रोचयति स्पृहयति। सीधव इत्यत्र कर्मप्राप्तौ स्पृहार्थयोगे* चतुर्थी चेति। सीधुर्मद्यविशेषः। तदुक्तम्—'सीधुरिक्षुरसैः पक्वैरपक्वैरासवो भवेत्। मैरेयं धातकीपुष्पं गुडधानादिसंयुतम्॥' रूपकश्चात्रालंकारः॥

३। यद्यवान्तरकारणेनाप्यतिकुपितासि तदा मारणादिकं कोपकृत्यमेव क्रियतामित्याह--हे सुदति शोभनदशने! सत्यमेव मयि त्वं यदि कोपिनी असि तदा खरनखशरघातं तीक्ष्णनखनाराचघातं देहि। भुजाभ्यां बन्धनं घतय। रदखण्डनं जनय। अन्येनापि कोपेन शराघातं बन्धनखण्डनादिकञ्च क्रियत इत्युचितमेव। येन वा चरणप्रहारादिना तव सुखजातं सुखसमूहो भवति तदेवं कुरु। यद्वाऽहं कोपिनीति भवान् कथं मन्यत इति राधावचनमाशंक्याह येनैवेति। यदि न कोपिन्यसि तदा येनैव सुखजातं सुखसमूहो भवति ममेत्यथात्, तदेव कुरु। तदत्र येनेति पदेन गुह्यकर्मापि प्रार्थितमिति। 'रदस्तु दशनो दन्त' इत्यमरः। 'समूहे उद्भवे जातमि'ति धरणिः॥

४। पुनरनुकूलवचनेनानुनयति—त्वं मम जीवनं प्राणवायुरसि। तथा च त्वयि बहिर्भूतायां मम शरीरं सहसैव निश्चेष्टं स्यादिति वाक्यार्थः। त्वं मम भूषणमसि। तथा च भवदनासङ्गे तदेवेदं शरीरं न शोभां धास्यतीति वाक्यार्थः। त्वं मम भव एव जलधिरपारत्वात्, तदुत्पन्नं रत्नमसि अन्यदपि रत्नं समुद्रादुत्पद्यत इति ध्वनिः। तथा चान्येनापि विजातीयचिन्तामणिप्रभृतिरत्नेन सकलाभिमतसिद्धिर्भवति

---

*'रुच्यर्थयोगे' इति पाठ०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नीलनलिनाभमपि तन्वि तव लोचनं धारयति कोकनदरूपम्
कुसुमशरबाणभारेण यदि रञ्जयसि कृष्णमिदमेतदनुरूपम् ॥ प्रिये० ॥ ५ ॥
स्फुरतु कुचकुम्भयोरुपरि मणिमञ्जरी रञ्जयतु तव हृदयदेशम् ।
रसतु रसनापि तव घनजघनमण्डले घोषयतु मन्मथनिदेशम् ॥ प्रिये० ॥ ६ ॥
स्थलकमलगञ्जनं मम हृदयरञ्जनं जनितरङ्गपरभागम् + ।
घनमसृणवाणि करवाणि चरणद्वयं सरसलसदलक्तकरागम् ॥ प्रिये० ॥ ७ ॥

सारवती

भवत्यापि तथेति वाक्यार्थः । इह प्रस्तावे भवती मयि अनुरोधिनी अनुवर्तमाना भवतु । तत्र सततं वारम्बारं मम हृदयम् अतियत्नम् अत्यर्थेन यत्नो यस्यैतादृगित्यर्थः । तथाच जीवनाद्यनुवर्त्तनाय यत्नः समुचित एवेति भावः । 'अनुरोधोऽनुवर्त्तनमि'त्यमरः ॥

५। पुनरनुनयपुरःसरं निजानुरञ्जनमनुनयति—हे तन्वि कृशाङ्गि ! नीलनलिनाभमपि तव लोचनं धारयति । कोकनदरूपं रक्तोत्पलरूपं धारयति । धृधातोः स्वार्थे इनच् । कुसुमशरबाणः कन्दर्पः । शॄ हिंसायां धातुः । शरो हि हिंसा । कुसुममेव शरार्थो हिंसार्थो बाणो यस्येति व्युत्पत्तिः । तेन कुसुमशरबाणभारेण कामजनितकृष्णं मां यदि रञ्जयसि तदा इदं मदनुरञ्जकत्वमेतदनुरूपत्वम् एतस्याः कृष्णानुरञ्जिकायास्तवानुरूपं योग्यम् । तथा च स्वभावकृष्णलोचनं कोपेनारक्तं करोषीति श्यामानुरञ्जिकया भवत्या अहमपि कृष्णोऽनुरञ्जनीय इति शब्दच्छलेन प्रार्थनमिति वाक्यार्थः । 'रक्तोत्पलं कोकनदमि'त्यमरः ॥

६। पुनरनुनयपुरःसरं हारादिपरिधापनायाभ्यर्थयति--तव कुचकुम्भयोस्तनकलसयोरुपरि मणिमञ्जरी हारस्थमणिरेव मञ्जरी स्फुरतु शोभताम् । अन्यस्मिन्नपि मङ्गलकलसे मञ्जरी स्फुरतीति ध्वनिः । तथा च कोपं परित्यक्तुं हारं गृहाणेति वाक्यार्थः । किमर्थं तदुद्देश्यमित्यत आह--तव हृदयदेशं तव वक्षःप्रदेशं रञ्जयतु । तथा च स्वहृदयानुरञ्जकत्वेन स उपादेय इति भावः । प्रियसम्मुखजनकत्वमेवात्र फलमिति मञ्जरीपदेन सूच्यते । रसनापि काञ्च्यपि घनजघनमण्डले निविडनितम्बे रसतु शब्दं करोतु । रस शब्दे धातुः । किं तावतेत्यत आह मन्मथनिदेशं कामदेवस्याज्ञां घोषयतु । तदनेन काञ्चीपरिधानवत्याः प्रार्थनं दर्शितम् । 'घनः काठिन्यसंयतावि'ति विश्वः । 'आज्ञा निदेश' इत्यमरः । 'उच्चैर्घुष्टन्तु घोषणा' इत्यपि । स्थानद्वयेऽपि तवेति पदं न दोषाय, अनुनयादौ पुनर्वचनस्याप्यदोषत्वादिति ॥

७ पुनरपि प्रणतिपूर्वकमनुनयति—हे घनमसृणवाणि घना अर्थकठिना मसृणा स्निग्धा वाणी यस्या एवम्भूते राधिके ! तव चरणद्वयं पदद्वयं सरसः सार्द्रो लसत् शोभमानः

+ जनितरङ्गपरागम्' इति पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्मर गरलखण्डनं मम शिरषि मण्डनं देहि पदपल्लवमुदारम्।
ज्वलति मयि दारुणो मदनकदनारुणो हरतु तदुपाहितविकारम् ॥ प्रिये० ॥ ८ ॥

इति चटुलचाटुपटुचारु मुरवैरिणो राधिकामधि वचनजातम्।
*जयति जयदेवकविभारतीभूषितं मानिनीजनजनितशातम् ॥ प्रिये० ॥ ९ ।

सारवती

अलक्तकरागोऽनुरक्तकरागो यत्र तादृशं करवाणि करोमि। क्वचिच्च 'भणमसृणवाणी'ति पाठः। तत्र भण वद आज्ञापयेति यावदित्यर्थः। क्वचिच्च 'सरसगलदलक्तकरागमि'ति पाठः। तत्र सरसः साद्रः अतएव गलत्स्रवदलक्तकरागो यत्रेत्यर्थः। कीदृशं चरणद्वयम्? स्थलकमलं गञ्जयति इति स्थलकमलगञ्जनम्। नन्द्यादित्वात् ल्युः। तदनेन पदयोरतिलौहित्यमतिसुकुमारत्वं दर्शितम्। पुनः किम्भूतम्? मम हृदयरञ्जनं कौञ्चबन्धादिना मम हृदयस्य रञ्जकमित्यर्थः। जनितरतिरङ्गपरभागं रतिरङ्गे सुरतकौतुके जनितः परभागोऽन्योन्यशोभा येन स तथा। तथा च तव चरणद्वयं न केवलं तव शोभाजनकमपितु विविधरतिबन्धेन मदीयाङ्गसङ्गमासाद्य ममाप्यलक्तकरसेन तदनुरञ्जयामीति वाक्यार्थः। अत्रोत्तमनायिकायाश्चरणस्पर्शेन रङ्गो भवतीति तदर्थमेतत्प्रार्थनमित्यवधेयम्। 'रङ्गः कौशलरागयोरि'त्यमरः। परस्परन्तु या कान्तिः परभागः स उच्यत' इति धरणिः। 'मसृणस्निग्ध चिक्कणमि'ति च ॥

८। पुनरतिप्रणतिपुरःसरमनुनयति— उदारं श्रेष्ठं पदपल्लवं चरणावेव पल्वं मम-शिरसि देहि अर्पय। कीदृशम् मण्डनम्, मम शिरस इत्यर्थात्। पुनः किम्भूतम्? स्मर-गरलस्य कामकालकूटस्य खण्डनं खण्डकमित्यर्थः। अन्योऽपि पल्लवादिदानेन विषम-पहरतीति ध्वनिः। एवमन्यदपि प्रयोजनमस्तीति दर्शयति—मदनेन कामेन कदनं दुःखं तदेवारुणः सूर्यः तापकत्वात्, दारुणः क्रूरकर्मा मयि ज्वलति दीप्यते। अतः तदुपाहितं तेन मदनकदनारुणेनोपाहितं विकारं हरतु। अन्यत्रापि सूर्यादिकृतसन्तापशान्तिजनकत्वं शिरःस्थितपल्लवे दृष्टमेवेति। अत्र शिरसि पदार्पणप्रार्थनं पादपतनान्त एव मानिनीनां मानमित्यभिप्रायेण। यद्वा 'कक्षयोरन्तरे बाहू कृत्वा पृष्ठगते प्रिये। स्त्रियः पादौ शिरस्येव मूर्द्धबन्धः प्रकीर्तित' इति बन्धविशेषाभिप्रायेण। 'पल्लवोऽस्त्री किसलयमि'त्यमरः। 'अरुणः स्फुटवाणः स्यात् सूर्ये सूयस्य सारथावि'ति विश्वः। 'कदनं कलुषे ताप' इति च ॥

९। कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकमाशीर्दानेन गीतमुपसंहरति। इति अनेन प्रकारेण राधिकामधि लक्षीकृत्य मुरवैरिणः श्रीकृष्णस्य वचनजातं वाक्यसमूहोजयति उत्कर्षेण

* 'जयति पद्मावतीरमणजयदेवकविभारतीभणितमतिशातम्' इति पाठ०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिहर कृतातङ्के शङ्कां त्वया सततं घन-
स्तनजघनयाक्रान्ते स्वान्ते परानवकाशिनि।
विशति वितनोरन्यो धन्यो न कोऽपि ममान्तरं
प्रणयिनि परिरम्भारम्भे विधेहि विधेयताम्॥ १०॥

शशिमुखि तव भाति भङ्गुरभ्रूर्
युवजनमोहनकरालकालसर्पी।
तदुदितभयभञ्जनाय यूनां
त्वदधरसीधुसुधैव सिद्धमन्त्रः॥ ११॥

सारवती

वद्धताम्। किम्भूतम्? चटुलचाटु चटुलाः सुन्दराः सुश्रव्या इति यावत्, चाटवः प्रियोक्तयो यस्मिन् एवम्भूतम्। 'चटुलः सुन्दरे चल' इति धरणिः। 'चाटुः पुंसि प्रियोक्तिः स्यादि'ति विश्वः। पुनः कीदृशम्? पटु प्रकृतकर्मकुशलमित्यर्थः, प्रतिभायोगीति वा। तथा च पटुः 'पटोल-मात्रे स्यात्प्रतिभागुणयोगिनो'ति। 'आरोग्ये वक्तरि श्रेष्ठे पटुः शूरेऽभिधेयवदि'ति पोतमुण्डी। पुनः कीदृशम्? अत एव चारु मनोहरम्। पुनः कीदृशम्? जयदेवनाम्नः कवेर्भारत्या वाण्या भूषितं निबन्धनेनालंकृतमित्यर्थः। पुनः किम्भूतम्? मानिनीजनस्य राधायाः जनितं शातं सुखं येन तत्तथा। 'भारती भाषा गीर्वाग्वाणी सरस्वती'त्यमरः। 'शर्मशातसुखानि चे'ति। जयतीति लोट्, जयतेरनभिधानादिति त्वनिषेधः॥

१०। सामान्यासक्तमाशंक्य मृषैव कुप्यसीति दर्शयन् पुनरनुनयति—कृतः आतङ्कः क्रोधः यया सा तथा। हे कृतातङ्के! मद्विषयकान्याङ्गनाभावितशङ्कां परिहर त्यज। मम स्वान्ते मनसि सततमनवरतं घने निविडे स्तनजघने यस्या एतादृश्या त्वया आक्रान्ते, अतएव परानवकाशिनि सति ममान्तरं हृदयं वितनोरङ्गादन्यः धन्योऽपि कोऽपि जनः न विशति अधन्यानान्तु का कथेति भावः। तस्मात् प्रणयिनि मयि परिरम्भारम्भे सति विधेयताम् आयत्ततां विधेहि। तथा च परिरम्भारम्भमात्रेण ममायत्ततां विधेहीत्यर्थः। वितनुपदेन कामस्य प्रवेशयोग्यता दर्शिता। तदनेन प्रबन्धेन मच्चित्ते भवती परं तिष्ठति कामश्च सन्तापयतीति+ दर्शितम्। 'आतङ्कः क्रोधशङ्कयोरि'ति विश्वः॥

११। आलिङ्गनप्रार्थनानन्तरमधरपानं प्रार्थयन्नेव पुनरनुनयति हे शशिमुखि! तव भङ्गुरभ्रूर्युवजनानां मोहाय कराला भीषणा कालाख्या याः सर्पी सर्पवधूर्भाति शोभते। अत्र करालकालसर्पीति विशेषणैरतिकठिनत्वं सूचितम्। तदुदितभयभञ्जनाय तस्याम् उदितं

+ कामं सन्तापयतीति पाठः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यथयति वृथा मौनं तन्वि प्रपञ्चय पञ्चमं
तरुणि मधुरालापैस्तापं विनोदय दृष्टिभिः।
सुमुखि विमुखीभावं तावद्विमुञ्च न मुञ्च मां
स्वयमतिशयस्निग्धो मुग्धे प्रियोऽहमुपस्थितः॥ १२॥

बन्धूकद्युतिबान्धवोऽयमधरः स्निग्धो मधूकच्छविर्
गण्डश्चण्डि चकास्ति नीलनलिनश्रीमोचनं लोचनम्।
नासाभ्येति तिलप्रसूनपदवीं कुन्दाभदन्ति प्रिये
प्रायस्त्वन्मुखसेवया विजयते विश्वं स पुष्पायुधः॥ १३॥

सात्त्वती

यद् भयं तस्य भञ्जनाय त्वदधर एव सीधुर्मद्यं मादकत्वात्। तदेव सुधा तत्कार्य-कारित्वात्। सैव सिद्धमन्त्रः कालसर्पी भयदायकसिद्धमन्त्र इव। नान्य इत्येवकारार्थः। तथा चास्माकमपि भीतिरस्तीति अधरसुधासिद्धमन्त्रेण तापमपनयेति वाक्यार्थः॥

१२। पुनरपि पदार्थविधया स्वाभिमतं प्रार्थयन्ननुनयति। हे तन्वि। वृथा निरर्थकं मौनम् अर्थात्तव, व्यथयति पीडयत्यर्थान्माम्। तव मौनस्यास्मत्ताडनर्यनिरूपणं फलम्। तत्त् जातमेवेति वृथेत्युक्तम्। तर्हि मया किङ्कर्त्तव्यमित्यत आह—हे तरुणि युवति! मधुरालापैः पञ्चमं रागविशेषं प्रपञ्चय विस्तारय। आलापैरित्यनेन येन केनापि आलापेन भवत्याः पञ्चमबिस्तारो भवतीति दर्शितम्। दृष्टिभिर्दर्शनैस्तापं मनःखेदं विनोदय अपसारय। विनोदयेति नुद प्रेरणे धातोर्णिजन्तलोटि रूपम्। हे सुमुखि! विमुखीभावं विमुञ्च। सुमुखीनां वैमुख्यस्यातिबिरुद्धत्वादिति भावः। मां न मुञ्च न परिहर। अपरिहार्यताप्रयोजकमाह—हे मुग्धे! अयमेतादृगायातः स्निग्धो वत्सलः प्रियः स्वयमनाह्वानेनैवोपस्थितः समागतः यत्र इत्यध्याहार्यम्। तथा च मानेनाप्येतदेव साध्यमतः परं मानालम्बनं नोचितमिति ध्वनिः। अत एव मुग्धेत्युक्तम्। 'पञ्चमो रागभेदे स्यात् पञ्चानामपि पूरणमिति विश्वः। 'सकलार्थे परिप्रश्ने प्रक्रमे तावदव्ययमि'ति च। 'मुग्धावज्ञमनोहरावि'त्यमरः।

१३। पुनस्तुतिपुरःसरमनुनयति। हे कुन्दाभदन्ति। कुन्दस्येव आभा कान्तिर्येषाम् एवम्भूता दन्ता यस्या एतादृशि! स पुष्पायुधः कामः प्रायः उत्प्रेक्षे त्वन्मुसेवया बिश्वं जगत् बिजयते। अत्रोपपादकं दर्शयति—हे चण्डि कोपने! तवायमधरो बन्धूकस्य द्युत्या बान्धवो मित्रसदृशमिति यावत्। अनेनाधरस्य स्वाभाविकद्युतिप्रतिपादनेन कोपशान्तिर्लक्षितेति ध्वनिः। स्निग्धः चिक्कणो मधूकच्छविर्मधूकपुष्पसदृशः गण्डः चकास्ति शोभते। तथा च तादृक्कान्तिदर्शनेन मानिन्याः अपि ते विरहदुःखं वर्तत एवेति ध्वनितम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दृशौ तव मदालसे वदनमिन्दुसन्दीपनं*
गतिर्जनमनोरमा विजितारम्भमुरुद्वयम् ।
रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवा-
वहो विबुधयौवतं वहसि तन्वि पृथ्वीगता ॥ १४ ॥

सारवती

लोचनं चक्षुः नीलनलिनश्रीमोचनं श्यामपद्मकान्तिमोचकं तवेत्यर्थादिति सर्वत्रान्वितम्। तथा च पूर्वं कोकनदरूपं धारयसीत्यनेन लोचनस्य रक्तत्वं दर्शितम्। अधुना श्यामत्वप्रतिपादने कोपशान्तिर्यातेति सूचितम्। नासा तवेत्यर्थात्, तिलप्रसूनपदवीं तिलपुष्पपदवी-मभ्येति गच्छति।

अत्र विश्वविजये कामः पुष्पायुधानि व्यापारयति, तानि च त्वद्वदन एव सन्तीत्युत्प्रेक्षितमिति जगद्धरः। तन्नमनोहम, सुखावयवानां पुष्पत्वेन प्राप्तेः। तथा च पुष्पायुधो विश्वं पुष्पायुधैरेव जयति तेषां पुष्पानां प्रतिपक्षाणि त्वन्मुख एव सन्तीति भवद्वदनसाहार्य-मनासाद्य कथं पुष्पायुधानि प्रभवेयुरिति त्वन्मुखसेवयेत्युत्प्रेक्षितमिति परमार्थः। एतेन कामस्यापि चेत् त्वन्मुखसेवा तथा सत्यहं वराकः त्वत्क्रोधेन कथं जीवामीति ध्वनितम्। 'स्निग्धो वत्सलचिक्कण' इति विश्वः। प्रायः शब्द उत्प्रेक्षावाचकः, 'मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः। उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृश' इति दण्डिवचनात्। विजयते 'विपराभ्यां जेरि'त्यात्मनेपदम्। स इति तत्प्रसिद्धौ। अतो यच्छब्दाकांक्षा नात्र 'तस्मै नमः परमकारणकारणाये'त्यादिरिव॥

१४। पुनरपि चाटुवचनपूर्वकमनुनयति। हे तन्वि कृशाङ्गि! अहो आश्चर्यं। त्वं पृथ्वीगता भूमिस्थितापि विबुधानां देवानां यौवतं युवतीनां समूहं वहसि। एका तन्वि पृथ्वीगता देवस्त्रीसमूहं वहसीत्याश्चर्यम्। शब्दच्छलेन तदेव दर्शयति - तव दृशौ चक्षुषी मदेनालसे मन्दयत्ने। तव वदनम् इन्दुमत्या चन्द्रज्ञानेनान्वितम्। तव मुखे चन्द्रसादृश्येन तद्बुद्धिः सर्वेष भवतीत्यर्थः। तव गतिजनानां मनोरमा मनो रमयतीति मनोरमा चित्तानन्द-जननीत्यर्थः। तव उरुद्वयं विजिता रम्भा कदली येन तत्तथा। तव रतिः सुरतक्रीडा कलावती चतुःषष्ठिकामकलायुक्तेत्यर्थः। तव भ्रुवौ रुचिरा चित्राणां लेखा ययोस्ते तथा। अथ च शब्दच्छलेन मदालसेन्दुमतीमनोरमारम्भाकलावतीचित्रलेखासंज्ञका अप्सरसः शरीर-सम्बद्धाः प्रतिपादिताः। पृथ्वीगतेति पृथ्वीच्छन्दो पीति ध्वनितम्। श्लेषो नामालङ्कारः। 'त्रिदशा विबुधाः सुरा' इत्यमरः। 'यौवतं युवतीवृन्दा'विति च॥

---

* 'इन्दुमत्युज्ज्वलम्' इति पाठ०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुग्धे विधेहि मयि निर्दयदन्तदंश—
दोर्वल्लिबन्धनिविडस्तनपीडनानि
चण्डि त्वमेव मुदमञ्च न पञ्चबाण-
चण्डालकाण्डदलनादसवः प्रयान्तु ॥ १५ ॥

प्रीतिं वस्तनुतां हरिः कुवलयापीडेण सार्द्धं रणे
राधापीनपयोधरस्मरणकृत्कुम्भेन सम्भेदवान् ।
यत्र स्विद्यति मीलति क्षणमथ क्षिप्तद्विपे तत्क्षणात्
कंसो बाणजितो जितं जितमिति व्यामोहकोलाहलः ॥ १६ ॥

इति श्रीगीतगोविन्दे मानिनी वर्णने
मुग्धमाधवो नाम दशमः सर्गः ॥

सात्वती

१५। एतावतापि यदि तव कोपशान्तिर्न्न जाता तदा कोपकृत्यमेव विधेहि तावताप्यहमनिन्दित एव स्यामीत्याह--हे मुग्धे मूढे ! मयि दन्तेन दंशो दन्तदंशो । दोरेव वल्लिः दोर्वल्लिः । तया बन्धो बन्धनं दोर्वल्लिबन्धः। निविडाभ्यां स्तनाभ्यां पीडनं निविडस्तनपीडनम्। तानि विधेहि। तत्र द्वन्द्वानन्तरं निर्दयान्वयः, तेन द्वन्द्वात् परः पूर्वो वा यः श्रूयते स प्रत्येकमभिसम्बध्यत इति निर्दयत्वं सर्वत्रान्वेति। तथा चान्योऽपि कोपेन दंशबन्धनपीडनान्येव कुरुत इति ध्वनिः। हे चण्डि कोपने ! त्वमेव मुदं हर्षम् अञ्च गच्छ। अञ्च गतिपूजनयोः। पञ्चबाणः कामः, क्रूरतया। स एव चण्डालः। तस्य काण्डेन दलनादसवः प्राणाः अर्थान्मम, न प्रयान्तु न गच्छन्तु। तथा च दन्तदंशबन्धनपीडनादिभिः कोपकार्यैस्तव हर्षो मम च कामचण्डालकाण्डान्मरणेनासद्गतिर्न भवेदित्येव विधेहीति वाक्यार्थः। 'दोर्दोषास्तु भुजाभुज' इत्यमरः। 'चण्डी स्यादतिकोपने'ति च॥

१६ ग्रन्थप्रक्रमं विहाय सर्गान्ते मङ्गलमाचरति। वो युस्माकं हरिः कृष्णः प्रीतिं तनुतां विस्तारयतु। किम्भूतः ? कुवलयापीडेण कंसकरिणा सार्धं सह रणे संग्रामे सम्भेदवान् सम्बद्धः। किम्भूतेन ? राधायाः पीनयोर्मांसलयोः पयोधरयोः स्मरणकृत् स्मरणकारी कुम्भो यस्य एतादृशा। तदुक्तम्—'सादृष्टचिन्ता या स्मृतिवीजस्य बोधका इति। अतएव तत्स्मरणादेव कृष्णे स्विद्यति सात्त्विकस्वेदं विभ्रति क्षणं मीलति चक्षुर्मुद्रनभाजि। अथानन्तरं तत्क्षणात् द्विपे हस्तिनि क्षिप्ते सति कृष्णेनेत्यर्थात्, कंसस्य प्राथमिकस्वेदादि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सारवती

मात्रदर्शिनो जितं जितमिति व्यामोहात् कोलाहलः अतएव अलं व्यर्थोऽभूज्जात इत्यर्थः। यत्र स्विद्यतीति बहुषु पाठः तत्पक्षे यत्र रणे स्विद्यत्यर्थात् कृष्ण इत्यर्थः। तथा च श्लोकार्धविच्छेदात् नक्लेशलेशोऽपीत्यवधेयम्। क्वचिच्च कंसरणो जितं जितमिति व्यालोलकोलाहल इति पाठः। तत्पक्षे कंसरणे जितं जितञ्जितं पश्येति वक्तव्ये सम्भ्रमात् कंसरणोजितं जितमिति व्यालोलानां विशेषतो व्याकुलतया लोलानां चञ्चलानां कोलाहलः वो युष्माकं प्रीतिं तनुतामित्यन्वयः। कस्मिन् सति कोलाहलः तत्राह—हरिः कुवलयापीडेण कंसकरिणा सार्धं रणे सम्भेदवान् सम्बद्धः। कथम्भूतेन? राधापीनपयोधरस्मरणकृत्कुम्भेनेति व्याख्यातप्रायम्। अथानन्तरं कृष्णे स्विद्यति सति क्षणं मीलति सति। स्वेदमीलनयोर्हेतुरुक्त एव। तत्क्षणात् क्षिप्तद्विपे क्षिप्तहस्तिनि सतीत्यर्थात्। अत्र पक्षे कुवलापीडजयेनैव कंसजयो न बालानां वाक्यार्थत्वदोष इत्यवधेयम्। मानिनीमानापनयने चतुरः चतुर्भुजो यत्रेति व्युत्पत्त्या चतुरचतुर्भुजेति सर्गनाम॥

इति समस्तप्रक्रियाविराजमानमहाराजशुक्लध्वजविरचितायां सारवत्यां गीतगोविन्दटीकायां चतुरचतुर्भुजो नाम दशमः सर्गः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सटीक-गीतगोविन्दम्

एकादशः सर्गः ।

सानन्दमुकुन्दः ।†

सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं
गतवति कृतवेशे केशवे कुञ्जशय्याम् ।
रचितरुचिरभूषां दृष्टिमोषे प्रदोषे
स्फुरति निरवसादां कापि राधां जगाद ॥ १ ।

सारवती

१। प्रियसङ्गमोत्कण्ठिताप्यन्यवचनमपेक्षितुं विदग्धेति तत्प्रबोधनार्थसखीवचनप्रस्तावं रचयति। तदाह कामतन्त्रे सन्नायिकाप्रस्तावे—'उत्कण्ठितापि वनिता* प्रियसङ्गमाय मानं न मुञ्चति+ विनावचनं सखीनामि'ति । पद्यार्थस्तु—कापि सखी राधां जगाद उक्तवती। कस्मिन् सति ? प्रदोषे रजन्यारम्भकाले स्फुरति शोभमाने। तदाह—'प्रदोषो रजनीमुखमि'ति। स्फुरतीत्यनेन प्रदोषताख्यकालो दर्शितः। प्रदोष इत्युक्ते तच्चरमभागेऽप्यधिकरणतासिद्धेः न तदर्थलाभ इति। अत्र मानस्य दीर्घत्वसूचनाय प्रदोषोपादानम्। तथा च तादृशमानस्य दीर्घकालानुनयेनाप्यपगमे क्रीडाकालस्तिष्ठेदेवेति हृदयम्। कीदृशे ? दृष्टिं दर्शनं मुष्णातीति कर्मव्यण्, तस्मिन्। अत्र च प्रदोषस्यैव दर्शनमोषकत्वे निशि ततोऽप्यधिकान्धकारः स्यादिति अभिसारोचितरात्रित्वं सूचितम्। कीदृशीम् ? निरवसादाम्। अवसादो हरिविरहजनितक्लैव्यम्, तस्मान्निर्गतामपगताम्। पुनः कीदृशीम् ? रचिता विविधा नानारूपा भूषा अलंकरणं यया सा तथा ताम्। कस्मिन् सति ? सुचिरं बहुकालं मृगाक्षीं हरिणनयनाम् अनुनयेन विनयकर्मणा प्रीणयित्वा प्रीतिं कृत्वा केशवे कृष्णे कुञ्जशय्यां लतापिहिततल्पं गतवति सति यातवति सतीत्यर्थः। कीदृशे ? कृतो विहितो वेशोऽलङ्करणं येन तादृशे। तदनेन उभयोरलङ्करणप्रदर्शनेन उभयोरन्योन्यसङ्गमसाकांक्षत्वेनान्योन्यानुरागप्रदर्शनेन रसाधिक्यं सूचितम्। तदाह—'महानुदयते यूनो रसोऽन्योऽन्यानुरागत' इति॥

---

† 'सानन्दगोविन्दः' इति पाठ०। क्वचित् 'सानन्ददामोदरः' इत्यपि पाठो दृश्यते।
* 'नायिका' इति पाठ०।
+ 'न मुञ्चति' इत्यस्य स्थाने 'मुञ्चति' इति पाठ०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वसन्तरागेण गीयते।

विरचितचाटुवचनरचनं चरणे रचितप्रणिपातम्।
सम्प्रति मञ्जुलवञ्जुलसीमनि केलिशयनमनुयातम्॥
मुग्धे मधुसूदन+मनुमतमनुसर* राधिके॥ ध्रुवम्॥ २॥
घनजघनस्तनभारभरे दरमन्थरचरणविहारम्।
मुखरितमणिमञ्जीरमुपैहि विधेहि मरालविकारम्॥ मुग्धे०॥ ३॥

सारवती

२। किं जगादेत्याकांक्षायां गीतेनाह। गीतस्यास्य वसन्तरागः, रूपकतालः। रागलक्षणं प्रागुक्तमेव। नायिका चात्राभिसारिकैव, तल्लक्षणमिह नोच्यते पूर्वोक्तत्वादेव। हे राधिके! मुग्धे सुन्दरि अज्ञे वा। 'मुग्धः सुन्दरमूढयोरि'त्यमर। अनुगतम् अनुकूलं मधुसूदनं मधुनाम्नो दैत्यस्य सूदनं खण्डनं कृतं येन तं कृष्णम् अनुसर अनुगच्छ। मधुसूदनपदेन वीरताप्रतिपादनेन राधाया अनुरागवीजं प्रदर्शितम्। तदाह—'प्रायो वीररताः स्त्रिय' इति। कीदृशम्? विरचिनानि चाटुवचनानि येन तम्। पुनः कीदृशम्? चरणेऽर्थात्तव रचितः प्रणिपातः पतनं येन स तथा तम्। तथा च तावदेव विदग्धाया मानमित्यतः परं मानं मुञ्च। तदाह 'पादपातावधिः प्रोक्तो मानो मुग्धमृगीदृशामि'ति। कुत्रानुसर्त्तव्यमित्याकांक्षायामाह—पुनः कीदृशम्? सम्प्रति इदानीं मञ्जुलस्य मनोहरस्य वञ्जुलस्य वेतसस्याशोकस्य सीमनि पर्यन्ते तट इति यावत्, केलिशयनं क्रीडार्थशय्यां उपलक्षीकृत्य यातं गतम्। अत्र केलिशयनं लक्षीकृत्य गतं न तु केलिशयनं गतमित्यनेन रचिता शय्या म्लाना स्यादिति त्वां विना नारोहतीत्यभिनिवेशप्रदर्शनम्॥

३। अनुसरणप्रकारमुपदर्शयति—हे घनजघनस्तनभारभरे राधे! घनयोर्निविडयोः जघनयोः स्तनयोश्च भारेणातिशयेन भरो यस्यास्तादृशि। दरमन्थर ईषन्मन्थरश्चरणविहारो यथा स्यादेवम्। तदाह—'ईषदर्थे दराव्ययमि'ति। मुखरितो ध्वनितो मणियुतो मञ्जीरो नूपुरं यत्र एवं यथा स्यात्तथा उपैहि उपगच्छ अर्थात् कृष्णम्। अतएव मरालविकारं राजहंसतिरस्कारं विधेहि। तव मन्थरगमनेन राजहंसस्य तिरस्कारः स्यादिति भावः। धातूनामनेकार्थत्वात् विपूर्वस्य करोतेस्तिरस्कारार्थता। 'मरालो राजहंसे स्यात् मरालोऽहं समात्रक' इति धरणिः॥

+ क्वचित् 'मधुमथन' इत्यपि पाठः।
* 'अनुभज'इति पाठ०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शृणु रमणीयतरं तरुणीजनमोहनमधुरिपुरावम् ।
कुसुमशरासनशासनवन्दिनि पिकनिकरे भज भावम् ॥ मुग्धे० ॥ ४ ॥
अनिलतरलकिसलयनिकरेण करेण लतानिकुरम्बम् ।
प्रेरणमिव करभोरु करोति गतिं प्रतिमुञ्च विलम्बम् ॥ मुग्धे० ॥ ५ ॥
स्फुरितमनङ्गतरङ्गवशादिव सूचितहरिपरिरम्भम् ।
पृच्छ मनोहरहारविमलजलधारममुं कुचकुम्भम् ॥ मुग्धे० ॥ ६ ॥
अधिगतमखिलसखीभिरिदं तव वपुरपि रतिरणसज्जम् ।
चण्डि रसितरसनारवडिण्डिममभिसर सरसमलज्जम् ॥ मुग्धे ॥ ७ ॥

सारवती

४। पुनरभ्यर्थयति । तरुणीजनस्य मोहकं मधुरिपोः कृष्णस्य रावं शब्दं शृणु आकर्णय । कीदृशम् ? रमणीयतरम् अतिमनोहरम् । पिकनिकरे कोकिलसमूहे भावं स्नेहं भज संश्रय । तथा च इदानीमपि विवहारस्तु स्वाभाव्यं परिहरेत्यर्थः । ननु तथापि सन्तापके पिकनिकरे कथं स्नेहवती स्यामित्याशङ्क्याह—कथम्भूते ? कुसुमशरासनशासनवन्दिनि पुष्पधनुषः शासनमाज्ञां वन्दितुं शीलं यस्य तस्मिन् । तथा च प्रियवियुक्तजनं सन्तापयेति कामाज्ञया तेन तथा विहितमतः परन्तु तव सुखादय एव भविष्यन्तीति भावः ॥

५। यात्रायामानुकूल्यं सूचयन्नेव पुनरनुनयति—हे करभोरु । गतिं प्रति कृष्ण-समीपगमनं प्रति विलम्बमपेक्षां मुञ्च त्यज । तत्र हेतुमाह—लतानिकुरम्बं वल्लीसमूहः अनिलतरलेन किसलयनिकरेण प्रेरणमिव करोति, तवेत्यर्थात् । तथा च अचतना अपि एवमुपदिशन्ति किं पुनः सख्य इति ध्वनितम् ॥

६। तवापि कृष्णासङ्गमोत्कण्ठा जातेव विलम्बेन केवलमस्माकमवधीरणमिव भङ्ग्या दर्शयति—हे राधे अमुं कुचकुम्भं स्तनकलसं पृच्छ अर्थात् गमनपरामर्षम् । कीदृशम् ? अनङ्गस्य तरङ्गं चलनं तस्य वश आयत्तता ततः स्फुरितं कम्पितमित्यर्थः । अतएव सूचितो हरेः कृष्णस्य परिरम्भो येन तम् । तदाह वात्सायणः—'अचिरप्रियसमागमसूचनाय स्तन-कम्पो युवतीनां भवती'ति । पुनः कीदृशम् ? मनोहरो मनोज्ञः स्यापि हार एव विमलजल-धारा यत्र तादृशम् । अन्य रसपूर्णकलसाद् बहिर्जलधारा वर्त्तते इति ध्वनिः । अत्र हरि-परिरम्भाय स्फुरतः प्रष्टव्यकुचकुम्भस्यानुमतिः स्फुटैवेति दर्शितम् । एवञ्च त्वमप्यतिसाकां-क्षासीत्यनेनागमने मम नैवापेक्षामात्रमित्यपि सूचितम् । उत्प्रेक्षा चात्रालङ्कारः ॥

७। सखीभिरवगतेऽपि तवाशये विलम्बनमनुचितमिति दर्शयति--हे चण्डि कोपने ! तव वपुः शरीरम् अतिरतिरणसज्जम् अत्यन्तानङ्गरङ्गसङ्गरसन्नद्धम् इदमखिलाभिः सखीभिरधिगतं ज्ञातम् । सर्वे गत्यर्थाः सोपसर्थाः ज्ञानार्थाः । तस्मादलज्जं व्रीडाविहीनं यथा स्यादेवम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्मरशरसुभगनखेन सखिमवलम्ब्य करेण सलीलम् ।
चल वलयक्वणितैरवबोधय हरिमपि निगदितशीलम् ॥ मुग्धे० ॥ ८ ॥

श्रीजयदेवभणितमधरीकृतहारमुदासितरामम् * ।
हरिविनिहितमनसामधितिष्ठतु कण्ठतटीमविरामम् ॥ ९ ॥

सा मां द्रक्ष्यति वक्ष्यति स्मरकथां प्रत्यङ्गमालिङ्गनैः
प्रीतिं यास्यति रंस्यते सखि समागत्येति संचिन्तयन्+ ।
दूरं T पश्यति वेपते पुलकयत्यानन्दति स्विद्यति
प्रत्युद्गच्छति मूर्च्छति स्थिरतमःपुञ्जे निकुञ्जे प्रियः ॥ १० ॥

सारवती

अतएव रसितरसनारण्या शब्दायमानकाञ्चीश्रेण्या डिण्डिमो व्यक्तरावो यत्र तत्तथा। एवं यथा स्यात् सरसं रससहितं च यथा स्यादेवम् अभिसर अभिसारं कुरु। डिण्डिमो वाद्यभेदे स्यादित्युपचारात्। प्रकृते डिण्डिमशब्दो अभिप्रेत इत्यवधेयम्। तथा चान्यच्चाङ्गिति-रोधनार्थमभिसारे सङ्गोपनं क्रियते। प्रकृते तदभावात् स्वच्छन्दमभिसरेति वाक्यार्थः ॥

८। कथमेवम्विधं मानं विहाय स्वयमेव यास्यामीत्याशंक्योपदिशति— सखीं° करेणावलम्ब्य सलीलं सक्रीडं यथा स्यादेवं चल सञ्चर। कीदृशेन करेण ? स्मरशरवत् कामवाणवत् कन्दर्पबाण-वत् सुभगः सुन्दरो नखो यस्य तादृशेन। तत्र गता लज्जापरवशा प्रथमं किं कुर्यामित्याशंक्याह-- वलयक्वणितैः हरिमपि अवरोधय ज्ञापय। अहमागतेत्यर्थात्। कीदृशम् ? निगदित शीलं यस्य तम्। तच्च हरिरभिमानीत्यादिना निगदितम्। तथा च तवानागमनेन गमिष्यतीति ध्वनिः। यद्वा 'पतति पतत्र' इत्यादिना त्वन्मात्रदत्तशीलं स्वभावो यस्य तम्। तथा च पक्षे सखीप्रेरितै-र्यास्यसि, तत्र च सञ्चारादिजनितवलयक्वणितेन अतिसावधानो हरिर्भविष्यति, आगता-मवेद्य स्वयमेव अनुनेष्यतीति न प्रथमं तवार्त्तिप्रकाशनसम्भवनापीति वाक्यार्थः। 'शीलं स्वभावे समाधावपी'ति धरणिः ॥

९। कीर्त्यनुवृत्त्यर्थं स्वनाम निबन्धनपूर्वकं गीतमुपसंहरति। श्रीजयदेवभणितमिदं गीतं कर्तृ हरौ विशेषतो निहितमारोपितं मनो यैस्तेषाम् अविरामं यथा स्यादेवं कण्ठतटीं कण्ठस्थलीमधितिष्ठत्वाश्रयत्वित्यर्थः। अधिशीङ् स्थासां कर्मेति कण्ठतट्याः कमता। कीदृशम् ? अधरीकृतो हारो येन तत्। उदासिता औदास्यं प्रापिता रामा सुन्दरी येन तत्। तथा च एतादृशं सरसं गीतं यत्कण्ठगतं हारं रामाञ्च लघयतीति वाक्यार्थः ॥

१०। तत्र गमनेऽपि यदि कदाचित् कृष्णो न मीलति यदि वा न सम्भाषते तदा द्विगुणः परितापः स्यादित्याशङ्कायामाह—हे राधे ! निकुञ्जे लतागृहे प्रियः कृष्णः

---

* 'उदासितवामम्' इति पाठ०। तत्पक्षे सारवत्यामपि 'उदासिता वामा' इत्यादिकं व्याख्यानं लभ्यते।

+ 'चिन्ताकुलः' इति पाठ०। क्वचित् 'चिन्तान्वितः' 'इत्यपि पाठो दृश्यते।

T 'स त्वाम्' इति पाठ०।

० 'कुञ्जे' इति पाठ०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अक्ष्णोर्निक्षिपदञ्जनं श्रवणयोस्तापिञ्ज*गुच्छावलीं
मूर्ध्नि श्यामसरोजदाम कुचयोः कस्तूरिकापत्रकम् ।
धूर्त्तानामभिसारसत्वरहृदां विष्वङ्निकुञ्जे सखि
ध्वान्तं नीलनिचोलचारु सुदृशां प्रत्यङ्गमालिङ्गति ॥ ११ ॥

सात्वती

एतत् सर्वमाचरति । कीदृशे निकुञ्जे ? स्थिरतमःपुञ्जे स्थिरः स्थायी निविड इति यावत्, तमःपुञ्जो यत्र तादृशे । एतेन निविडान्धकारो दर्शितः । कीदृशः ? हे सखि ! सा राधा मां समागत्य द्रक्ष्यति ईक्षिष्यते, स्मरकथां कामजनितकथां वक्ष्यति कथयिष्यति, प्रत्यङ्गं प्रत्यवयवम् आलिङ्गनैः आलिङ्ग्य प्रीतिं यास्यति प्रीता भविष्यति रंस्यते रमणं करिष्यतीत्यनेन प्रकारेण चिन्तान्वितः चिन्तायुक्तः । राधासख्याः निरुपदसखिपदेन सम्बोधनेन तदभेदः सूचितः । हे सखि राधे इति सखीवचनतया न योजनीयम् । तथा सति विरोधिव्यवधाने-नान्वयबोधशैथिल्येन रसभङ्गः स्यादिति । राधासम्बोध्यता च प्रकरणादेव यास्यतीति किं किमाचरतीत्याह—दूरं पश्यति तवागमनशङ्कया पर्यन्तमीक्षते, अनन्तरं त्वामुपगतामिवाशंक्य तव भयात् सात्त्विकभावात् वेपते, कम्पते पुलकयति अङ्गमित्यर्थात्, नन्दति हृष्यति, स्विद्यति स्वेदवान् भवति, ततः प्रत्युद्गच्छति ततः त्वामनवाप्य मूर्च्छति मूर्च्छां गच्छति । तथा चेदानीमपि विविधारम्भः भवत्परायणो कुञ्ज एव वसति तिष्ठतीति वाक्यार्थः ॥

११। पुनरभिसारसामग्रीमुपदर्शयति—हे सखि ध्वान्तं गाढं तमः सुदृशां सुनयनानां प्रत्यङ्गमालिङ्गति । कीदृशीनाम् ? धूर्तानाम् अभिसारनिमित्तं निजगुरुजनप्रतारिकानाम् । तदेव कुत इत्यत आह—अभिसारे सत्वरं त्वरितं हृत् हृदयं यासां तासाम् । 'स्वान्तं हृन्मानसं मन' इत्यमरः । कुत्र ? विष्वक् सर्वत्र निकुञ्जे लतागृहे ? कीदृशम् । नीलनिचोलवत् श्याम-प्रच्छदपटवत् चारु मनोज्ञम् । 'निचोलं प्रच्छदपट' इत्यमरः । पुनः कीदृशम् ? अक्ष्णोर्नयनयोः अञ्जलं कज्जलं निःक्षिपत्, अपर्यादत्युत्प्रेक्षा । श्रवणयोः कर्णयोः तापिञ्जगुच्छावलीं तमाल-स्तवकश्रेणीं निक्षिपत् । 'गुच्छस्तवक इत्यपीत्य'मरः । मूर्ध्नि मस्तके श्यामसरोजदाम नील-कमलमालां निक्षिपत्, कुचयोः स्तनयोः कस्तूरिकापत्रकं मृगमदविशेषकं निक्षिपदित्यादि इत्यनेन कुलजाभिसारसामग्री दर्शिता । तथा च गाढं तमो जातम् अभिसारिकाभि-साराय च प्रयातम् अलंकरणादिकञ्च अन्धकारेणैव विहितं तमः परं कृतमपक्षेयेति तात्पर्यार्थः । एवञ्च नपुंसकमप्यचेतनमपि ध्वान्तमङ्गनालिङ्गनपरम्+ ईदृशो मादकः समयः कथमत्र स कृष्णः त्वत्समीहितं न सम्पादयिष्यतीति ध्वनिः ॥

---

* 'तापिच्छ' इति पुस्तकान्तरे पाठः । 'तापिञ्ज' इति च पाठान्तरम् ।

\+ 'अनालिङ्गनपरम्' इति पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

काश्मीरगौरवपुषामभिसारिकाना-
माबद्धरेखमभितो रुचिमञ्जरीभिः।
एतत्तमालदलनीलतमं तमिस्रं
तत्प्रेमहेमनिकषोपलतां तनोति ॥ १२ ॥
हारावलीतरलकाञ्चनकाञ्चीदाम-
मञ्जीरकङ्कणमणिद्युतिदीपितस्य* ।
द्वारे निकुञ्जनिलयस्य हरिं निरीक्ष्य
व्रीडावतीमथ सखीमियमित्युवाच+ ॥ १३ ॥

सारवती

१२। प्रेमहेमपरीक्षाकालस्त्वयमेवेत्याह—एतत्तमिस्रमन्धकारः तासामभिसारिकानां प्रेमाण्येव दुर्लभत्वात् नाशे शोकहेतुत्वाच्च हेमानि, तेषां निकषोपलतां कषपट्टिकाप्रस्तरतां तनोति विस्तारयति। 'निकषः कषपट्टिके'त्यमरः। 'हिरण्यं हेमहाटकमि'ति च। कीदृशम्? तमालदलवन्नीलतममतिश्यामम्। पुनः कीदृशम्? अभिसारिकानां रुचिमञ्जरीभिः कान्तिश्रेणीभिः अभितः सर्वतः आबद्धा रेखा यत्र तादृशम्। 'ततिस्तु मञ्जरी श्रेणी धोरणी पंक्तिरावलिरि'ति वृद्धामरः। कीदृशानाम्। काश्मीरवत् कुङ्कुमवत् गौरं पीतं वपुः शरीरं यासां तादृशीनाम्। 'पीतो गौरो हरिद्राभ' इत्यमरः। 'काश्मीरं कुङ्कुमे प्रोक्तं कुचपुष्करमूलयोरि'ति। अत्रोत्प्रेक्षालङ्कारः। एतस्मादपि तवापि प्रेमपरीक्षा स्यादिति ध्वनिः॥

१३। अभिसारोचितव्यापारालङ्करणादिकमन्याभिसारिकावर्णनप्रसङ्गादेव वर्णितमतः तदुत्प्रेक्ष्य सङ्केतनिकेतनगमनान्तरोचितचरितवर्णनाय प्रसङ्गमवतारयति। अथानन्तरं सखी राधां निजगाद उक्तवती। कीदृशीम्? निकुञ्जनिलयस्य निकुञ्जगृहस्य द्वारे हरिं कृष्णं निरीक्ष्य दृष्ट्वा व्रीडावतीं लज्जावतीम्। 'ह्रस्तु लज्जा त्रपा व्रीडे'ति वृद्धामरः। अत्र द्वारपदेनोत्कण्ठातिशयो दर्शितः। किम्भूतस्य? हारावली हारसमूहः तरलं चञ्चलं काञ्चनकाञ्चीदाम हेमरसनादाम च मञ्जीरो नूपुरश्च कङ्कणं बाह्वलङ्करणञ्च तेषां ये मणयः तेषां द्युतिभिः कान्तिभिर्दीपितस्य प्रकाशितस्येत्यर्थः। अत्र च तरलपदेन कम्पद्वारा स्मरविकारो दर्शितः। कम्पस्य सकलावयवचलताहेतुत्वेऽपि हारावलीमपहायान्येषां विशेषणतया तरलपदस्योपादानेन करचरणादीनामितस्ततो गतेऽपि हृदयस्य प्रियैकरसतया निश्चलतेति सूचितम्।

---

* 'केयूरकङ्कणमणि'० इत्यादि पाठ०।
+ ……'सखी निजगाद राधाम्' इति पाठो ग्रन्थान्तरे दृश्यते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वराडी रागेण गीयते।

मञ्जुतरकुञ्जतरकेलिसदने।
प्रविश राधे माधवसमीपमिह
विलस रतिरभसहसितववदने ॥ ध्रुवम् ॥ १४ ॥

नवभवदशोकदलशयनसारे
प्रविश राधे माधवसमीपमिह
विलस कुचकलसतरलहारे । १५ ॥

कुसुमचयरचितशुचिवासगेहे ।
प्रविश राधे माधवसमीपमिह
विलस कुसुमसुकुमारदेहे ॥ १६ ॥

सारवती

१४। किं जगादेत्याकांक्षायां गीतेनाह। गीतस्यास्य वराडी रागः। एकतालीतालः। तल्लक्षणं प्रागुक्तम्। नायिकात्राभिसारिका, तल्लक्षणमप्युक्तम्। गीतार्थस्तु हे रतिरभसहसितवदने राधे! रतिरभसेन भविष्यत्क्रीडाकौतुकेन हसितं हासयुक्तं वदनमाननं यस्यास्तादृशि राधिके! माधवसमीपं प्रविश श्रीकृष्णपार्श्वे प्रविष्टा भव। इह अत्र स्थाने विलस विलासं कुरु। इह कीदृशे? मञ्जुतरोऽतिमनोहरः कुञ्जतरोऽतिशयितकुञ्जः स एव केलिसदनं क्रीडागृहमिव यत्र तादृशे। तथा च त्वं तावत् रतिरभसहसितवदना, इदञ्च स्थानं ललितं विजनञ्च, हरिश्च क्रीडोत्कण्ठित एव। तदविलम्बितं विधेयं विधेहीति ध्वनिः। एवं प्रतिपादमेव पूर्वार्द्धं स्थानविशेषणम्, अपरार्द्धं नेहोत्तरदानं सम्बोधनम्। तत्पूर्वदलञ्चैकमेवेत्ति बोद्धव्यमिति ।।

१५। सुकुमारायास्तव सख्याः समुचितं शयनं रचितमेवास्ति तत् किम्बिलम्बेनेत्याह—कुचावेव कलसाविति रूपकम्. तत्र तरलो हारो यस्याः तादृशि राधे। माधवसमीपं प्रविश। मोट्टायितभावदर्शनेन हारस्य तरलतेति भगीरथः। नवं मनोज्ञं यत् भवदशोकदलशयनं भवत्सम्बन्धिनी अशोकदलशय्या तथा सारे श्रेष्ठे इति स्थानविशेषणम्। 'कोषे सारं बले सारं श्रेष्ठे सारं प्रकीर्तितमि'ति वृद्धामरः। अत्राशोकपदोपादानेन शोकशमनत्वं सूचितम्॥

१६। शय्यारमणीयतां दर्शयित्वा गृहरमणीयतां दर्शयति। कुसुमवत् सुकुमारं कोमल

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चलमलयवनसुरभिशीते ।
प्रविश राधे माधवसमीपमिह
विलस रसवलितर्ललितगीते ॥ १७ ॥

विततबहुवल्लिनवपल्लवघने ।
प्रविश राधे माधवसमीपमिह
विलस चिरमलसपीनजघने ॥ १८ ॥

मधुमुदितमधुपकुलकलितरावे ।
प्रविश राधे माधवसमीपमिह
विलस मदनरसर सभावे+ ॥ १९ ॥

सारवती

देहं यस्याः तादृशि राधे ! कुसुमचयेन रचितं शुचिवासगेहं शुद्धवासमन्दिरं यत्रेति स्थान-विशेषणम् । तथा च त्वं कुसुमसुकुमाराङ्गी इदञ्च कुसुमरचितमन्दिरम् । तुदत्रैव युक्ता तव क्रीडेति भावः ॥

१७। रतिश्रमशमनो मलयपवनोऽप्यत्र समुचित एवेति दर्शयति । रसः शृङ्गारादिः, तेन बलिता सहिता ललिता मनोहरा गीतिर्गानं यस्याः तादृशि राधे हे ! चलमलयपवनस्य पवनेन सुरभि सौरभयुक्तं शीतं शीतलञ्च यत् तत्तया तस्मिन्निति स्थानविशेषणम् ।

१८। स्थानस्य निभृतत्वं दर्शयन्ती प्रेरयति । पीनौ कुचकलसौ जघने च यस्याः तादृशि राधे हे ! वितता विस्तीर्णा अनेकलता यासां नवैर्नूतनैः पल्लवैर्घने निविड इति स्थानविशेषणम् ॥

१९। मधुपध्वनिरूपमुद्दीपनविभावमनुभावयन्ती त्वरयति । मदनरसो मन्मथ-जनितेच्छा, तेन यो रभसो हर्षस्तेन भावा सात्त्विकाः व्यभिचारिणश्च यस्यास्तादृशि राधे ! मदेन मत्ततया मुदितं हर्षितं यन्मधुपकुलं भ्रमरकुलं तेन कलितः कृतो रावः शब्दो यत्रेति स्थानविशेषणम् । तथाच मदयतीति मदनः, तत्र सदृष्टायास्तव मदमुदिते मधुपकुले समानशीलतयाऽनुरागो युज्यत इति ध्वनिः ॥

---

* 'मदनरससरसभावे' इति पाठ० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मधुरतरपिकनिकरनिनदमुखरे।
प्रविश राधे माधवसमीपमिह
विलस दशनरुचिरुचिरशिखरे॥ २०॥
विहितपद्मावतीसुखसमाजे।
कुरु मुरारे मङ्गलशतानि।
भणति जयदेवकविराजराजे॥ २१॥
त्वां चित्तेन चिरं वहन्नयमिति श्रान्तो भृशं तापितः
कन्दर्पेण च पातुमिच्छति सुधासम्बाधविम्बाधरम्।
अस्याङ्गं तदलंकुरु क्षणमिह भ्रूक्षेपलक्ष्मीलव-
क्रीते दास इवोपसेवितपदाम्भोजे कुतः सम्भ्रमः॥ २२॥

सारवती

२०। पुनरपि कोकिलनिनदरूपमुद्दीपनविभावमनुभावयन्ती त्वरयति। दशनरुचिर्दन्तकान्तिः, सैव रुचिरं मनोज्ञं शिखरं माणिक्यं यस्या एवम्भूते राधे! मधुतरपिकनिकरनिनदेन मुखरे शब्दायमाने इह स्थान इत्यर्थः। 'पक्वदाडिमबीजाभं माणिक्यं शिखरं विदुरि'ति शाश्वतः। 'शब्दे निनादनिनदध्वनिध्वानरवस्वना' इत्यमरः॥

२१। कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं गीतमुपसंहरति। हे मुरारे कृष्ण! मङ्गलशतानि कुरु। कविराजस्य राजा कविराजराजः जयदेवनामा वासौ कविराजराजश्चेति स तथा, तस्मिन् भणति सति। कीदृशे? विहितः कृतः पद्मावती तत्कान्ता तस्याः सुखस्य समाजः सान्निध्यं येन तादृशे। राजराज इत्यत्र 'राजाहःसखिभ्यष्टजि'ति टच्। अत्र लोके नामविज्ञापनार्थं निजभार्जा वर्णिता। राजदत्तपदप्रकाशनार्थं कविराजराजपदेन स्वकीयोपन्यासः कृत इत्यवधेयम्॥

२२। एतावत्कालसन्तापिता किमुद्दिशतीति* भीतिपरवशां राधिकामाह—हे राधे! अयं कृष्णः तव सुधया अमृतेन सम्बाधः सङ्कुलः यो विम्बप्रायोऽधरः तं पातुमिच्छति। तदाह—'सम्बाधः सङ्कुले मत' इति रत्नकोषः। यद्वा सुधां सम्बाधत इति सुधासम्बाध इति भावे घञ्। तथा चामृतादप्युत्कृष्ट इत्यर्थः। कीदृशः? त्वां चित्तेन चेतसा चिरं चिरकालं व्याप्य वहन् इति हेतोरतिश्रान्तः। पुनः कीदृशः? भृशम् अत्यर्थेन कन्दर्पेण

---

* 'एतावत्कालं मत्तापितमुद्दिशतीति' इति पाठ०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सा ससाध्वससानन्दं गोविन्दे लोललोचना।
सिञ्जानमञ्जुमञ्जीरं प्रविवेश निवेशनम्॥ २३॥

वराड़ीरागयतितालाभ्यां गीयते।

राधावदनविलोकनविकसितविविधविकारविभङ्गम्।
जलनिधिमिव विधुमण्डलदर्शनतरलिततुङ्गतरङ्गम्॥
हरिमेकरसं चिरमभिलषितविलासम्।
सा ददर्श गुरुहर्षवशम्वदवदनमनङ्गविकासम्*॥ ध्रुवम्॥ २४॥

सारवती

सन्तापितः सन्तापं प्रापितः। अन्योऽपि भारहारो सूर्यादितापवांश्च जनादिकं पातुमीहत एव। एवञ्च त्वामुद्वहन् श्रान्तः त्वया चास्य दृढ़ शमयितुं युज्यत एवेति ध्वनिः। तस्मात्तस्य कृष्णस्याङ्कं क्रोडं क्षणं व्याप्य अलङ्कुरु भूषय। इह कृष्णे दास इव कुतः कस्मात् सम्भ्रमो भीतिरित्यर्थः। तदाह—'सम्भ्रमस्त्वादरे भीतौ सद्वंशे आदरेऽपि चे'ति विश्वः। अत्रोपपादकं विशेषणमाह—कीदृशे? भ्रुवोः क्षेपः चालनमिति यावत्, स एव लक्ष्मीः सम्पत्तिः, तया नवक्रीते नूतनक्रीते। अत्राभिनवक्रीते दासे सर्वेषां स्नेहो भवतीति दर्शयितुं नवपदोपादानम्। पुनः कीदृशे? उपसेवितमाराधितम् अर्थात्त्वदीयं पदाम्भोजं येन तादृशे। अनेनातिभक्तत्वप्रतिपादनेन कृपापात्रत्वं दर्शितम्। एवञ्च सेवितपदाम्भोज इति विशेषणेन कृष्णस्य चरणपतनस्मारणेन प्रियपादपातावधिरेव कुलीनानां मान इति दर्शितम्। तदाह भरतः—'मानः प्रोक्तः कुलस्त्रीणां चरणानमनावधिरि'ति॥

२३। सखीप्रेरिताया राधायाः केलिसदनप्रवेशं वर्णयति। सा राधा सिञ्जानमञ्जुमञ्जीरं शब्दायमानमनोहरनूपुरं यथा स्यादेवं निवेशनं केलिगृहं प्रविवेश। ततः कीदृशी? ससाध्वसं सभयं सानन्दं सहर्षञ्च यथा स्यादेवं गोविन्दे च लोलं चञ्चलं लोचनं यस्याः तादृशीत्यर्थः। अत्र कथमयमेवं मया सन्तापित इति साध्वसं चिरेणाद्य ममातिविदग्धेन मुकुन्देन सङ्गमः स्यादित्यानन्द इति भावः। 'मञ्जीरो नूपुरोऽस्त्रियामि'त्यमरः॥

२४। तुल्याकांक्षयोरपि प्रथमं नायकस्यैव तारुण्यमुल्लसतीति विविधसङ्गीतशास्त्रस्वरमेन तद्वर्णनपूर्वकं राधायाः कृष्णदर्शनं वर्णयति। तदाह—'गाढाकांक्षापि वामाक्षी सुरतादिषु पण्डिता। रतप्रवृत्तौ कान्तस्य व्यापारं समपेक्षत' इति भरतः॥ गीतस्यास्य वराडी रागः। रागलक्षणमुक्तमेव। रूपकतालः। नायिका चात्राभिसारिकैव, तल्लक्षणमप्युक्तम्। सा राधा हरिं ददर्श कृष्णं विलोकयामास। कीदृशम्? एको रसो यस्य

---

* ग्रन्थान्तरे '...अनङ्गनिवासम्' इति पाठो दृश्यते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हारममलतरतारमुरसि दधतं प्रविलम्ब्य+ विदूरम्।
स्फुटतरफेनकदम्बकरम्बितमिव यमुनाजलपूरम्॥ हरि०॥ २५॥

सारवती

अर्थात् शृङ्गारः। यद्वा एकः एकविषयः रस इच्छा यस्य तम्। पुनः कीदृशम्? चिरं चिरकालं व्याप्य अभिलषितः ईहितो विलासो रतिर्येन तम्। पुनः कीदृशम्? गुरुहर्षस्यातिप्रमोदस्य वशम्वदमधीनं वदनमाननं यस्य तम्। पुनः कीदृशम्? अनङ्गस्य स्मरस्य विकासोऽभिव्यक्तिर्यस्य तमिति हरिविशेषणमिति जगद्धरः। वस्तुतस्तु क्रियाविशेषणतयैव सङ्गच्छते। राधावदनेत्यादिनैव हरिकृतस्मरविकारस्य प्राप्तत्वेन पुनस्तदुपादानस्य विफलत्वात्। किञ्च क्रियाविशेषणेनान्योन्याधिकारप्रदर्शनेन रसाधिक्यं सूचितं भवतीति। तदाह—'अन्योन्यस्यानुरागेण तथान्योन्यविकारतः। रसः स्थिरतरः कोऽपि प्रेयसोरुपचीयत' इति। कीदृशम्? राधावदनविलोकनेन विकसितो विकासं व्यक्तं प्राप्तो विविधो नानाविधो विकारविभङ्गः स्वेदस्तम्भादेर्विशेषतो भङ्गस्तरङ्गो यस्य तम्। कमिव? विधुमण्डलस्य चन्द्रबिम्बस्य दर्शनेन विलोकनेन तरलितः चञ्चलीभूतः तुङ्गः उच्चः तरङ्गः कल्लोलो यस्य एतादृशं जलनिधिमिव पयोनिधिमिवेत्यर्थः। 'विधुः सुधांशुः शुभ्रांशुरि'त्यमरः। 'बिम्बोऽस्त्रीमण्डलं त्रिष्वि'ति च। 'भङ्गस्तरङ्ग ऊर्मि वे'ति च। एतेन राधावदनविलोकनोपचितविकारस्य हरेः विधुबिम्बवीक्षणजनिततुङ्गतरङ्गजलनिधिदृष्टान्तेन राधावदनस्य चन्द्रमण्डलसादृश्ययं हरेश्च गाम्भीर्यं सूचितमिति तेनापि तथाभूतस्यापि कृष्णस्य तदवलोकनजनितविकारवर्णनेन राधाया निखिलनायिकानिकरादाधिक्यं सूचितमिति संक्षेपः॥

२५। अपि किम्भूतं तत्राह—उरसि वक्षसि हारं मुक्तादाम दधतं दधानम्। कीदृशम्? अमलतरतारं निर्मलतरा तारा विशुद्धमुक्ता यत्र तादृशम्। यद्वा अमलतरः तारः उद्भटश्चेति तथा तम्। 'तारो मुक्ताविशुद्धौ चे'ति पीतमुण्डीये। किं कृत्वा? विदूरम् अतिदूरं प्रविलम्ब्य लम्बयित्वा। किमिव? स्फुटतरेणातिव्यक्तेन फेनकदम्बेन करम्बितं मिश्रितं यमुनाजलपूरमिव कालिन्दीपयःप्रवाहमिव। 'पूरो जलप्रवाहे स्यात्प्राणसंशुद्धिसार्थयोर'ति*। 'करम्बितस्तु मिश्रे स्यान्निकुरुम्बकदम्बकमि'त्यमरः। अत्र यद्यपि यमुनाजलपूरमित्येतावतैव जलप्राप्तौ जलपदं व्यर्थम्, तथापि जलपदमत्यन्तसादृश्यप्रतिपादनायेति जगद्धरः।

× ग्रन्थान्तरे परिरभ्य इति पाठः।

* '......माद्ययो'रिति पाठ०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्यामलमृदुलकलेवरमण्डलमधिगतगौरदुकूलम् ।
नीलनलिनमिव पीतपरागपटलभरवलयितमूलम् ॥ हरि० ॥ २६ ॥

तरलदृगञ्चलवलनमनोहरवदनजनितरतिरागम् ।+
स्फुटकोमलोदरखेलितखञ्जनयुगमिव शरदि तडागम् ॥ हरि० ॥ २७ ॥

सारवती

स्फुटार्थमिति केचित् । वस्तुतस्तु यमुनाजलसमूहमिवेत्यर्थः । तथा सति च नाधिकताशङ्कापि । क्वचित्तु 'प्रविलम्बविदूरमि'ति पाठः, तस्य च प्रविलम्बो लम्बनशोलो विदूरोऽतिशयितभागो यस्य तमित्यर्थः ॥

२६। पुनः कीदृशं तत्राह—श्यामलं श्यामवर्णं मृदुलं कोमलं कलेवरमण्डनं यस्य तम्। तदाह—'कालः श्यामलमेचकावि'ति। 'कोमलं मृदुलं मृद्वि'ति चामरः। पुनः कोदृशम् ? अधिगतं प्राप्तं परिधानोक्तमिति यावत्, गौरदुकूलं पोतवर्णं पट्टवस्त्रं येन तम्। 'पीतो गौरो हरिद्राभ' इत्यमरः। किमिव ? नोलनलिनमिव श्यामलकमलमिव। कोदृशं नोलनलिनम् ? पोतपरागपटलस्य हरिद्राभकुसुमरेणुसमूहस्य भरोऽतिशयः तेन वलयितं वेष्टितं मूलं मूलदेशो यस्य तम्। अधिपूर्वो गमिः परिधानार्थः। 'परागः कौसुमे रेणौ स्नानोयादौ रजस्यपी'त्यमरः। उपमा चात्रालङ्कारः ॥

२७। पुनः कीदृशं तत्राह—तरलं चञ्चलं दृगञ्चलं दृक्प्रान्तः तस्य वलनेन सञ्चरणेनT मनोहरं रमणीयं यद् वदनं तेन जनित उत्पादितो रतौ क्रीडायां रागोऽनुरागोऽर्थान्नारीणां येन तम्। कमिव ? स्फुटकमलोदरे प्रफुल्लारविन्दक्रोडे खेलितं क्रीडितं खञ्जनयुगं खञ्जरीटयुग्मं यत्र एवम्भूतं शरदि शरत्समये तडागमिव जलाशयविशेषमिव। अत्र निर्मलत्वेन रसाश्रयत्वेन च कृष्णः शरत्कालीनतडागेनोपमितः, सौरभविशेषाश्रयत्वात् आह्लादकत्वाच्च मुखं कमलेनोपमितम्, तरललोचनं चाञ्चल्यविशेषत्वात् खञ्जरीटेनोपमितमित्यवधेयम्। एवञ्च शरत्काले पद्मोपरि खञ्जरीटदर्शनेन राधायाः समीहितसिद्धिरचिरादेव स्यादिति सूचितम्। तदुक्तम्--'अब्जेषु गोषु गजवाजिमहोरगेषु राज्यप्रदः कुशलदः खलु खञ्जरीट' इति ॥

+ ग्रन्थान्तरे 'चलनमनोहरे'त्यादिः पाठो वर्तते ।
T 'सञ्चलेन' इति पाठ० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वदनकमलपरिशीलनमीलितमिहिरसमकुण्डलशोभम् ।
स्मितरुचिरकुसुमसमुल्लसिताधरपल्लवकृतरतिलोभम् ॥ हरि० ॥ २८ ॥
*शशिकिरणच्छुरितोदरजलधरसुन्दरसकुसुमकेशम् ।
तिमिरोदितविधुमण्डलनिर्मलमलयजतिलकनिवेशम् ॥ हरि० ॥ २९ ॥
विपुलपुलकभरदन्तुरितं रतिकेलिकलाभिरधीरम् ।
मणिगणकिरणसमूहसमुज्ज्वलभूषणसुभगशरीरम् ॥ हरि० ॥ ३० ॥

सारवती

२८। पुनः कीदृशं तत्राह—वदनमेव कमलम्, तत् परिशीलनाय मीलिते मिहिरारुणसदृशे कुण्डले यौ कर्णालङ्कारविशेषौ ताभ्यां शोभा कान्तिर्यस्य तम् । तदाह—'मिहिरारुणपूषणमि'त्यमरः । 'सुषमा परमा शोभा शोभा कान्तिद्युतिश्छविरि'त्यमरः । पुनः कीदृशम् ? स्मितरुच्या ईषद्धासकान्त्या रुचिरः कान्तो यः समुज्ज्वलितः स्वभावतः सुन्दरोऽधरपल्लवो रदनच्छदपल्लवः किसलयः तेन कृतो जनितः रतौ सुरते लोभोऽभिलाषा यत्र अर्थात् सुन्दरीणाम्, तादृशमित्यर्थः ॥

२९। पुनः कीदृशं तत्राह- शशिकिरणच्छुरितोदरश्चन्द्रद्युतिसम्बद्धान्तरो यो जलधरः मेघस्तद्वत् सुन्दरो मनोहरः सकुसुमः कुसुमसहितः केशः कुन्तलकलापो यस्य तादृशम् । पुनः कीदृशम् ? तिमिरे तमसि उदित उद्भूतो यो विधुमण्डलः चन्द्रबिम्बं तद्वन्निर्मलं यच्चन्दनतिलकं तस्य निवेशोऽवस्थितियत्र तादृशमित्यर्थः । यद्यपि चन्द्रादये तिमिरावस्थित्यसम्भवादनुपपन्नमेतत्, तथाप्यद्भूतोपमेयमिति तात्पर्यम् । शृङ्गारिणां गोपालानाञ्च तिलकं वर्तुलमेव भवतीति तस्य चन्द्रेण साम्यमित्यवधेयम् । तदाह—त्रिपुण्ड्रं ब्राह्मणैः कार्यं क्षत्रियैरर्द्धचन्द्रकम् । वैश्यैरेकाङ्गुलिग्राह्यं सामान्यैर्वर्तुलाकृतिरि'ति ॥

३०। पुनः कीदृशं तत्राह—विपुलपुलकभरेण बृहद्रोमाञ्चातिशयेन दन्तुरितं व्याप्तम् । 'निम्नोन्नते तथा व्याप्ते दन्तुरं कथ्यते बुधैरि'ति धरणिः । पुनः कीदृशम् ? रतिकेलिकलाभिः सुरतक्रीडाकौतुकैरधीरं चञ्चलम् । तथा च प्रकृत्या धीरोऽपि तदा रतिक्रीडाकौतुकेनाधीर इति कृष्णस्य सन्नायकत्वं सूचितम् । तदाह—'प्रियवाक् सुन्दरः शिल्पी दयावान् साहसान्वितः । कुलीनश्च युवा धीर उत्तमो नायको मत' इति । क्रीडा-

---

* 'शशिकिरणच्छूरित' इति पाठ० ।

० 'अभूतोपमेयम्' इति पाठ० ।

+ '. ...सुरतेऽपि चे'ति इति पाठ० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीजयदेवभणितविभवद्विगुणीकृतभूषणभारम् ।
प्रणमत हृदि विनिधाय हरिं सुचिरं सुकृतोदयसारम् ॥ हरि० ॥ ३१ ॥

अतिक्रम्यापाङ्गं श्रवणपथपर्यन्तगमन-
प्रयासेनेवाक्ष्णोस्तरलतरतारं पतितयोः ।
तदानीं^T राधायाः प्रियतमसमालोकसमये
पपात स्वेदाम्बुप्रसर^+ इव हर्षाश्रुनिकरः ॥ ३२ ॥

सारवती

काले चपलता युक्तैव । तदुक्तम्—'वैजात्यं सुरतेषु चे'ति ।+ पुनः कीदृशम् ? मणिगण-किरणसमूहेन समुज्ज्वलं यद् भूषणं तेन सुभगं शरीरं यस्य तादृशम् ॥

३१। कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं प्रकृतगीतमुपसंहरति । हे जनाः ! सुचिरं बहुसमयं हरिं कृष्णं प्रणमत नमः कुरुत । कीदृशम् ? जन्मान्तरकृतेन पुण्यकर्मणा उदय उद्भवो येषां ते सुकृतोदयाः पुण्यात्मानः पुरुषाः, तेषां सारं धनमिव । तत्राह—'सारो बले स्थिरांशे च न्याय्ये नीरे धनेऽपि चे'ति विश्वः। पुनः कीदृशम् ? श्रीजयदेवभणितविभवेन भाषितप्रपञ्चेन द्विगुणीकृतो भूषणस्य-अलङ्कारस्य भारो येन तम् । अलङ्कारवत्याः जयदेवकवितायाः साहित्येनालङ्कारस्य द्वैगुण्यं भवत्येवेति भाव इति जगद्धरः। वस्तुतस्तु श्रीजयदेवेन भणितं विभवमैश्वर्यं यस्य स श्रीजयदेवभणितविभवः। द्विगुणीकृतः स्वशरीरसम्बन्धेन द्विगुणकान्तिजनकतया भूषण-भारो येन स द्विगुणीकृतभूषणभारः। श्रीजयदेवभणितश्चासौ द्विगुणीकृतभूषणभारश्चेति स तथा तमित्यर्थः ॥

३२। कृष्णव्यापारवर्णनानन्तरं राधाया अपि विकारं वर्णयति । तदानीं प्रियतम-समालोकनसमये राधाया अक्ष्णोश्चक्षुषोः हर्षाश्रुनिकरः आनन्दाश्रुसमूहः पपात । अत्रोत्प्रेक्षते—क इव ? स्वेदाम्बुप्रसर इव । अत्र हेतुगर्भविशेषणमाह--कथम्भूतयोः ? अक्ष्णोरपाङ्गं नेत्रप्रान्त-मतिक्रम्य श्रवणपथर्यन्तगमनप्रयासेनेव तरलतरतारं चञ्चलतरकनीनिकं यथा स्यादेवं पतितयोः कृष्णे इत्यर्थात् । अन्योऽपि श्रवणपथपर्यन्तगमनेन तरलतरतारं क्वचित् पतति घर्मवारि च विमुञ्चतीति ध्वनितम् । 'तारकाक्ष्णः कनीनिके'त्यमरः ॥

T 'इदानीम्' इति पाठ० ।

+ 'स्वेदाम्भःप्रसर' इति पाठ० । 'स्वेदाम्बुप्रकर' इत्यपि पाठोऽस्ति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भजन्त्यास्तल्पान्तं कृतकपटकण्डूतिपिहित-
स्मितं याते गेहाद्बहिरवहितालीपरिजने ।
प्रियास्यं पश्यन्त्याः स्मरशरसमाकूतसुभगं
सलज्जा लज्जापि व्यगमदतिदूरं मृगदृशः ॥ ३३ ॥
जयश्रीविन्यस्तैर्महित इव मन्दारकुसुमैः
स्वयं सिन्दूरेण द्विपरणमुदा मुद्रित इव ।
भुजापीडक्रीडाहतकुवलयापीडकरिणः
प्रकीर्णासृग्बिन्दुर्जयति भुजदण्डो सुरजितः+ ॥ ३४ ॥

इति श्रीगीतगोविन्दे महाकाव्ये अभिसारिकावर्णने सानन्दमुकुन्दो नाम एकादशः सर्गः ॥

सारवती

३३। अथ 'वैजात्यं सुरतेषु चे'ति भरतसूत्रानुसारात् सत्रायिकाया राधिकाया लज्जाव्यपगमम्वर्णयति । अवहितालीपरिजने सावधानसखीरूपपरिजने गेहात् भवनात् बहिःप्रदेशं याते सति मृगदृशो राधाया लज्जापि व्रीडापि अतिदूरं व्यगमत् विशेषात् गतवती । कीदृशी ? सलज्जा तयोरेकान्ते परस्परव्यापारमुद्वीक्ष्य व्रीडितेवेत्युत्प्रेक्षालंकारः । किम्भूतायाः ? तल्पान्तं शय्यां भजन्त्याः सेवमानायाः । अन्तः स्वरूपे पर्यन्ते विनासेऽपि निगद्यत इति जगद्धरादयः* । तत्पक्षे 'किसलयशयनतले कुरु कामिनि चरणनलिनविनिवेशमि'त्युत्तरग्रन्थविरोध इति तल्पान्तं शय्याप्रान्तं भजन्त्या इत्येवाथः । पुनः किम्भूतायाः ? प्रियास्वं पश्यन्त्याः वल्लभवदनं वीक्ष्यमाणायाः । कीदृशं वदनम् ? स्मरस्य कामस्य ये शराः तैः समाकूतम् अभिप्रायः तेन सुभगमतिमनोहरम् । दर्शनक्रियायाः विशेषणमिदम्वा । अवहितालीपरिजने कथम्भृते ? कृता कपटकण्डूतिः, तया पिहितमाच्छादितं स्मितमीषद्धास्यं येन स तथा तस्मिन् ॥

३४। सर्गान्ते सुरजिद्भुजदण्डस्तुतिरूपमङ्गलमाचरति । सुरभिदः सुरजितः कृष्णस्य भुजदण्डः जयति विघ्ननिवारणेन सर्वोत्कर्षेण वर्द्धतामित्यर्थः । सुरभिदः किम्भृतस्य ? भुजापीडक्रीड्या हतो घातितः कुवलयापीडनामा करी येन स तथा तस्य । भुजदण्डः कथम्भूतः ? अतएवावकीर्णा विस्तीर्णा विस्तृता असृग्बिन्दवोऽर्थात् कुवलयापीडस्य रुधिरबिन्दवो यत्र तादृक् ।

---

* 'जगद्धर' इति पाठ० ।
० अत्र 'कृतकण्डुया इति पदं पाठान्तरे दृश्यते ।
+ ग्रन्थान्तरे 'भुर्राजतः' इति पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सारवती

अत्रोत्प्रेक्षते--कीदृशो भुजदण्डः ? जयश्रीविन्यस्तैः जयलक्ष्म्या दत्तैः मन्दारसुकुमैः पारिजात-पुष्पैः महित इव पूजित इव। पुनः कीदृशः ? द्वीपः ? कुवलयापीडः, तस्य रणः संग्रामः, तत्र या मुत् हर्षः, तेन स्वयं सिन्दुरेण मुद्रित इव। मह पूजायां धातुः। तदाह—'मुद्रा चिह्ने च कीर्त्यंत' इति। तथा चातियुद्धविशारदोऽयं बाहुरिति। राधाप्राप्त्या सानन्दोमुकुन्दो यत्रेति व्युत्पत्या सानन्दमुकुन्देति सर्गनाम।

इति समस्तप्रक्रियाविराजमानमहाराजशुक्लध्वजविरचितायां सारवत्यां गीतगोविन्द-टीकायामेकादशः+ सर्गः॥

+ '......टीकायां सानन्दमुकुन्दनामैकादशः' इति पाठः।

—×—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सटीक-गीतगोविन्दम्

द्वादशः सर्गः

सुप्रीतपीताम्बरः।

गतवति सखीवृन्दे मन्दत्रपाभरनिर्भर—
स्मरशरवशाकूतस्फीतस्मितस्नपिताधराम्।
सरसमनसं दृष्ट्वा राधां मुहुर्नवपल्लव-
प्रसरशयने निक्षिप्ताक्षीमुवाच हरिः प्रियाम्॥ १ ॥

गीतम्—१

विभासरागेण एकतालीतालेन गीयते।

किसलयशयनतले कुरु कामिनि चरणनलिनविनिवेशम्।
तव पदपल्लववैरिपराभवमिदमनुभवतु सुवेशम्॥
क्षणमधुना नारायणमनुगतमनुसर* राधिके॥ ध्रुवम्॥ २ ॥

सारवती

१ अथा नारीणां विप्रलम्भेन सम्भोगः पुष्टिमश्नुते। 'कषायिते हि वस्त्रादौ भूयान् भागो हि वर्त्तत' इति भरतशास्त्रदर्शनात् विप्रलम्भवर्णनानन्तरं सम्भोगवर्णनमारभमाणः प्रसङ्गमवतारयति। सखीवृन्दे राधावयस्याकदम्बे गतवति सति हरिरग्रे वक्ष्यमाणं राधामुवाच बभाषे। कीदृशीम्? मन्दः शिथिलीकृतः त्रपाभरो लज्जातिशयः, तेन निर्भरोऽतिशयितो यः स्मरः कामस्तस्य शरस्य वशमधीनं यदाकूतस्मितमभिप्रायपूर्वकमीषद्धसितं तेन स्नपित इवाधरो यस्याः सा तथा ताम्। तथा च यथाशक्त्या धैर्ये कृतेऽपि कृष्णदर्शनेन परायत्ततया तया ईषद्धास्यं कृतमिति वाक्यार्थः। पुनः कीदृशीम्? सरसं सानुरागम् अलसं कामाविर्भावमन्थरं यथा स्यादेवं दर्शन् कान्तमित्यर्थात्, मुहुः वारं वारं नवपल्लवप्रसरशयने नवपल्लवानां प्रसरः सम्भारो यत्र तादृशं यच्छयनं तत्र विक्षिप्ते प्रेषिते अक्षिणी यया सा तथा। क्वचित्तु सरसमलसं दर्शं दर्शं हरिः प्रियामुवाच इत्यन्वय इत्याह। अत्र पुनः पुनः शय्यानिरीक्षणेन शृङ्गारोत्सुकता दर्शिता। तदाह—'मोट्टायितञ्च कुरुते तल्पान्तं मुहुरीक्षते। रतिकमवशा नारी सूचयेत्प्रियसङ्गमम्॥'

२। गीतस्यास्य विभासरागः। एकतालीतालः। रागलक्षणम्— स्वच्छन्दसम्मानीतपुष्पचापः प्रियाधरस्वादुसुधाभितृप्तः। पर्यङ्कमध्यास्यकृतोपवेशो भाषोविनिद्रान्वितहेमगौडः॥'

---

* अनुभज इति पाठः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

करकमलेन करोमि चरणमहमागमितासि विदूरम् ।
क्षणमुपकुरु शयनोपरि मामिव नूपुरमनुगतिशूरम् ॥ क्षण० ॥ ३ ॥
वदनसुधानिधिगलितममृतमिव रचय वचनमनुकूलम् ।
विरहमिवापनयामि पयोधररोरोधकमुरसि दुकूलम् ॥ क्षण० ॥ ४ ॥

मारवती

अस्मिन् सर्गे स्वाधोनभर्त्तृका नायिका। तस्या लक्षणं यथा—'यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुञ्चति। विचित्रविभ्रमासक्ता सा स्यात्स्वाधीनभर्त्तृका।' हरिः प्रियामुवाचेति यदुक्तं तद्दर्शयति—हे राधिके अधुना अनुगतमायत्तं नारायणं मां क्षणमनुसर। अत्र नार्य्या अयं नार इति व्युत्पत्त्या नारः त्वत्सम्बन्धिशृङ्गारः, तदर्थमायनम् आगमनं यस्येति व्युत्पत्त्या नारायणपदेनानुगतपदेन चानुसरणबीजमुपदर्शितम्। अनुसरणप्रकारमेव दर्शयति—हे कामिनि ! किशलयशयनतले नवदलशय्यायां चरणनलिनस्य पादपद्मस्य निवेशं निवेशनं कुरु। निवेशमित्यत्र भावे घञ्। अत्र कामिनिपदेन सम्बोधनेन तवाप्युत्कण्ठा वर्तत एवेति विलम्बेनास्माकं विडम्बनमात्रमिति दर्शितम्। एवमन्वाचयसिद्धं फलान्तरमपि दर्शयति। इदं किशलयशयनं कर्त्तृ पराभवं त्वच्चरणाघातरूपतिरस्कारमनुभवतु। एतावता किमस्माकमित्याशंकायामाह—कीदृशम् ? तव पादावेव पल्लवौ, तस्य वैरि। पुनः कीदृशम् ? सुशोभं सूत्कृष्टा शोभा यस्या तादृशम्। अनेन द्वेषशबीजाधिक्य'* दर्शितम्। तथा च प्रकृतरिपोरपि पराभवमुद्देश्यं भवति, किं पुनरस्येति वाक्यार्थः॥

३। आत्मनोऽनुगतत्वप्रतिपादनेन तदनुरूपकर्मणाभ्यर्थयति। हे राधिके! त्वं दूरमागमितासि दूतीप्रेष्यदूरभूमिभागमितासि। तस्मात् करकमलेन निजकरारविन्देन चरणमहं तव चरणपूजां करोमि। अत्र पूजा दूरागमनव्यथितयोः पदयोः सम्वाहनमेवेत्यवधेयम्। अन्यस्यापि कमलेन पूजनं युज्यत एवेति ध्वनिः। मह पूजायां धातुः। स्वसुखस्यानुद्देश्यत्वेऽपि महतामनुगतोपकृतिरवश्यमुद्देश्या भवतीत्यत आह—क्षणं व्याप्य शयनोपरि नूपरमुपकुरु। तत्तद्व्न्वकालीनकान्तिविशेषणोपकृतं कुर्व्वित्यर्थः। कीदृशम् ? अनुगतिरनुगमनम् अर्थात् तव, तत्र शूरं क्षममित्यर्थः। कमिव ? मामिव, तथा च तस्यानुगतस्योपकारेणाहमपि उपकृतो भवामीति वाक्यार्थः॥

४। पुनरर्थितार्थे सम्मतिमर्थयति—अनुकूलमर्थात् प्रकृतप्रार्थनाया वचनं रचय प्रपञ्चय। किमिव? वदनमेव सुधानिधिस्तस्माद् गलितम् अमृतमिव। तथा सति तवानुमतिमासाद्य

---

* 'देशबीजाधिक्यम्' इति पाठः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रियपरिरम्भणरभसवलितमिव पुलकितमधिकदुरापम्* ।
मृदुरसि कुचकलसं विनिवेशय शोषय मनसिजतापम् ॥ क्षण० ॥ ५ ॥
अधरसुधारसमुपनय भाविनि जीवय मृतमिव दासम् ।
त्वयि विनिहितमनसं विरहानलदग्धवपुषमविलासम् ॥ क्षण० ॥ ६ ॥
शशिमुखि मुखरय मणिरसनागुणमनुगुणकण्ठनिनादम् ।
श्रुतियुगले पिकरुतविकले शमय चिरादवसादम् ॥ क्षण० ॥ ७ ॥

सारवती

उरसि हृदये अर्थात् तव, दुकूलं पट्टवस्त्रमपनयामि। कीदृशम्? पयोधरयोः स्तनयो रोधकम् आच्छादकम्, अतएव विरहमिव मूर्तविश्लेषमिव। इदानीं विरहो व्यपगत एव, परन्त्वावयोः परिरम्भादिप्रतिबन्धकतया दुकूलमेव विरह इति वाक्यार्थः॥

५। लब्धावसरस्तत्कर्त्तृपरिरम्भमर्थयति—हे राधिके! मृदुरसि कुचकलसं विनिवेशय अर्पय। कीदृशम्? अधिकदुरापम् अतिदुर्लभम्। पुनः कीदृशम्? प्रियस्य परिरम्भणे यो रभसः प्रमोदः तेन वलितं सम्भक्तम् अतएव पुलकितं रोमाञ्चितम्। तथा चाचेतनयोः पयोधरयोरपि परिरम्भे रभसो भवति, कथं न भवत्या इति दर्शितम्। अन्येषामपि मनसिजतापस्य हृदयोत्पन्नतापस्य शान्तये रसपूर्णकलसविन्यासः क्रियत इति ध्वनिः॥

६। परिरम्भमभ्यर्थ्याधरपानमभ्यर्थयति—हे भाविनि! अधर एव सुधा अमृतं तदेव रसो द्रवद्रव्यं तदुपनय पानकर्मत्वेनोपस्थितं+ कुरु। मां दासं जीवय। कीदृशं? मृतमिव गतप्राणमिव। पुनः कीदृशम्? विरहानलेन दग्धं वपुर्यस्य तम्, अत एवाविलासं न विद्यते विलासो यस्य स तथा, तम्। पुनः किम्भूतम्? त्वयि विनिहितं मनो येन स तथा, तम्। तथा चान्योऽपि दत्तचित्तो दासोऽमृतेन जीवयितुमुचितमेवेति ध्वनिः। छलेन दानपात्रत्वमप्युपदर्शितम्। तथा च 'दासः शूद्रे दानपात्रे भृत्यधीवरयोरपी'ति विश्वः॥

७। लब्धप्रसरछलेन विपरीतमभ्यर्थयति—हे शशिमुखि! अनुगुणोऽनुकुलो स्वशब्दजातीयत्वेन कण्ठनिनादो यत्र एतादृशं मणिरसनागुणं काञ्चीदाम मुखरय सशब्दं कारय। तथाच विपरीतरत्या सुरतकालीनकण्ठध्वनिविशेषसहितं काञ्चीशब्दं जनयेति वाक्यार्थः। तथा सति तव किमित्यत आह—मम श्रुतियुगले कर्णयुगले चिरात्तव

* 'अतिदुरवापम्' इति पाठो ग्रन्थान्तरे। टीकायां तु 'अतिदुरापम्' इति पाठ०।
+ 'पालय, कर्मत्वेनोपस्थितम्' इति पाठ०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मामतिविफलरुषा विकलीकृतमवलोकितुमधुनेदम् ।
मीलति लज्जितमिव नयनन्तव विरम विसृज रतिखेदम् ॥ क्षण० ॥ ८ ॥
श्रीजयदेवभणितमिदमनुपदनिगदितमधुरिपुमोदम् ।
जनयतु रसिकजनेषु मनोरमरतिरसभावविनोदम् ॥ ९ ॥
प्रत्यूहः फुलकाङ्कुरेण निविडाश्लेषे निमेषेण च
क्रीडाकूतविलोकितेऽधरसुधापाने कथानर्मभिः ।
आनन्दाधिगमेन मन्मथकलायुद्धेऽपि यस्मिन्नभूद्
उद्भूतः स तयोर्बभूव रमितारम्भः* प्रियम्भावुकः ॥ १० ॥

सारवती

विरहेण योऽवसादः तं शमय । अवसादकारणमाह—कथम्भूते ? पिकहतिभिः कोकिलरवै-विकले दुःखिते । तथाच मन्दशब्दोपतप्तं श्रोत्रयुगलं त्वदीयकण्ठनिनादेन रसनाशब्देन च दुःखितं स्यादित्याशयः ॥

८। मत्प्रार्थितसकलार्थे+ तवाप्यनुमतिर्जाता एवेत्यलम्विलम्बनेति दर्शयति—हे राधे ! अधुना सम्प्रति तव नयनं मामवलोकितुं लज्जितमिव जातत्रपमिव मीलति संकुचितं भवति। मां कथम्भूतम् ? अतिविफलरुषा मदीयसन्तापातिरिक्तफलरहितभवत्कोपेन विफलीकृतम्। तथा च प्रकृतप्रार्थितार्थे स्वीकारादवलोकनं मयायं विफलीकृतS इति लज्जेति वाक्यार्थः। अतएव विरम विरता भव वैमुख्यादित्यर्थात्, रतिखेदं रतिविषयं खेदं दुःखं वैमुख्यमिति यावत्, तद्विसृज त्यज ॥

९। कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं गीतमुपसंहरति। श्रीजयदेवभणितं-गीतमिदं कर्तृ रसिकजनेषु मनोरमो मनःप्रीतिकरः यो रतिरसभावः रत्यनुरागजनित-स्मरणादिव्यभिचारिभावः तस्माद्यो विनोदः आनन्दः तं जनयतु। तथा च प्रकृतगीतं विविधशृङ्गारकलास्मारणेन रसिकजनमानन्दयत्वित्यर्थः। कीदृशम् ? अनुपदं प्रतिपदं निगदितः कथितो मधुरिपुमोदो यस्मिन् स तथा तत् ॥

१०। अथ सुरतं वर्णयति। तयो राधामाधवयोः रमितारम्भो रमणोपक्रमः प्रियम्भावुकः प्रियभवनशीलो बभूव। रमितेत्यत्र भावे क्तः। प्रियम्भावुकेत्यत्र प्रियम्भवितुं शीलमस्येति वाक्ये भावे भुवः खिष्णुच्खुकञो कर्त्तरीति खित्वान्मुगागमः†। यस्मिन् रमणारम्भे

* 'सुरतारम्भः' इति पाठ०।
\+ 'मत्प्रार्थितसरणार्थ' इति पाठ०।
S. 'चिरकालीकृत' इति पाठ०।
†. 'वा भुवः सिष्णुःक्षुक्ङो कर्त्तरोक्षुकङ्खित्वान्मुरागम्' इति पाठ०। अत्र पाणिनिसूत्रं तु 'कर्त्तरि भुवः खिष्णुच्खुकञौ' इति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दोर्भ्यां संयमितः पयोधरभरेणापीडितः पाणिजै-
राविद्धो दशनैः क्षताधरपुटः श्रोणितटेनाहतः।
हस्तेनानमितः कचेऽधरमधुस्यन्देन सम्मोहितः
कान्तः कामपि तृप्तिमाप तदहो कामस्य वामा गतिः॥ ११ ॥
माराङ्के रतिकेलिसङ्कुलरणारम्भे तया साहस-
प्रायं कान्तजयाय किञ्चिदुपरि प्रारम्भि यत्सम्भ्रमात्।
निष्पन्दा जघनस्थली शिथिलता दोर्वल्लिरुत्कम्पितं
वक्षो मीलितमक्षि पौरुषरसः स्त्रीणां कुतः सिध्यति॥ १२ ॥

सात्वती

निविडाश्लेषे गाढालिङ्गनपुलकाङ्कुरेण क्रीडाकूतेन विलासाभिप्रायेन यद्विलोकितं विलोकनं तत्र निमेषेण विलोकत इत्यत्र भावे क्तः। अधरसुधापाने कथानर्मभिः कथारूपकेलिभिः मन्मथकलायुद्धे कामचतुःषष्ठिकलान्वितसुरतसंग्रामे आनन्दाभिगमेन सुखसम्वेदनेन प्रत्यूहोऽन्तराय उद्भूतः उद्भावितोऽभूदित्यर्थः। एतेन क्रीडानङ्गीभूतानन्तरितत्वं दर्शयतीत्यासङ्गो दर्शितः। 'क्रीडानर्म च कूर्द नर्मि'त्यमरः॥ 'विघ्नोऽन्तराय प्रत्यूह'इत्यपि॥

११। अथ रतान्तं वर्णयति—कान्तः कृष्णः यदेवंभूतः सन् कामप्यनिवर्चनीयां तृप्तिमाप प्राप्तवान् तत्तस्मादहो आश्चर्यं कामस्य वामा विरुद्धा गतिश्चेष्टा। तदेव विशिनष्टि—किम्भूतः सन्? दोर्भ्यामर्थाद्राधायाः संयमितो बद्धः*, पयोधरयोर्भरेण गौरवेणापीडितः, पाणिजैर्नखैराविद्धः क्षतगात्रः, दशनैर्दन्तैः क्षताधरपुटः, श्रोणितटेनाहतः बन्धविशेषेण ताडितः, कचे हस्तेनानमितः कुन्तलाकर्षणेनानमित इत्यर्थः। अधरमधुस्यदेन स्यन्दमानाधरसम्बन्धिमधुना सम्मोहितः सम्मोहं प्रापितः। अत्र स्यन्दत इति स्यन्दः कर्मण्यण्। कृदभिहितो भावो द्रव्यवत् प्रकाशत इति द्रव्याभिधायकत्वम्। अतएव 'अमृतरसप्रस्यन्दमाध्वीकभूरि'ति कुसुमाञ्जलौ। प्रकाशोऽप्येवमेवेति अधरमधुनः स्यन्देन क्षरणेन सम्मोहित इति जगद्धराद्वयः। तन्मते क्षरणस्यामोहकत्वात् प्रकृतासङ्गतिरित्यवधेयम्। आश्चर्यञ्च यद्यदन्येषां दुःखाय तत्तदेवास्य सुखायेति। यद्वा कामस्य कन्दर्पस्य वामा गतिः वामैव जगद्विजये शरणमित्यर्थः, यत्सम्बन्धिदुःखदव्यापारैरपि जनान् सुखयति॥

१२। अथ क्रमप्राप्तविपरीतान्तं वर्णयति। तया राधिकया सम्भ्रमादादरात् कान्तजयाय वल्लभजयार्थं साहसप्रायं यत्किञ्चिदुपरि प्रारम्भि प्रारब्धम्। कुत्र? रतिकेलि-

---

* 'वक्षः' इति पाठ०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्याः पाटलपाणिजाङ्कितमुरोऽनिद्राकषाये दृशौ
निर्धौतोऽधरशोणिमा विलुलितस्रस्तस्रजो मूर्द्धजाः।
काञ्चीदाम दरश्लथाञ्चलमिति प्रातर्निखातैर्दृशो-
रेभिः कामशरैस्तदद्भुतमभूत्पत्युर्मनः कीलितम् ॥ १३ ॥

सारवती

सङ्कुलरणारम्भे रतौ या केलिः क्रीडा सैव सङ्कुलरणः तुमुलसंग्रामः, तस्यारम्भे। किम्भूते ? मारः कन्दर्पः स एवाङ्कं चिह्नं यस्य एतादृशि। अन्योऽपि संग्रामो मारणम् अङ्कं चिह्नं यस्य एतादृशो भवति। 'तुमुलं रणसङ्कुल' इत्यमरः। तस्मात् जघनस्थली निष्पन्दा बभूव, दोर्वल्लिः बाहुलता शिथिलता शैथिल्यं प्राप्ता, वक्षः हृदयमुत्कम्पितम्, अक्षि लोचनं मीलितं मुद्रितं बभूव। कथमेवमभूदित्याशंकायामाह—स्त्रीणां पौरुषरसः पौरुषे कर्मणि रसः अनुरागः कुतः सिध्यति कुतः फलपर्यवसन्नो भवत्यपितु न भवतीत्यर्थः॥

